August 1921.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 284.

गादाधरी

श्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता ।
श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

GÂDÂDHARÎ

A COMMENTARY ON DÎDHITI THE COMMENTARY
OF TATTVA CHINTÂMANI.

By Gadádhara Bhattâchârya Chakravartin. With Text.
Edited by *Mahâmahopâdhyâya Vindhyeswarî Prasâda Dvivedin, Librarian, Govt. Sanskrit College, Benares.*
and Nyâyâchârya Vâmâcharana Bhattâchârya
Professor of the same College, and
Nyáyacharya Sreerâma Sâstrî Bhândâri,

BENARES.

FASCICULUS XI–११.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO; BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1920.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥
स्तवकः—२८४

न च साक्षादुन्नयनयोग्यत्वं तद्वाप्यत्वम्, परम्परया तथात्वं च तद्वाप्यव्याप्यत्वमिति विशेष इति वाच्यम् । तथा सति तयोरननुगमेनात्र साधारणोन्नायकताप्रवेशासम्भवात्, उक्तिवैचित्र्याच्च पूर्वस्माद्भेद इत्युत्तरग्रन्थासङ्गतेश्च । इत्थं च तत्त्वं चेत्यादेरुपाधित्वघटकमुन्नायकत्वं च साक्षात्परम्परया वेति नार्थः, अपि तु निरुक्तोपाधितानियतमुन्नयनं साक्षात्परम्परया वेति नार्थान्तरं क्षतिकरमिति । विरुद्धवारणाय । साध्यविरुद्धजलत्वादिवारणाय । पूर्ववत्साध्यसमानाधिकरणेति बोध्यम् । धर्मिणि साध्यसामानाधिकरण्यं धर्मे वा साध्यसमानाधिकरणवृत्तित्वविशेषणं बोध्यम् । साधने साध्यव्यभिचारोन्नायकत्वविवक्षणे साधनव्यभिचारीत्यस्य वैयर्थ्यादाह । व्यभिचारोन्नायकत्वं च यत्र क्वचिदिति । एवं चेति । तत्साथर्क्यं दर्शयति । द्रव्यत्वादौ व्यभिचारोन्नायकस्येति । द्रव्यत्वं गुरुत्वव्यभिचारि रूपव्यभिचारित्वादिति रीत्येत्यादिः ।

यद्यपि वह्निमान् धूमादित्यादावपि रासभादौ वह्निव्यभिचारोन्नायकव्यभिचारप्रतियोगिवह्निसामग्र्यादिवारकमपि तत्, तथाप्यग्रे गुरुत्वसाध्यकपृथिवीत्वाद्यतिप्रसङ्गस्य शङ्कनीयतया गुरुत्वसाध्यकानुधावनम् । बहुव्रीहिरिति । साधनं व्यभिचारि यस्येतीत्यादिः । तत्पुरुषेण उक्तातिप्रसङ्गस्यैव दुर्वारत्वादिति भावः । पृथिवीत्वाद्यतिप्रसङ्ग इति । अवच्छिन्नसाध्यव्यापकसङ्ग्रहाय विशेषिताविशेषितसाधारणव्यभिचारोन्नायक इति वक्तव्यत्वादिति भावः । साधननिष्ठमिति । उन्नायकत्वं तद्योग्यता, सा चात्र व्याप्तिरेव, पक्षधर्मताया अन्तर्भावस्य वैयर्थ्यात्, साधननिष्ठत्वनिवेशनैव साधनव्यापकवारणात् । रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावव्यभिचारस्य वारणाय पूर्वोक्तैव रीतिरादरणीया ।

नन्वेवं यद्व्यभिचारेणेत्याद्यभेद इत्यत आह । उक्तिवैचित्र्याच्चेति । पूर्वमुन्नयनस्य साधनपक्षकत्वोक्तेर्यद्व्यभिचारस्य साधनरूपपक्षधर्मतालाभः, अत्र तु साधनव्यभिचारीत्यत इति विशेषादित्यर्थः । तथा च पूर्वनिरुक्तस्यैव उक्तिभङ्ग्या ऽनुवादोऽयम, न तु निरुक्त्यन्तरम, पूर्वमुपाधेः साक्षात्साध्यव्यभिचारानुमापकत्वनिर्वाहे आग्रहः, इदानीं तु न तथात्वाभ्युपगम इत्येतावतैव कल्पभेदादिति भावः ।

(दी०) केचित्तु व्यभिचारोन्नायकत्वमिह तद्व्याप्यकोटिप्रविष्टतामात्रेण, इत्थं च जलत्वेन करकात्वे साध्ये जलत्वं करकात्वव्यभिचारि स्नेहव्यापकत्वात्, घटेन वा घटत्वे साध्ये घटो घटत्वव्यभिचारी जन्यद्रव्यत्वादिति व्यभिचारोन्नयनसमर्थस्य स्नेहस्य द्रव्यत्वस्य च वारणाय साधनव्यभिचारीति । अयं घटः सत्त्वादित्यादौ सत्त्वं घटत्वव्यभिचारि शब्दादिवृत्तित्वादिति व्यभिचारोन्नायकस्य शब्दादेर्वारणाय साध्यसमानाधिकरणेत्यपि वक्तव्यम्, एवं च रूपेण गुरुत्वादौ साध्ये रूपं गुरुत्वादिव्यभिचारि जलभिन्नपृथिवीत्वाभाववद्वृत्तित्वादिति व्यभिचारोन्नायकस्य गुरुत्वव्यभिचारितैजसरूपनिष्ठव्यभिचाराप्रतियोगिनः पृथिवीत्वाभावस्य वारणाय यत्राधिकरणे साधनाव्यापकत्वं तत्र व्यभिचारोन्नायकत्वं वक्तव्यम् । यथाकथञ्चित्स्वव्यभिचारेण व्यभिचारोन्नायकमात्रस्य लक्ष्यत्वे यत्साधनव्यक्त्यव्यापकत्वं तद्व्यक्तौ व्यभिचारोन्नायकं वाच्यमित्याहुः ।

(गा०) ये तु पूर्वकल्पभेदायान्यथा व्याचक्षते तन्मतमाह । केचित्त्विति । तद्व्याप्यकोटिप्रविष्टतामात्रेणेति । व्यभिचारव्याप्यतावच्छेदकावच्छिन्नघटकत्वरूपमेव न तु पूर्ववद्व्यभिचारप्रतियोगित्वरूपमित्यर्थः । स्नेहव्यापकत्वादिति । व्यभिचारोन्नयनसमर्थस्य स्नेहस्य वारणायेत्यन्वयः व्यभिचारोन्नयनसमर्थत्वं स्नेहव्यभिचारोन्नयनयोग्यो यो हेतुस्तद्घटकत्वम् । घटेनेति । घटस्य हेतुता संयोगेन समवायेन वा, उभयथैव व्यभिचारिता । जन्यद्रव्यत्वादिति । व्यभिचारोन्नयनसमर्थस्य द्रव्यत्वस्य चेत्यन्वयः । अवृत्तौ व्यभिचारशून्ये व्यभिचारवारणाय जन्येति । घटरूपादौ व्यभिचारवारणाय द्रव्येति । स्नेहव्यापकत्वे स्नेहस्य विशेषणतया जन्यद्रव्यत्वे च द्रव्यत्वस्य विशेष्यतया प्रवेशः, उभयथैवातिप्रसङ्गः, प्रवेशे वैलक्षण्यस्य अविवक्षणादित्येतत्सूचनाय स्थलान्तरकथ-

नम् । करका जलत्वादित्यादौ स्नेहादिवारणं साधनव्यभिचारीत्यत्र षष्ठीसमासेनापि, घटत्ववान् घटादित्यत्र द्रव्यत्वस्य घटाभाववद्वृत्तितया बहुव्रीह्यनादरे न वारणसम्भव इति तदादरप्रयोजनप्रदर्शनाय वा द्वितीयस्थलानुधावनम् । धूमवान् वह्नेरित्यादौ साध्यविरुद्धह्रदत्वाद्यभावाधिकरणायोगोलकवृत्तित्वत्वादिना धूमादिव्यभिचारोन्नयने ह्रदत्वादेरप्रवेशेन तत्रातिव्याप्त्यप्रसक्त्या स्थलान्तरेऽतिव्याप्तिवारणाय साध्यसामानाधिकरण्यं प्रवेशयति । अयमिति । शब्दादीत्यादिना ज्ञानादिपरिग्रहः । सद्धेतौ सपक्षैकदेशवृत्तिधर्मवारकतया साध्यव्यभिचारोन्नायकप्रविष्टस्य सार्थक्यं बोध्यम् । इदं गुरु रसवत्त्वादित्यादौ द्रव्यत्वादौ गुरुत्वादिव्यभिचारोन्नायकजलान्यपृथिवीत्वाभाववद्वृत्तित्वाद्घटकपृथिवीत्वादावतिव्याप्तिवारणाय साधने साध्यव्यभिचारोन्नायकत्वं विवक्षणीयम् । इति व्यभिचारोन्नायके । इति रीत्या व्यभिचारोन्नायके, उक्तहेतौ प्रविष्टस्य पृथिवीत्वाभावस्येत्यनेनान्वयः । तस्यानुपाधिताप्रयोजकविशेषणमाह । गुरुत्वादीति । तथा च तद्व्यतिरेकेण कथञ्चिदपि रूपेण न साध्यव्यभिचारानुमानसम्भव इति भावः। यत्राधिकरणे इति। यत्र साधनाधिकरणे स्वाभावः साध्याभाववत्तदधिकरणवृत्तित्वोन्नायकत्वमित्यर्थः । उक्तस्थले च तादृशसाधनाधिकरणे पृथिव्यां साध्याभावासत्त्वात्पृथिवीत्वाभावस्य न तादृशत्वमिति नातिव्याप्तिरिति भावः ।

नन्वेवं रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावस्य सङ्ग्राह्यत्वे तत्राव्याप्तिरित्यत आह । यथाकथञ्चिदिति । यत्साधनेति । उक्तस्थले पृथिवीवृत्तिसाधनव्यक्त्यधिकरणं वाय्वादिकमपीति तदन्तर्भावेण साध्यव्यभिचारस्य हेतौ सत्त्वाल्लक्षणसमन्वय इति भावः । अत्र चाभावरूपोपाधेः प्रतियोगिमद्वृत्तित्वस्यैव व्यभिचारोन्नायकतया तदप्रविष्टत्वादसङ्ग्रहः, गुरुधर्मसाधारणस्योन्नायकतावच्छेदकत्वस्य प्रवेशेनैतद्दोषस्य वारणेऽपि यत्र साधनाधिकरणे स्वाभावः साध्याभाववत्तदधिकरणकत्वस्य साध्याभाववत्तदीयाधिकरणकत्वस्य वा साधुतया शेषवैयर्थ्यम्, पूर्वनिरुक्तोपाधित्वस्यैव परम्परया व्यभिचारोन्नायकत्वेऽप्यवच्छिन्नसाध्यव्यापकोपाधिसाधारण्येनान्यादृशोपाधित्वनिर्वाहानौचित्यमित्यस्वरसबीजम् ।

(चि०) किञ्च अर्थान्तरस्य पुरुषदोषतयाऽऽभासान्तरस्य तत्राभावादुपाधिरेव भावत्वादिकं दोषः।

(दी०) नन्वस्तु पारिभाषिकमुपाधित्वम्, तथापि साक्षाद् व्यभिचारानुन्नायकतया दोषत्वाभावेन तदुद्भावनेऽर्थान्तरं स्यादेवेसत आह। किञ्चेति। आभासान्तरस्य। तदानीं ज्ञायमानस्य, तथा च तस्यावश्याभ्युपेयदोषभावत्वे तदुद्भावने नार्थान्तरमिति भावः।

(गा०) अवच्छिन्नसाध्यव्यापकस्य साक्षाद्व्यभिचारानुन्नायकत्वाभ्युपगमपक्षे कथञ्चिदुपाधित्वसमर्थनेऽपि तान्त्रिकाणां परार्थस्थले तदुद्भावनमर्थान्तरादिदोषेणानुपपन्नमेवेति शङ्कानिवर्तकतया किञ्चेत्यादिमूलमवतारयति। नन्वस्त्विति। उपाधित्वम्। तान्त्रिकाणामुपाधिव्यवहारविषयत्वम्। पारिभाषिकम्। स्वकल्पितपरिभाषानिर्वाच्यमित्यतोऽवच्छिन्नसाध्यव्यापकस्य साक्षात्साध्याव्यापकत्वेऽपि अस्तु उपाधित्वनिर्वाह इत्यर्थः। साक्षादिति। परम्परया व्यभिचारोन्नायकस्य दोषत्वे उपाध्युन्नायकपरम्पराया अपि तथात्वापत्तेरिति गूढोऽभिसन्धिः। दोषत्वाभावेनेति। प्रथममनाकाङ्क्षितत्वादिति शेषः। आहेति। तस्य दोषत्वं व्यवस्थापयतीत्यर्थः।

मूले अर्थान्तरस्य। अर्थान्तरादेः। पुरुषदोषतया। वादिनां तदुद्भावनदशायां आकाङ्क्षाविरहाधीनतया। आभासान्तरस्य। दोषान्तरज्ञानस्य। तत्र। तदानीम्, तदुपाध्युद्भावनदशायामिति यावत्।

उपाधिस्थले व्यभिचारस्याऽऽवश्यकतया आभासान्तरस्य तत्राभावादिति यथाश्रुतासङ्गतिः, अत आभासपदं तज्ज्ञानार्थकमकृत्वा पूरणेन उक्तासङ्गतिं दीधितिकृत परिहरति। तदानीमिति।

मूले उपाधिरेवेति। एवकारव्यत्यासेन उपाधिर्भावत्वादिकं दोष एव दोषतया उद्भाव्यमेवेत्यर्थः।

अर्थान्तरसत्त्वे उद्भाव्यत्वासम्भवादर्थान्तरप्रयोजकत्वेनाभिहितस्य आकाङ्क्षाविरहस्य प्रकृते ऽसत्त्वलाभायाभासान्तरज्ञानाभावाभिधानस्य भावं प्रकाशयति दीधितौ। तथा चेति। तस्याव-

श्येति परम्परया व्यभिचाराद्युन्नायकत्वेनापि तस्य अनुमितिविरोधिताया अवश्याभ्युपेयत्वेन तेन रूपेणाकाङ्क्षितत्व इत्यर्थः ।

(दी०) अत्र वदन्ति साध्योपन्यासानन्तरं तत्साधकस्येव साधनोपन्यासानन्तरं तद्दोषस्य व्यभिचारादेराकाङ्क्षितत्वात्तमनुद्भाव्य साक्षात्तत्साधकस्य शुद्धसाध्यव्यापकस्योपाधेरुद्भावने एवाऽप्राप्तकालत्वम् , कैव कथा परम्परया तत्साधकस्यावच्छिन्नसाध्यव्यापकस्य, अन्यथा तत्साधकपरम्पराया अपि प्रथममुपन्यासे तथात्वं न स्यात् । न च निग्रहस्थानत्वेन विशेषः, प्रतिज्ञाहान्यादितो हेत्वाभासाच्च बहिर्भूतस्य तथात्वायोगात् ।

(गा०) परम्परया व्यभिचाराद्युन्नायकस्य प्रथममाकाङ्क्षितत्वे उपाध्युन्नायकपरम्परोद्भावनप्रतिबन्देरनुद्धारात् स्वयमन्यानुद्भावनपरिपाटीं प्रदर्शयिष्यन् साम्प्रदायिकोद्भावनक्रमं निराकरोति । अत्र वदन्तीति । साध्योपन्यासानन्तरं तत्साधकस्येवेति । पक्षे साध्यस्योद्भावने कृते उद्भावयितुरनाप्तत्वशङ्कया उद्भावितार्थेऽप्रमितत्वशङ्कया मध्यस्थस्य यथा तन्निवर्तकप्रमाणगोचरनिर्णयेच्छा सम्भवति तथा साधनोपन्यासे कृते तस्य दुष्टत्वादुष्टत्वकोटिकशङ्कया तन्निवर्त्तकतदन्यतरकोटिनिर्णयेच्छया व्यभिचारादिरूपदोषस्याकाङ्क्षितत्वाद्व्यभिचारादिकमनुद्भाव्य प्रथममनाकाङ्क्षितस्य साक्षाद्व्यभिचारादिसाधनस्यापि शुद्धसाध्यव्यापकोपाधेरुद्भावन एव अप्राप्तकालत्वमित्यर्थः । परम्परया । अवच्छिन्नसाध्यव्यभिचारादिसाधनद्वारा । तत्साधकस्य शुद्धसाध्यव्यभिचारादिसाधकस्यावच्छिन्नसाध्यव्यापकस्य, उद्भावने अप्राप्तकालतायाः । का कथा । को विपरीतकथावसरः । अन्यथा । तदाकाङ्क्षावसर एव तत्साधकाकाङ्क्षायाम् । तत्साधकेति । तादृशोपाधिप्रभृतिसाधकेत्यर्थः । तथात्वम् । अप्राप्तकालत्वम् । निग्रहस्थानत्वेनेति । उपाधेरित्यादिः । विशेषः । अनथाभूततत्साधकपरम्परातः, तथा च निग्रहप्रयोजकत्वेन हेत्वाभासादीनामिव उपाधेरपि प्रथममाकाङ्क्षितत्वमिति प्रथमं तदुद्भावने नाप्राप्तकालत्वम्, अपि तु स-

त्साधकोद्भावन एवेति भावः। प्रतिज्ञाहान्यादित इति। "प्रतिज्ञाहानिः प्रतिज्ञान्तर"मित्यादिसूत्रपरिगणितादित्यादिः। प्रतिज्ञाहान्यादित उपाधेर्बहिर्भावस्स्फुटतर एव। अनौपाधिकत्वस्य व्याप्तित्वमते उपाधेर्व्याप्यत्वासिद्धिरूपतया हेत्वाभासान्तर्भावप्रसङ्गसम्भवात् हेत्वाभासाश्चेति परिगणितत्वेऽपि आदिपदार्थे तमनन्तर्भाव्य हेत्वाभासाश्चेति पृथगुपादानम्। अनौपाधिकत्वस्य व्याप्तित्वनिरासादित्यादिः। तथात्वायोगात्। निग्रहस्थानत्वायोगात्।

(दी०) न च विभाजकसूत्रस्थेन हेत्वाभासाश्चेति चकारेणानुक्तसमुच्चयपरेण साक्षात्परम्परया वाऽनुमितिदोषोन्नायकस्य सङ्ग्रहः, तथा सति व्यभिचारस्येवाऽऽश्रयासिद्ध्यादेरप्युन्नायकस्य तदुभयोन्नायकपरम्परायाश्च तथात्वापातात्। न चाप्राप्तकालतामासादयन्नपि प्रथममुपाध्युपन्यासः कथकसम्प्रदायानुरोधादेव कर्तव्यः, तादृशसम्प्रदायमननुरुन्धानस्य तदुद्भावकं पराभवतश्शपथनिवारणीयतापत्तेः। तस्मात्प्रथमं शुद्धसाध्यव्यभिचार एवोद्भाव्यः, तत्र कथन्तायां तद्धेतुत्वेन शुद्धसाध्यव्यापकोपाधिव्यभिचारः, विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यापकस्योपाधेर्विशिष्टसाध्यस्य वा व्यभिचारः, अत्र च विशेष्ये विशिष्टसाध्यव्यापकोपाधिव्यभिचार इति। वक्ष्यते च व्यभिचारादेरिव तद्व्याप्यवत्त्वादेरपि ज्ञानं व्याप्त्यादिग्रहप्रतिबन्धकम्, तथा च साध्यव्यभिचारव्याप्योपाधिव्यभिचारवानयमिति वोद्भावनीयमिति।

(गा०) तदुभयेति। व्यभिचाराश्रयासिद्ध्याद्युभयेत्यर्थः। तथात्वापातात्। निग्रहस्थानत्वापातात्। तथा चाश्रयासिद्ध्याद्युन्नायकस्य प्रथममुद्भावनेऽपि तथात्वं न स्यादिति भावः। चकारेणोपाधिरेव महर्षिणा सङ्गृहीत इति नाशङ्कनीयम्, दोषोन्नायकत्वाविशेषेणाश्रयासिद्ध्याद्युन्नायकोपेक्षाया निर्बीजत्वात्। तदुद्भावकम्। उपाध्युद्भावकम्। पराभवतः। निगृह्णतः।

नन्वेवमुपाधिः किमनुद्भाव्य एवेत्याकाङ्क्षायामाह । तस्मादिति । तत्र । शुद्धसाध्यव्यभिचारे । कथन्तायाम् । साधकाकाङ्क्षायाम् । तद्धेतुत्वेन शुद्धसाध्यव्यापकोपाधिव्यभिचारः, उद्भाव्य इत्यनुषज्यते । एवमुत्तरत्रापि । व्यभिचारादेस्सम्बन्धताविरहे प्राधान्येनोपाधिर्नोद्भाव्यते एवेति ध्वनितम् । अवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारस्य विशेषणान्तरानवच्छिन्नशुद्धसाध्यव्यभिचारासाधकत्वेऽपि विशेषणान्तरविशिष्टतया तदुद्भावनमपि प्रथमतस्सम्भवतीत्याह । विशेषणेति । अविशिष्टेनापि विशिष्टसाध्यव्यापकव्यभिचारेण विशिष्टसाध्यव्यभिचारे सिद्ध्यति पक्षधर्मताबलात् शुद्धसाध्यव्यभिचारसिद्धिसम्भवेऽपि विशेषणान्तरानवच्छिन्ने विशिष्टसाध्यव्यापकोपाधिव्यभिचारे शुद्धसाध्यव्यभिचारावच्छिन्नस्य साधकतयोपन्यस्ते तद्रूपावच्छिन्नसिद्ध्यौपयिकतद्रूपावच्छिन्ननिरूपितव्याप्तिस्ताहशोपाधिव्यभिचारहेताबाकाङ्क्षोदयात् तस्याश्च तादृशहेतौ बाधेनोद्भावनासम्भवात् सत्यन्तविशेषितस्यैवोद्भाव्यत्वमुक्तम् । तादृशविशेषणाविशेषितेन तादृशोपाधिव्यभिचारेणेव तथाविधेन विशिष्टसाध्यव्यभिचारेणापि शुद्धसाध्यव्यभिचारसाधनसम्भवात्तस्याप्युद्भावनीयतामाह । विशिष्टसाध्यस्य वेति । अत्रापि सत्यन्तमनुषज्यते । वाकारो व्यवस्थितविकल्पार्थः । अत्र च विशेष्य इति । उपन्यस्तस्य विशेषणाव्यभिचारविशिष्टसाध्यव्यभिचारस्य घटके विशिष्टसाध्यव्यभिचार इत्यर्थः । व्यभिचारव्याप्यत्वविशिष्टस्य व्यभिचारान्तर्भावात्तादृशस्योपाधिव्यभिचारस्य प्रथममुद्भावनेऽपि नाप्राप्तकालतेत्याह । वक्ष्यते चेति । व्याप्त्यादिग्रहप्रतिबन्धकमिति । साक्षादित्यादिः । तथा च तद्याप्यवत्त्वमपि हेत्वाभास इति भावः ।

(चि०) न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वम् , जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात् , केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् । न च पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः, तत्रानुकू-

लतर्काभावेन साध्यव्यापकत्वानिश्चयात्,

(दी०) साध्यव्यापकत्वानिश्चयात्। उपाधित्वौपयिक-तदनिश्चयात्। अनुकूलतर्कादिना तादृशव्यापकत्वनिश्चये तु बाधोन्नीतवह्निवत्येव निश्चितोपाधिः। न च स्वव्याघातकत्वान्नायमुपाधिः, तद्धि न सर्वानुमानसाधारणम्, अनुकूलतर्कादिनिश्चितव्याप्तिके हेतौ तदभावात्। नापि तद्व्यभिचारेण व्यभिचारानुमानेऽपि पक्षेतरान्तरस्योपाधित्वसम्भवः, अनुकूलतर्कादिना तस्य साध्यव्यापकत्वनिश्चये व्यापकव्यभिचारिणि व्याप्यव्यभिचारावश्यम्भावेन तदयोगात्। अत एव पक्षेतरस्योपाधित्वे सर्वत्रैव तादृशोपाधिसम्भवेनानुमानमात्रविलोपे व्यभिचारानुमापकत्वगर्भस्योपाधित्वस्याव्याघात इति परास्तम्। कथकसम्प्रदायानुरोधाद्बाधानुन्नीतः पक्षेतरो नोपाधित्वेन कथायामुद्भाव्य इति तु वदन्ति।

(गा०) ननु पक्षेतरत्वे व्यापकताग्राहकतर्काभावेन साध्यव्यापकत्वानिश्चयात् न तस्य दूषकत्वमिति मूलोक्तं न सङ्गच्छते, तत्र शुद्धसाध्यव्यापकत्वानिश्चयस्यावच्छिन्नसाध्यव्यापकोपाधिसाधारणतया अदूषकत्वाप्रयोजकत्वात्, किञ्चिद्विशिष्टसाध्यव्यापकतायाः पक्षेतरत्वेऽपि निश्चयसम्भवादित्याशङ्क्य साध्यव्यापकत्वानिश्चयादिति व्याचष्टे। उपाधित्वौपयिकेति। उपाधित्वौपयिकस्य तस्यानिश्चयादित्यर्थः। उपाधित्वौपयिकं च साध्यव्यापकत्वं पूर्वनिरुक्तं यदवच्छिन्नसाधनाव्यापकत्वं तदवच्छिन्नसाध्यव्यापकत्वरूपम्। सद्धेतौ च पक्षेतरत्वे न तन्निश्चयसम्भवः, तदसत्त्वादिति भावः।

ननु तत्र तादृशव्यापकताया असत्त्वेऽपि तर्काभासात् स्वतस्सिद्धव्यभिचाराग्रहाद्वा तन्निश्चयः सम्भवत्येवेत्यत आह। अनुकूलतर्कादिनेति। तादृशेति। उपाधित्वौपयिकेत्यर्थः। बाधोन्नीतवत्। वह्निरनुष्ण इत्यादिस्थलीयवह्नीतरत्वादिवत्। निश्चितोपाधिः। व्यभिचारनिश्चयाधायकतया अनुमानविरोधी। अयम्। बाधानुन्नीत-

पक्षेतरः । नोपाधिः । न दूषकः । हि । यतः । तत् । अदूषकताप्रयोजकं स्वव्याघातकत्वम् । सर्वानुमानसाधारण्यम् । सर्वत्रैवानुमाने पक्षेतरत्वस्य साध्यव्यापकतानिश्चयसम्भवेन दूषकताप्रसक्तिः । स्वपदस्यानुमानसामान्यपरतया ईदृशसर्वानुमानसाधारण्यस्य स्वव्याघातकता । निश्चितव्याप्तिके इति । प्रथमतो हेतौ व्याप्तिनिश्चये सतीत्यर्थः । तदभावात् । पक्षेतरत्वे साध्याव्यापकत्वज्ञानेन प्रतिबन्धात् साध्यव्यापकतानिश्चयासम्भवात् । स्वपदस्य स्वव्यभिचारहेतुकव्यभिचारानुमानार्थकतया अन्यादृशं स्वव्याघातकत्वपदार्थं निराकुरुते । नापीति । तद्व्यभिचारेण । पक्षेतरव्यभिचारेण । उपाधित्वसम्भवः । दूषकताप्रसक्तिः । तस्य । पक्षेतरस्य । व्यापकव्यभिचारिणि । व्यापकतया गृहीतस्य व्यभिचारिणि । व्याप्येति । व्याप्यस्य । व्याप्यतया गृहीतस्य साध्यस्य व्यभिचारावश्यम्भावनिश्चयेनेत्यर्थः । पक्षेतरो यदि साध्यव्यभिचारव्याप्यव्यभिचारप्रतियोगी न स्यात् साध्यव्यापको न स्यात पक्षेतरव्यभिचारो यदि साध्यव्यभिचारव्याप्यो न स्यात् तद्व्यापकव्यभिचारो न स्यात् इति तर्केण पक्षेतरव्यभिचारस्य साध्यव्यभिचारव्याप्यतया निश्चयेनेति यावत् । तदयोगात् । व्यभिचारानुमाने साधनरूपपक्षेतरस्य दूषकत्वायोगात् । स्वं स्वस्योपाधित्वम् तद्व्याघातकत्वमित्यर्थः । दूषयति । अत एवेति । अत एव । पक्षेतरत्वस्य अनुकूलतर्कादिना यत्र साध्यव्यापकताग्रहस्तत्रोक्तयुक्त्या तद्व्यभिचारेण साध्यव्यभिचारसिद्धेरनपवादत्वादेव । पक्षेतरत्वस्य क्वचिद् दूषकत्वसम्भवेऽपि उपाधितया अनुद्भावनं व्यवस्थापयतां मतमाह । कथकेति । अत्र कथकसम्प्रदायमननुरुन्धानस्य तदुद्भावनं दुर्निवारमेवेत्यस्वरसः ।

(चि०) सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तम् । बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति । एवं पर्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वम्, पक्षमात्रव्यावर्तकविशेषणवत्त्वात् । अत एव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वम्, द्रव्यबहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वम्, मित्रातनयश्यामत्वे शाकपाकजत्वम्,

जन्यानित्यत्वे भावत्वमुपाधिः ।

(दी०) पक्षमात्रेति । यद्यपि पर्वतावयवरूपादेरपि व्यावर्त्तकं तत्, तथापि तस्य व्यावृत्तिर्नोपाधितायामुपयुज्यते, अपि तु पक्षस्यैवेति तन्मात्रव्यावर्तकत्वमुक्तम् । इदं चानुपाधितायां न बीजं परिभाषामात्रत्वात्, किन्त्वनुकूलतर्काभावेन तादृशसाध्यव्यापकत्वानिश्चय इति द्रष्टव्यम् । अत एव । व्यापकताग्राहकप्रमाणसम्भवादेव । आर्द्रेन्धनेति ।

(गा०) पर्वतावयववृत्त्यन्यत्वादौ वृत्त्यन्तस्य भेदविशेषणस्य पक्षभिन्नमपि व्यावर्त्यमस्तीति मूलोक्तस्य पक्षमात्रव्यावर्त्तकविशेषणवत्त्वादिति तदनुपाधित्वप्रयोजकहेतोरसङ्गतिमाशङ्कते । यद्यपीति । नोपाधितायामुपयुज्यत इति । उपाधेस्सङ्कोचनं तल्लक्षणप्रविष्टसाधनाव्यापकत्वसम्पादकतयोपयुज्यते, तदव्यापकत्वसम्पादकता च तदधिकरणानुपाधिव्यावृत्तिरेव, न तु तदनधिकरणपर्वतावयवरूपादिव्यावृत्तिरिति भावः । पक्षस्यैवेति । व्यावृत्तिरुपाधितायामुपयुज्यते इत्यनुषज्यते । पक्षस्य साधनवत्त्वादिति भावः । इति । इत्याशयेन । उक्तमिति । मात्रपदेन उपाधित्वौपयिकपक्षभिन्नव्यावृत्तिप्रयोजकताया विशेषणे व्यवच्छेदात् पर्वतभिन्नतदवयवरूपादिव्यावर्त्तकत्वेऽप्युक्तविशेषणे उक्तव्यावृत्तिविशेषणप्रयोजकत्वाभावस्याक्षततया मात्रार्थसङ्गतेरिति भावः । अनुपाधितायाम् । अदूषकतायाम् । न बीजम् । न प्रयोजकम् । परिभाषेति । तादृशविशेषणवत्त्वेऽपि साध्यव्यापकत्वादिग्रहदूषकताया दुर्निवारत्वादिति भावः । द्रष्टव्यम् । अनुपाधित्वबीजतया ।

केचित्तु पक्षमात्रव्यावर्त्तकं विशेषणं यस्य पक्षेतरस्य तत्तथा, तद्वत्त्वात् तत्तुल्यत्वात् । विशेषणवत्त्वादिति । तादृशार्थकवतिप्रत्ययबलान्मूलस्यार्थः । पक्षेतरतुल्यता च व्यापकताग्राहकानुकूलतर्कराहित्येन, तथा च दीधितिकारोक्तदूषकताबीज एव मूलस्य तात्पर्यमिति वदन्ति ।

अत एवेति मूलस्याव्यवहितोक्तपक्षेतरत्वाद्यनुपाधित्वोपष्टम्भपरत्वासम्भवादनुपाधिताप्रयोजकाभावप्रतियोगितया प्रक्रान्तानु-

कूलतर्कसम्भवोपष्टम्भपरतामाह । व्यापकताग्राहकेति । प्रमाणपदं प्रमाणसहकारितत्कारणपरम् ।

(दी०) अथात्र स्वतन्त्रान्वयव्यतिरेकाभ्यामार्द्रेन्धनत्वेनैव कारणत्वम्, न पुनरार्द्रेन्धनप्रभववह्नित्वेनेति चेत् ? किञ्चातः ? न हि कारणतावच्छेदकमेव व्यापकतावच्छेदकम्, तादृशाभावप्रतियोगितानवच्छेदकस्यैव तथात्वात्, तदवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया तद्वद्वृत्तित्वेन साध्यव्यभिचारसाधने वैयर्थ्याभावात् ।

(गा०) कारणतावगमेनेत्यग्रिममूलस्य उपाधितावच्छेदकावच्छिन्नस्य कारणतानिश्चयेनेत्यर्थाभिमानेन आर्द्रेन्धनप्रभववह्नित्वेन धूमकारणतया तेन रूपेण उपाधित्वानुपपत्तिं शङ्कते । अथेति । स्वतन्त्रान्वयव्यतिरेकाभ्यामिति । आर्द्रेन्धनस्य वह्नेश्च पृथगन्वयव्यतिरेकयोर्धूमान्वयव्यतिरेकप्रयोजकत्वदर्शनेनेत्यर्थः । न पुनरिति ।

यद्यपि आर्द्रेन्धनप्रभववह्नित्वेन कारणत्वेऽपि तादृशान्वयव्यतिरेकोपपत्तिः ।

न च तेन रूपेण कारणत्वे आर्द्रेन्धनप्रभववह्निमत्त्वे आर्द्रेन्धनविरहे धूमविरहो नोपपद्यत इति वाच्यम् । कारणतावच्छेदकाविशिष्टस्य प्राक्सत्तायाः प्रकृते कार्योत्पादप्रयोजकत्वोपगमेनाकारणस्याप्यार्द्रेन्धनस्य कारणतावच्छेदकतया तदभावेन धूमाभावोपपत्तेः, तथापि आर्द्रेन्धनप्रभवत्ववह्नित्वयोरप्येकविशिष्टत्वेनापरस्य जनकतावच्छेदकत्वं वाच्यम्, तथा च तयोर्विशेषणविशेष्यभावे विनिगमनाविरह इति प्रत्येकमेव कारणत्वम्, अन्यथा घटादावपि चक्रविशिष्टदण्डत्वादिना हेतुताप्रसङ्गात् ।

न चैवमार्द्रेन्धनस्य शुष्केन्धनमात्रजन्यवह्नेश्च सत्त्वे धूमोत्पत्तिप्रसङ्ग इति वाच्यम् । प्रत्येकरूपेण स्वरूपयोग्यत्वेऽपि आर्द्रेन्धनवह्न्योर्जन्यजनकभावरूपप्रत्यासत्तेः फलोपधाने तन्त्रतया आर्द्रेन्धनप्रभववह्नित्वस्य धूमोपधायकतावच्छेदकत्वात् । अत एव दण्डत्वचक्रत्वादिना पृथग्घटादिस्वरूपयोग्यत्वेऽपि चक्रादिविशिष्टदण्डत्वं घटाद्युपधायकतावच्छेदकम् ।

अथ कारणतावच्छेदकसम्बन्धेनैकक्षणावच्छिन्नसामानाधिकरण्यमेव कार्योपधाने प्रयोजकम्, न तु जन्यजनकभावादिरूपप्रत्यासत्तिः, अव्यापकत्वात्, यत्तु कृतिसाध्यताज्ञानेष्टसाधनताज्ञानयोः पृथक्पृथक्प्रवृत्तिहेतुत्वेऽपि तयोरभेदस्य कार्योपधानप्रयोजकतया कृतिसाध्यताविषयकेष्टसाधनताज्ञानत्वं फलोपधानरूपकारणताया-मवच्छेदकमिति विधिवादे मिश्राणां मणिकारतात्पर्यवर्णनं तदपि इच्छातद्विषयफलसाधनताज्ञानकृतिसाध्यताज्ञानानां त्रयाणां युगपदवस्थानासम्भवेनैकक्षणावच्छिन्नसामानाधिकरण्यापेक्षायामेव ज्ञानयोरभेदापेक्षापर्यवसानमित्यभिप्रायेण सङ्गच्छते, अन्यथा कारणयोः क्वचिदभेदरूपायाः क्वचिज्जन्यजनकभावरूपायाः प्रत्यासत्तेः फलोपधानप्रयोजकतामभ्युपेत्यातिप्रसङ्गवारणे कृतिसाध्यताविषयकनिश्चयत्वादिना प्रवृत्त्यादिहेतुत्वे तद्विषयकत्वसंशयान्यत्वज्ञानत्वादीनां विशेषणविशेष्यभावे विनिगमनाविरहेण तेन रूपेण पृथगेव कारणता, तत्तत्कारणतावच्छेदकावच्छिन्नानामभेदः कार्योपधाने प्रयोजक इत्यपि स्यात्। एवं च दण्डचक्रसंयोगादेः कारणप्रत्यासत्तिविधया न घटाद्युपधाने अपेक्षा, अपि तु स्वतन्त्रान्वयव्यतिरेकेण तस्यापि घटादिकं प्रति कारणता, इति चेत्? सत्यम्, इन्धनारम्भकपरमाणुषु वह्निनोदनाख्यसंयोगात्तेषां क्रिया, ततो विभागः, ततो द्व्यणुकारम्भकसंयोगनाशः, तन्नाशाद् द्व्यणुकनाशः, ततः पाकजविलक्षणरूपवद्भिः परमाणुभिः धूमद्व्यणुकाद्युत्पत्त्या त्रसरेण्वादिक्रमेण महाधूम उत्पद्यते, सामानाधिकरण्यप्रत्यासत्त्या धूमहेतुरूपविशेषस्याग्निसंयोगेन जनने च परमाणूनां जलसंयोगरूपमार्द्रत्वं सहकारि, अम्लद्रव्यसंयोग इव दधिहेतुभूतरसविशेषस्य दुग्धारम्भकपरमाणुषु तेजस्संयोगेन जनने, एवं च वह्नित्वादिना कारणत्वे वह्न्यार्द्रेन्धनयोरुभयोस्सत्त्वे आर्द्रेन्धनदाहं विना धूमोत्पत्तेर्नावकाशः, द्रव्यान्तरारम्भरहितानां रूपविशेषविशिष्टपरमाणूनामभावादिति किमार्द्रेन्धनप्रभववह्नित्वेन कारणतयेति।

न चैवं वह्नित्वादिनापि कारणत्वमनर्थकम्, पूर्वद्रव्यविनाशरूपविशेषोपपादकस्य वह्नेस्तेनैवान्यथासिद्धत्वात्, स्वनाशेन इन्धनस्यापि तथात्वात्, अन्यथाऽन्यत्रापि स्वनाशद्वारा प्रतिबन्धकस्य हेतुताप्रसङ्गादिति वाच्यम्। वह्निना इन्धनं विनाश्य परमाणुषु रूप-

विशेषे जनितेऽपि वह्नीन्धनयोरसत्त्वे धूमानुत्पादेन तद्धेतुताया आवश्यकत्वात् ।

न च रूपविशेषमुत्पाद्य विनष्टे वह्नौ परमाण्वादावारम्भकसंयोगानुकूलक्रियानुत्पादान्न धूमोत्पत्तिः, तादृशक्रियामुत्पाद्य वह्नौ विनष्टे च तादृशक्रियारम्भकसंयोगजनने जायत एव त्रिचतुरादिक्षणमध्ये धूमः, वह्न्यवयवेषु संयुक्तेषु कारणान्तरविरहात् कार्यद्रव्यं नोत्पद्यते, अवयवसंयोगानां चरमकारणत्वादिति वाच्यम् । एवं सत्यवयवसंयोगसम्पादकत्वात्तद्धेतुत्वस्याप्रत्याख्येयत्वात्, अन्यथा घटपटादावपि दण्डवेमादेरन्यथासिद्ध्या अहेतुतापत्तेः ।

न चैवं वह्नेर्हेतुत्वेऽपि इन्धनस्य हेतुत्वमप्रामाणिकमिति वाच्यम् । इन्धनासत्त्वे वह्नेरनवस्थानेन तदवस्थापनद्वारा तस्यापि हेतुताया आवश्यकत्वात् । जलसंयोगरूपमार्द्रत्वं रूपविशेषद्वारा पृथगेव हेतुः । न हीन्धनकारणतायां तस्यावच्छेदकत्वम् । आर्द्रेन्धनत्वादिनैव कारणत्वमित्यस्याप्यत्रैव तात्पर्यम् ।

यत्तु आर्द्रेन्धनप्रभववह्नेर्जातिविशेषपुरस्कारेण हेतुता, न तु तादृशवह्नित्वेनेति नोक्तविनिगमनाविरह इति तदपि न सत् । प्रामाणिकवह्नित्वजात्या कारणत्वेऽप्युक्तदिशाऽतिप्रसङ्गवारणसम्भवेनावान्तरजातौ मानाभावादित्यलमधिकेन ।

कारणतावगमेन इति मूलस्य आर्द्रेन्धनप्रभववह्नित्वादिरूपोपपाधितावच्छेदकाभिमतरूपेण कारणतानिश्चयेनेति नार्थः, परन्तु यादृशयादृशकार्यकारणभावादिना तत्तद्रूपावच्छिन्नस्य फलोत्पत्तिप्रयोजकत्वं तादृशकार्यकारणभावपरमेव तदित्याशयेन समाधत्ते । किञ्चात इति ।

नन्वेवमार्द्रेन्धनप्रभववह्नित्वं यदि धूमव्यापकतावच्छेदकं न स्यात् तदा तत्कारणतावच्छेदकं न स्यादिति व्यापकताग्राहकतर्कस्येष्टापत्त्या नावतार इति कथं तद्ग्रहसम्भवतीत्यत आह । न हीति । यतः स्वरूपयोग्यतावच्छेदकत्वमात्रं व्यापकतावच्छेदकत्वनिर्वाह्यमिति न, येन आर्द्रेन्धनप्रभववह्नित्वादेरन्यथासिद्धिनिरूपकत्वेन स्वरूपयोग्यतानवच्छेदकत्वस्येष्टतया तदापत्तेरसम्भवेनैव व्यापकतावच्छेदकत्वग्रहो न स्यात्, अपि तु फलोत्पत्तिप्रयोजकतावच्छेदकत्वमपि तन्निर्वाह्यम्, तदभावापत्त्यैव व्यापकतावच्छेदकत्वं

सुग्रहमित्यर्थः । यादृशान्यथासिद्धया आर्द्रेन्धनप्रभववह्नित्वादिकं न स्वरूपयोग्यतावच्छेदकं तादृशी यदि व्यापकतावच्छेदकत्वमपि विघटयेत्तदा तद्रूपसाधारणं धूमाद्युत्पत्तिसामान्यप्रयोजकतावच्छेदकत्वं व्यापकतावच्छेदकत्वनियतं न स्यादिति तदभावस्तदभावं न प्रसञ्जयेत्, तदेव न, कारणतावच्छेदकत्वे इव व्यापकतावच्छेदकत्वे ऽनन्यथासिद्धत्वप्रवेशस्याभावादित्याह । तादृशेति । तथात्वात् । व्यापकतावच्छेदकत्वात् ।

ननु तथापि आर्द्रेन्धनप्रभववह्नित्वादिना वह्न्यादेर्नोपाधितासम्भवः, वह्नित्वाद्यवच्छिन्नव्यभिचारस्यैव धूमादिव्यभिचारव्याप्यतया आर्द्रेन्धनप्रभवत्वादिविशेषणस्यासिद्धिमात्रवारकतया वैयर्थ्येन तद्घटितरूपावच्छिन्नव्यभिचारस्य साध्यव्यभिचारासाधकत्वादित्यत आह । तदवच्छिन्नाभावस्य चेति । विशिष्टवह्नित्वाद्यवच्छिन्नाभावस्येत्यर्थः । अतिरिक्ततया शुद्धवह्नित्वाद्यवच्छिन्नाभावभिन्नतया । तद्वद्वृत्तित्वेन । शुद्धवह्नित्वावच्छिन्नाभावाघटितेन विशिष्टवह्नित्वावच्छिन्नव्यभिचारेण ।

(दी०) सत्यपि चाऽऽर्द्रेन्धने तत्संयुक्ते च वह्नौ दाहप्रतिबन्धकसत्त्वे धूमानुत्पादात् क्लृप्तकारणभावस्य वह्नेर्विशेषरूपेण कारणत्वकल्पनयैवोपपत्तावक्लृप्ततत्कारणभावानां दाहप्रतिबन्धकाभावानां तत्कारणत्वकल्पनानौचित्यात् । एकस्यामार्द्रेन्धनव्यक्तौ प्रतिबद्धायां तत्रैव व्यक्त्यन्तराद्धूमोत्पादात् तत्तदिन्धनजन्यधूमं प्रति तत्तदभावानां कारणत्वस्य वाच्यत्वेऽतिगौरवाच्च । महति चाऽऽर्द्रेन्धने तत्प्रभवे चाणीयसि वह्नौ महति वह्न्यन्तरे विद्यमानेऽप्यार्द्रेन्धनप्रभवमहावह्नेरनुत्पाददशायां प्रकृष्टधूमानुत्पादादार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमित्यपि वदन्ति ।

(गा०) आर्द्रेन्धनप्रभववह्नित्वेनापि धूमस्वरूपयोग्यत्वं व्यवस्थापयतां मतमाह । सत्यपि चेत्यादिना वदन्तीत्यन्तेन । धूमानुत्पादादित्यादिकं आर्द्रेन्धनप्रभववह्नित्वेन कारणमित्यग्रिमे हेतुः । आर्द्रेन्धने वह्नेरसंयोगस्थले पृथक्कारणतामतेऽपि धूमानुत्पादो निर्वहति, कार-

णानां कारणतावच्छेदकसम्बन्धघटितसामानाधिकरण्यातिरिक्तप-
रस्परप्रत्यासत्तेः कार्योत्पत्तावनपेक्षितत्वेऽपि संयोगविशेषसम्बन्धेन
धूमं प्रति तादात्म्यसम्बन्धेनाऽऽर्द्रेन्धनस्य संयोगसम्बन्धेन च वह्नेः
कारणत्वे आर्द्रेन्धनतादात्म्यवति वह्निसंयोगस्य धूमोत्पत्तावपेक्षा-
सम्भवात्, अत उक्तं तत्संयुक्ते च वह्नाविति । आर्द्रेन्धने वह्निसं-
योगे सति तस्यापि दाहसम्भवेन धूमोत्पत्तिरिष्टैवेत्यत आह । दाह-
प्रतिबन्धकसत्त्वे इति । एतदुपलक्षणम्, दाहप्रतिबन्धकासत्त्वेऽपि
दाहोत्तरमेव धूमोत्पादात् तत्पूर्वं धूमोत्पत्त्यापत्तिरपि पृथक्कारणता-
मते द्रष्टव्या । दाहप्रतिबन्धकसत्त्वे धूमोत्पत्तिस्तदभावस्य धूमका-
रणताकल्पनेनापि शक्यते वारयितुमित्याशङ्कां निराकरोति । क्लृप्ते-
त्यादिना । क्लृप्तकारणभावस्य । अवश्यकल्पनीयकारणताकस्येत्य-
र्थः । विशेषरूपेण । आर्द्रेन्धनप्रभववह्नित्वेन । अक्लृप्तेति । उभया-
सिद्धेत्यर्थः । दाहप्रतिबन्धकाभावानाम् । मणिमन्त्रादिविशेषाद्य-
भावादीनाम् । तत्कारणत्वेति । धूमकारणत्वेत्यर्थः । अनौचित्यं
कारणताबाहुल्येन । मणिविशेषादीनामपि धूमसामान्यं प्रति
नैकप्रतिबन्धकतया निर्वाह इति दर्शयति । एकस्यामिति ।
प्रतिरुद्धायाम् । दाहप्रतिबन्धकमण्यादिसमवहितायां सत्याम् ।
तत्रैव । तदिन्धनव्यक्तावेव । व्यक्त्यन्तरात् । सन्निहिता-
र्द्रेन्धनान्तरात् । तत्तदभावानाम् तत्तादिन्धनप्रत्यासन्नमण्याद्यभा-
वानाम् । कारणत्वस्येति । एतदुपलक्षणम्, यद्व्यक्तिजन्यधूमोऽ
प्रसिद्धः तज्जन्ये धूमे प्रतिबन्धकाभावकारणत्वस्य दुष्कल्पतयाऽस-
ति प्रतिबन्धके वह्न्यादिघटितसामान्यसामग्रीबलात् तत्र धूमोत्प-
त्तिवारणाय तत्तादिन्धनानां विशेषसामग्रीत्वस्य कल्पनीयतयेत्यपि
द्रष्टव्यम् । आर्द्रेन्धनदाहस्य धूमकारणतयाऽप्युक्तापत्तिवारणसम्भ-
वः, एवमिन्धनस्यादाहे तदारम्भकाणुषु द्रव्यान्तरावष्टम्भरूपप्रति-
बन्धकसत्त्वेन धूमोत्पत्तिप्रयोजकरूपविशेषाभावेन च न धूमोत्पत्ति-
रित्यनुशयानः प्रकृष्टापकृष्टधूमयोग्यप्रकृष्टापकृष्टार्द्रेन्धनप्रभववह्न्यन्व-
यव्यतिरेकानुविधायितया तादृशतादृशधूमं प्रति तादृशतादृशवह्नि-
विशेषरूपेण हेतुताया आवश्यकतया यद्विशेषयोरिति न्यायेन
धूमसामान्यं प्रत्यार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमावश्यकमित्याह ।
महति चेति । आर्द्रेन्धनस्य वह्निसामान्यस्य च प्रकर्षो न धूमप्रकर्ष-

प्रयोजक इत्याविष्कर्तुम्महार्द्रेन्धनमहावह्न्यन्तरयोरसत्त्वानुधावनम्। आर्द्रेन्धनवह्न्योः पृथक्कारणत्वेऽपि तयोर्जन्यजनकभावप्रत्यासत्त्या धूमोत्पत्तावपेक्षितत्वेन आर्द्रेन्धनप्रभववह्निं विना धूमोत्पत्त्यापत्तेः कथञ्चिद्वारणसम्भव इत्यतोऽणीयसि तत्प्रभवे वह्नावित्युक्तम्।

वदन्तीत्यस्वरससूचनाय, तद्बीजं च धूमनिष्ठप्रकर्षो महत्त्वविशेषः, रूपविशेषवदारम्भकसंयोगवदवयवभूयस्त्वघटितसत्सामग्रीवशादेव धूमस्य तद्रूपत्वनिर्वाहेण तस्य न धूमजनकतावच्छेदकत्वम्, अन्यथा नीलघटत्वादेरपि नीलकपालजन्यतावच्छेदकतापातात्, भूयसां परमाणूनां पाकजरूपविशेषे धूमारम्भानुगुणसंयोगविशेषे च व्यापकवह्नेरपेक्षया तदन्वयव्यतिरेके महाधूमान्वयव्यतिरेक इति।

(चि०) तदुत्कर्षेण साध्योत्कर्षात्। अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात्कारणतावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात्।

(दी०) तदुत्कर्षेणेति। आर्द्रेन्धनप्रभववह्निसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवह्निं विना प्रकृष्टधूमस्यानुत्पादनियमादार्द्रेन्धनप्रभववह्नेरेव धूमोपधायकत्वम्, तत्रार्द्रेन्धनप्रभववह्नित्वं कारणतावच्छेदकमथर्वशसम्पन्नं नान्तरीयकमेवास्तु, फलतो न कश्चिद्विशेष इति भावः। अनन्यथेति। तादृशान्वयव्यतिरेकाभ्यामुद्भूतरूपस्य तद्वतो द्रव्यस्यैव वा कारणत्वम्, उभयथापि व्यापकत्वम्, उद्भूतरूपत्वेन तत्त्वं पुनरुपवर्णितमेव। घटोन्मज्जनेति। ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्वानियमात्। न च प्रागभावस्य ध्वंसप्रतियोगिध्वंस इव तद्ध्वंसोऽपि प्रतियोगिनो ध्वंस इति वाच्यम्। अप्रामाणिकध्वंसतत्कारणधाराकल्पनातो ध्वंसानन्तत्वकल्पनाया एवोचितत्वादिति भावः।

(गा०) पूर्वोक्तमाशयं प्रकाशयन् तदुत्कर्षेणेत्यादिमूलं धूमत्वावच्छिन्नं प्रत्यार्द्रेन्धनप्रभववह्नित्वादिना अकारणत्वेऽपि सङ्गमयति।

तदुत्कर्षेणेतीति । अर्थवशसम्पन्नं नान्तरीयकमिति । तेन रूपेणाहे-
तुत्वेऽपि प्रत्येककारणतानिर्वाह्यव्यापकतावच्छेदकताकमित्यर्थः । वा-
य्वादेः प्रत्यक्षवारणाय उद्भूतरूपस्यापि प्रत्यक्षे हेतुतां प्राञ्चो न
स्वीकुर्वन्ति अपि तु विषयनिष्ठतद्धेतुतायामवच्छेदकत्वमेव तस्ये-
ति तथाऽपि न प्रकृतक्षतिरित्याह । अनन्यथेतीति । अनन्यथासि-
द्धत्वं च कारणत्वं तदवच्छेदकत्वं च विनाऽनुपपद्यमानत्वम् । अन्व-
यव्यतिरेकाभ्याम् । उद्भूतरूपान्वयव्यतिरेकाधीनप्रत्यक्षविशेषा-
न्वयव्यतिरेकाभ्याम् । उद्भूतरूपस्य समवायेन तद्वतो द्रव्यस्यैव वा
तादात्म्येन कारणत्वम् । तत्त्वं पुनरिति । विषयस्य सामान्यतः प्र-
त्यक्षे विषयत्वेन तद्व्यक्तिप्रत्यक्षे तद्व्यक्तित्वेन हेतुता, बहिर्द्रव्यादिप्र-
त्यक्षे च बहिर्द्रव्यादिरूपविषयस्य कारणत्वान्तरं निष्प्रमाणमेव,
कुत उद्भूतरूपस्यावच्छेदकत्वम् ।

न च वाय्वादेः प्रत्यक्षवारणान्यथानुपपत्तिरेव बहिर्द्रव्यप्रत्यक्षे
उद्भूतरूपवत्त्वेन विषयहेतुतायां प्रमाणमिति वाच्यम् । उद्भूत-
रूपत्वेन लघुना हेतुतयैव तद्वारणसम्भवेन अन्यथानुपपत्त्यनव-
काशात् ।

वस्तुत उद्भूतरूपत्वेनापि न हेतुता, उद्भूतत्वस्य दुर्वचत्वात् ।
न च तद्रूपत्वव्याप्यजातिविशेषः, नीलत्वादिजात्या सङ्करात् ।
न च नीलत्वादिव्याप्यं नानैवोद्भूतत्वम्, कारणतावच्छेदकाननु-
गमेन व्यभिचारात् ।

न च नीलादिप्रत्यक्षत्वं नीलत्वादिव्याप्योद्भूतत्वाद्यवच्छिन्नज-
न्यतावच्छेदकमिति न व्यभिचारः, नीलादिरूपस्य विषयोपलक्षणत्वे
न्यायमते पाकरक्तघटादिप्रत्यक्षे व्यभिचारात्, तद्विशेषणत्वे निर्विक-
ल्पकासङ्ग्रहात्, स्वविषयनीलादिमत्त्वविशिष्टविषयतासम्बन्धेन शु-
द्धप्रत्यक्षत्वावच्छिन्नस्य नीलादिजन्यतेत्युक्त्या निर्विकल्पकसङ्ग्रहेऽपि
नीलाद्यभिभवकालीनतदाश्रयप्रत्यक्षस्य दुस्सङ्ग्रहत्वात्, नापि लौकि-
कप्रत्यक्षविषयत्वमुद्भूतत्वम्, गुणादेः लौकिकप्रत्यक्षविषयतायां
सन्निकृष्टाश्रयनिष्ठलौकिकप्रत्यक्षविषयतायाः प्रयोजकत्वादन्योन्याश्र-
येणाश्रयप्रत्यक्षतायां तस्याः प्रयोजकत्वासम्भवात् ।

अनुद्भूतत्वं जातिः नीलत्वादिव्याप्या नानैव, तदवच्छिन्नभेद-
कूट एवोद्भूतत्वमिति चेत् ? तर्हि तेन रूपेण रूपस्य हेतुत्वे ताव-

च्छेदानां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणतया बाहुल्यस्य अवच्छेदकगौरवस्य च प्रसङ्गाद्रूपत्वेन तत्त्वावच्छिन्नस्य अनुद्भूतत्वावच्छिन्नात्यन्ताभावत्वेन च पृथक्कारणत्वकल्पनमेवोचितम्, तावता उद्भूतरूपत्वावच्छिन्नस्य बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नव्यापकत्वमव्याहतमेव।

यदि च अनुद्भूतत्वं शुक्लत्वव्याप्यं भास्वरत्वविरुद्धमेव, रसनेन्द्रियादिरूपस्य शुक्लतया घ्राणेन्द्रियादावपि शुक्लरूपस्यैव कल्पनादित्युच्यते, तदा तदवच्छिन्नाभावस्य पृथक्कारणत्वमेवोचितम्। अन्यथा तदवच्छिन्नभेदरूपत्वयोर्विशेष्यविशेषणभावे विशेष्यविशेषणतावच्छेदकभावे वा विनिगमनाविरहेण कारणताद्वयस्याऽऽवश्यकत्वात्, अवच्छेदकगौरवाधिक्यादित्यादिकमुपवर्णितप्रायमित्यर्थः।

उच्छृङ्खलास्तु पृथिव्यादित्रयनिष्ठजातिविशेष एव बहिर्द्रव्यप्रत्यक्षजनकतावच्छेदकतया स्वीक्रियते, तदभावादेव न वाय्वादीनां प्रत्यक्षता।

न च तादृशजातेः पृथिवीत्वादिना सङ्करभयेन घ्राणेन्द्रियादाववर्ज्योपेयतया तत्प्रत्यक्षवारणायानुद्भूतरूपप्रतिबन्धकतया आवश्यकत्वेन रूपत्वेन हेतुतयैव नीरूपप्रत्यक्षवारणसम्भवे किमुक्तजात्येति वाच्यम्। रूपत्वेन हेतुत्वे नानाजातीयरूपवदारब्धद्रव्ये अतिरिक्तचित्ररूपस्य नीलपीतादीनां वा कल्पनीयतया गौरवात्। एतन्मते तत्र विजातीयसंवलनप्रतिबन्धेन रूपानुत्पादस्यैवोपगमात्।

अथ वा उद्भूतत्ववदेकत्वमेव प्रत्यक्षजनकम्, तद्गतमुद्भूतत्वं चैकैव जातिः, सङ्करानवकाशात्। घ्राणेन्द्रियाद्येकत्वव्यावृत्तैव सा जातिः, अतो न तत्प्रत्यक्षता। न च प्रभायाश्चाक्षुषानुरोधेन तदेकत्वे तादृशजातेरावश्यकतया तस्य स्पार्शनापत्तिरिति वाच्यम्। स्पार्शनप्रत्यक्षेऽनुद्भूतस्पर्शविशेषस्य प्रतिबन्धकतां स्वीकृत्य तस्य वारणीयत्वात्। अस्तु वा स्पार्शनप्रत्यक्षप्रयोजकमपि प्रभैकत्वव्यावृत्तं चाक्षुषप्रयोजकजातिव्याप्यं जात्यन्तरम्, न्यायादिमते वायोरिवोष्मणोऽप्यतीन्द्रियतया तदेकत्वे स्पार्शनप्रयोजकजातेरप्यनभ्युपगमेन तद्व्याप्यतानिर्वाहादित्याहुः।

मूले वैद्यकादिति। वैद्यकशास्त्रतः शाकाद्याहारपरिणामजन्यत्वस्य नरश्यामरूपप्रयोजकत्वावगमेनेत्यर्थः। जाठरानलेनाभ्यवहृ-

तशाकाद्यारम्भकेष्ववयवेषु शरीरगतश्यामरूपसजातीयं रूपमुत्पाद्यते, तैश्चावयवैरदृष्टविशेषप्रेरिताभ्यन्तरसमीरणसञ्चारितैर्गर्भाशयं प्रविश्य परस्परसंयुक्तैश्शरीरमारभ्यत इति तत्रावयवश्यामरूपात्तज्जातीयं रूपमुत्पद्यते, तत्र शरीरगतशाकपाकजत्वस्य शाकपाकजत्वेन शरीरस्य वा हेतुतया निष्प्रमाणकत्वेऽपि जाठरानलपाकाधीनरूपविशेषशाकाद्यवयवस्य वा तन्निष्ठविजातीयाग्निसंयोगस्य वा हेतुतयाऽपि शाकेतरभुक्तद्रव्ये तादृशरूपस्य जाठरानलेन जनयितुमशक्यत्वाच्छाकावयवजन्यत्वस्य मित्रातनयशरीरे श्यामविशेषोत्पादप्रयोजकतया वैद्यकबोधितया आवश्यकत्वेन तदनुपपत्त्या तस्य मित्रातनयश्यामत्वव्यापकतानिश्चयो निर्वहत्येवेति बोध्यम् । घटोन्मज्जनेति । तद्घटोत्तरकाले तद्घटसत्त्वापत्त्येत्यर्थः । आपत्तिश्च जन्यत्वविशिष्टं विनाशित्वं यद्यत्यन्ताभावाद्यवृत्तित्वे सति भावत्वव्यभिचारि स्यात् ध्वंसवृत्ति स्यात् ध्वंसत्ववदित्याकारा भावत्वोपाधौ विशिष्टसाध्यव्यापकतां ग्राहयति, विशेषणवत्त्वेन निश्चिते पक्षे विशिष्टापादकतर्कस्य विशेष्यशङ्कानिवर्तकत्वात् जन्यत्वविशिष्टे विनाशित्वे अत्यन्ताभावाद्यवृत्तित्वविशेषणस्य निश्चयादुक्ततर्के सति जन्यत्वविशिष्टे विनाशित्वे भावत्वव्यभिचारशङ्कानिवृत्तेः, तादृशापत्तिपरिपन्थिन्या विनाशित्वे ध्वंसवृत्तित्वस्येष्टापत्तिशङ्काया निवृत्त्यर्थमेव तर्कः घटादिध्वंसो यदि किञ्चित्कालवृत्तिध्वंसप्रतियोगी स्यात् स्वानधिकरणतत्कालः स्यात्, तद्घटप्रागभावानधिकरणतया निश्चितस्य कालस्य तद्घटध्वंसानधिकरणत्वे इष्टापत्तिशङ्कायां च स कालस्तद्घटप्रागभावानधिकरणत्वे सति यदि तद्घटध्वंसानधिकरणकालः स्यात् तद्घटाधिकरणं स्यादिति घटोन्मज्जनप्रसङ्गो विरोधिपरम्परया साध्यव्यापकताया ग्राहकः ।

उक्ततर्के मूलशैथिल्यशङ्कानिरासाय सामान्यतो व्याप्तिं घटयति दीधितौ । ध्वंसेति । तदीयकादाचित्काभावानधिकरणकालत्वस्य तदधिकरणत्वव्याप्यत्वादित्यर्थः । तदधिकरणत्वं कालिकसम्बन्धेन, अतो विश्वविषयकज्ञानध्वंसस्य ध्वंसाधिकरणत्वेनाभ्युपगते काले विषयतया तज्ज्ञानवति तज्ज्ञानोन्मज्जनप्रसङ्गे नेष्टापत्त्यवसरः । गगनादौ व्यभिचारवारणायाऽऽपादके कालत्वप्रवेशः । यत्र काले यद्घटध्वंसादिध्वंसो येनाभ्युपेयते तेनापि तत्र काले तद्घटध्वं-

सानधिकरणत्वं नोपगम्यते इति कथमुक्तापत्तिः, विपर्ययानुमाने सिद्धसाधनादिति शङ्कते । न चेत्यादिना । प्रागभावस्य प्रतियोगिध्वंस इवेति । यथा प्रागभावप्रतियोगिनो घटादेर्ध्वंसोऽपि तत्प्रागभावप्रतियोगिकः स्वीक्रियते इत्यर्थः । अन्यथा प्रतियोगिध्वंसकाले प्रागभावोन्मज्जनप्रसङ्गात्, प्रागभावप्रागभावाप्रसिद्ध्या तत्प्रागभावानधिकरणत्वगर्भापादकाप्रसिद्धावपि कादाचित्काभावत्वेनोभयसङ्ग्राहकापादकप्रसिद्धिसौलभ्यादिति भावः । तद्ध्वंसोऽपि । प्रतियोगिध्वंसध्वंसोऽपि । प्रतियोगिनो ध्वंसः । प्रतियोगप्रतियोगिकः । उपेयत इति शेषः । तथा च तद्ध्वंसध्वंसाधिकरणकालस्यापि तत्प्रतियोगिकध्वंसाधिकरणत्वमेवेति भावः । एवं कल्पनया घटोन्मज्जनप्रसङ्गोद्धारेऽपि लाघवेन ध्वंसस्याविनाशित्वसिद्ध्या भावत्वस्य जन्यानित्यत्वव्यापकत्वं सुघटमेवेत्याह । अप्रामाणिकेति । ध्वंसतत्कारणधाराकल्पनात इति । ध्वंसप्रतियोगिकध्वंसपरम्परायास्तद्ध्वंसे तत्तत्प्रतियोगिपरम्परायाः प्रतियोगितानियामककारणतानां च कल्पनामपेक्ष्येत्यर्थः । अन्यत्वम् । अविनाशित्वम् । उचितत्वादिति । लाघवेनेत्यादिः ।

अथ विनाशं प्रति जन्यभावत्वेन एककारणत्वस्य जन्यत्वेन भावत्वेन कारणताद्वयस्य च कल्पनातो लाघवात् जन्यत्वमात्रेण प्रतियोगिनां कारणत्वकल्पनेन तदवच्छिन्नमात्रस्य च लाघवात् ध्वंसप्रतियोगितानियामकत्वसिद्धौ ध्वंसेऽपि तादृशसामग्र्याः प्रामाणिकत्वात् ध्वंसप्रतियोगिकध्वंसधारायाः प्रामाणिकत्वमेवेत्यप्रामाणिकेत्यसङ्गतम् ।

अत्र वदन्ति प्रागभावप्रतियोगित्वरूपजन्यत्वापेक्षया लघीयसा जातिरूपसत्त्वेनैव प्रतियोगितासम्बन्धेन ध्वंसं प्रति तादात्म्यसम्बन्धेन हेतुता कल्प्यते, तदवच्छिन्नघटिता च सामग्री न ध्वंसे, कालिकसम्बन्धेन सत्वं कारणतावच्छेदकं समवायेन वेत्यत्र विनिगमनाविरहेऽपि समवायेन तदवच्छिन्नहेतुताया निष्प्रत्यूहतया ध्वंसे सामग्रीविरहस्य सूपपादत्वात् ।

न च समवायसम्बन्धेन सत्त्वावच्छिन्नस्य हेतुत्वे नित्यानां द्रव्यगुणानां नाशः स्यादिति कालिकसम्बन्धेन सत्तावत्वेन जन्यमात्रस्य कालोपाधित्वाभावे च प्रागभावप्रतियोगित्वेन हेतुता वाच्येति ध्वंसेऽपि तत्सत्त्वेन तस्यापि नाशो भवेदिति

वाच्यम् । प्रतियोगिमात्रस्य प्रतियोगितासम्बन्धेन कार्योत्पादक-सामग्रीत्वेन जन्यत्वेन प्रतियोगिनो हेतुत्वेऽपि द्वितीये तृतीये वा क्षणे घटादेर्नाशः स्यादिति द्रव्यादिनाशे विशेषसामग्र्यन्तरस्या-ऽऽवश्यकतया तदभावादेव नित्यद्रव्यादीनां नाशवारणसम्भवे समवायेन सत्ताया अपि प्रतियोगिनिष्ठकारणतावच्छेदकत्वसम्भ-वात् तथा हि आश्रयनाशानाश्यद्रव्यस्य नाशे ऽसमवायिकारणवि-जातीयसंयोगनाशो विशेषसामग्री, आश्रयनाशजन्यद्रव्यनाशे व्य-भिचारवारणाय आश्रयनाशानाश्यत्वं कार्यतावच्छेदके नाशप्र-तियोगिविशेषणम्, आश्रयनाशानाश्यत्वं च स्वप्रतियोगिसमवेत-त्वकालिकविशेषणत्वोभयसम्बन्धेन नाशविशिष्टान्यत्वम्, शिरो-मणिमते द्रव्यनाशत्वमेव कार्यतावच्छेदकम्, तन्मते सर्वत्रासम-वायिकारणनाशादेव द्रव्यनाशात्, कारणतावच्छेदकप्रत्यासत्तिः स्वप्रतियोगिजन्यत्वम्, तेन च सम्बन्धेनासमवायिकारणनाशस्य गगनादौ अभावान्न तन्नाशापत्तिः, आश्रयनाशकालस्थायिगुणक-र्मणोर्विनाशे च आश्रयनाशो हेतुः, विभागसंयोगादिजन्ये संयोग-विभागकर्मादिनाशे व्यभिचारवारणाय आश्रयनाशकालस्थायित्वं कार्यतावच्छेदककोटौ प्रतियोगिविशेषणम्, तदर्थश्च स्वप्रतियो-गिसमवेतत्वकालिकविशेषणत्वोभयसम्बन्धेन नाशविशिष्टत्वम्, आश्रयनाशस्य नाशत्वेनैव हेतुता, स्वप्रतियोगिसमवेतत्वं प्रत्या-सत्तिः, तादृशसम्बन्धेन नाशश्च न नित्यगुणे, तदाश्रयस्यापि नि-त्यत्वेन नाशाप्रतियोगित्वात्, आश्रयनाशानाश्यरूपरसगन्धस्पर्श-नाशे विजातीयतेजस्संयोगरूपः पाको हेतुः, कारणतावच्छेदकस-म्बन्धः सामानाधिकरण्यम्, तेन सम्बन्धेन तस्य पार्थिवपरमाण्वे-कत्वादिषु सत्त्वेऽपि रूपादिनाशे तादात्म्यसम्बन्धेन रूपत्वादिनापि हेतुत्वात्तेन सम्बन्धेन तेषामेकत्वादिष्वसत्त्वान्न पाकघटितसामग्री-बलात्तद्विनाशापत्तिः रूपाद्यात्मकप्रतियोगिनां पाकसहकारित्वानु-पगमे जन्यत्वेन प्रतियोगिनां हेतुत्वेऽपि पाकाद्रूपादिनाशसमये त-त्समानाधिकरणविभागादिरूपजन्यगुणानां विनाशप्रसङ्गात्, आश्र-यनाशानाश्यसंयोगादिनाशे स्वावच्छेदकावच्छिन्नत्वस्वव्यापक-त्वोभयसम्बन्धेन विभागो हेतुः, तादृशसम्बन्धेन विभागो न नित्यगुणे न वा तत्र तत्सहकारिसंयोगरूपप्रतियोगी तादा-

त्म्यसम्बन्धेन प्रत्यासन्नः, एवं विभागनाशे स्वजनकसंयोगनाशजनकत्वसम्बन्धेन संयोगो हेतुः, कर्मनाशेऽपि जनकत्वसम्बन्धेन संयोगो हेतुः पूर्वसंयोगनाशोत्तरसंयोगजनकत्वस्येश्वरज्ञानादिसाधारण्यवत् तदाश्रयजन्यद्रव्यसाधारण्यात् तदुत्तरसंयोगात्तन्नाशवारणाय तत्रापि विभागकर्मरूपप्रतियोगिनोस्सहकारितया आवश्यकत्वात्तत एवेश्वरज्ञानादिव्यावृत्तिः। अपेक्षाबुद्धिजन्यगुणनाशे अपेक्षाबुद्धिनाशः स्वप्रतियोगिजन्यत्वसम्बन्धेन हेतुः, नित्ये तेन सम्बन्धेन नाशासत्त्वान्नातिप्रसङ्गः, शब्दज्ञानादिरूपयोग्यविभुविशेषगुणनाशे स्वपूर्वत्वस्वसामानाधिकरण्योभयसम्बन्धेन विशेषगुणत्वेन हेतुता, स्वपूर्वत्वं च कालिकसम्बन्धेन स्वप्रागभावाधिकरणत्वम्, गगनैकत्वादौ शब्दादिरूपविशेषगुणस्य सामानाधिकरण्यसत्त्वेऽपि कालिकसम्बन्धेन न तत्प्रागभाववत्त्वम्, महाकाले तत्सत्त्वेऽपि न सामानाधिकरण्यमिति न तद्बलात्तन्नाशापत्तिः।

वस्तुतस्तु तत्रापि तादात्म्येन तादृशप्रतियोगिनां सहकारित्वमावश्यकम्, अन्यथा संयोगादृष्टादावपि तज्जन्यतावच्छेदकावच्छिन्नापत्तेः, तथा च नित्यैतद्विलम्बादपि तद्घटितसामग्रीविलम्बः।

एतेनापेक्षाबुद्धेरपि तृतीयक्षणे विनाशस्य शिरोमणिना स्वीकृतत्वात् शब्दादिनाशे च तत्समानकालीनपदार्थनाश एव नाशत्वेन हेतुः, कालिकसम्बन्धेन प्रतियोगिसत्त्वं प्रत्यासत्तिः, नाशत्वमेव जन्यतावच्छेदकम्, जन्यमात्रस्य कालोधितया सर्वत्रैव नाशप्रतियोगिनि तादृशकारणसत्त्वेन व्यभिचारानवकाशात्, तथा च तादृशकारणबलान्महाकालस्य नाशापत्तिरिति परास्तम्। घटादावपि समकालपदार्थनाशस्योक्तसम्बन्धेन तद्द्वितीयक्षणे सत्त्वात् तृतीयक्षणे तन्नाशापत्तिवारणाय शब्दादीनां तादात्म्यसम्बन्धेन तत्सहकारितया आवश्यकत्वात् तत एवातिप्रसङ्गनिर्वाहात्।

न चैवं सत्त्वेन हेतुत्वमप्यनर्थकम्, सत्ताशून्यानां जात्यादीनां नाशस्योक्तविशेषसामग्र्यभावादेव वारणसम्भवादिति वाच्यम्। तत्र स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशहेतुभूताश्रयनाशस्य एकत्वपरिमाणादाविव जातावपि सत्त्वेन तादृशविशेषसामग्रीबलात् तस्या नाशवारणाय सत्त्वेन तादृशप्रतियोगिनां कारणत्वस्याऽऽवश्यकत्वात्। एकत्वादिनाशे एकत्वादीनां विशिष्य कारणताया अ-

नावश्यकत्वात्, नाशप्रतियोगिनां सर्वेषां स्वनाशे विशिष्य हेतुत्वेऽपि यद्विशेषयोरिति न्यायबलात् सत्त्वेन तेषां सामान्यहेतुताया आवश्यकत्वाच्च अन्यथा तत्तद्विशेषसामग्रीविरहकूटस्य जात्यादौ प्रतियोगितया नाशसामान्यानुत्पादप्रयोजकत्वकल्पनायां गौरवात्, अन्यथा तत्तद्व्यक्तिस्थलीयविशेषसामग्र्यभावेन सर्वत्र सामान्यकार्यातिप्रसङ्गवारणसम्भवेन सामान्यकारणमात्रोच्छेदप्रसङ्गात् ।

अथ नाशत्वावच्छिन्नं प्रति स्वप्रतियोगिमत्त्वसम्बन्धेन नाशत्वेन हेतुतामते तादृशसामान्यकारणाभावादेव न जात्यादावाश्रयनाशघटितसमग्रीतो नाशापत्तिः, यद्विशेषयोरित्यादिनियमश्चाप्रयोजक इति चेन्न । प्रागभावस्य कालोपाधित्वाभावेन तत्र कालिकसम्बन्धेन प्रतियोगिमत्त्वाभावात्तन्नाशे व्यभिचारवारणाय समानकालीनपदार्थनाशस्य स्वप्रतियोगिवृत्तित्वसम्बन्धेनैव नाशत्वावच्छिन्नं प्रति हेतुताया वक्तव्यतया प्रागभावेऽपि तादृशसम्बन्धेन तस्य सत्त्वाच्च व्यभिचार इति जातावपि तादृशसम्बन्धेन तस्य सत्त्वात् सत्त्वेन हेतुतां विना तन्नाशापत्तिवारणासम्भवात् । यदि चासमवायिकारणनाशस्यैव द्रव्यनाशकतामतेऽवयवनाशादसमवायिकारणसंयोगनाशोत्पत्तिक्षण एव द्रव्यनाशस्य वारणाय गुणकर्मणोर्द्रव्यान्यत्वेन कारणतां कल्पयित्वा तदवच्छिन्नस्याऽऽश्रयनाशसहकारिता वाच्या, तथा सति कारणतावच्छेदकगौरवाल्लाघवेन गुणकर्मणोर्द्रव्यावृत्तिजातिविशेषमङ्गीकृत्य तेन रूपेण तयोराश्रयनाशसहकारित्वमुचितम्, तादृशसहकारिविरहादेव न जातेर्नाशापत्तिरिति विभाव्यते, मा भूत् तदा सत्त्वेन हेतुत्वम्, ध्वंसध्वंसापादकसामग्रीदुर्भिक्षं दुर्वारमेव, चरमसंयोगानां विनाशेऽदृष्टविशेषनाशस्य कालिकसम्बन्धेन हेतुत्वात्, तस्य च ध्वंसेऽपि सत्त्वात् तद्बलाद् ध्वंसध्वंसापत्तिरिति चेन्न । विजातीयसत्त्वावच्छिन्नस्यैव तत्सहकारितोपगमेन तदापत्त्यभावात्, चरमध्वंसातिरिक्तस्य ध्वंसस्य कालोपाधिताया निर्युक्तिकतया तत्र कालिकसम्बन्धेनादृष्टविशेषनाशासत्त्वाच्च, चरमध्वंसे च चरमध्वंसवृत्तिपदार्थनाशरूपकारणाभावेन तन्नाशापत्तेरयोगादिति कृतं पल्लवितेन ।

(चि०) तत् किं कार्यकारणयोरेव व्याप्तिः, तथा च

बहुधा व्याकुली स्यादिति चेन्न । तदुपजीव्यान्येषाम-प्यनुकूलतर्केण व्याप्तिग्रहात् । यत्र साध्योपाध्योर्हे-तुसाध्ययोर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनि-श्चयस्तत्र सन्दिग्धोपाधित्वम्, व्यभिचारसंशयोपधाय-कत्वात् । यदा च तादृश्यकत्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितम् । पक्षेतरस्य स्वव्याघा-तकत्वेन न हेतुव्यभिचारसंशायकत्वम्, अतो न स-न्दिग्धोपाधिरपि सः । ननु पक्षेतरस्य यथा साध्य-व्यापकत्वं तथा साध्याभावव्यापकत्वमपि, ग्राहक-साम्यात्, तथा चोभयव्यापकनिवृत्त्या साध्यतदभा-वाभ्यां पक्षे निवर्तितव्यम्, न चैवम्, तथा च पक्षेतर-स्साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषये-दिति, तन्न । तथापि हि साध्यव्यापकतापक्षमालम्ब्य हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव । ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा तदभावे-नैव व्याप्तेरग्रहः, अथास्ति तदा साध्यव्याप्यव्यापक-त्वेनोपाधिः साध्याव्यापकत्वानिश्चयान्नोपाधिरित्युभय-थापि नोपाधिर्दूषणम् । न च व्याप्त्याभावव्याप्यत्वमुभ-यमत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्य-म् । उपाधेरात्मलाभार्थमनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेन्न ।

(दी०) कार्यकारणयोरेव । कार्यकारणभावग्राहकप्रमाण-क्रोडीकृतयोरेव ।

(गा०) ययोर्न मिथः कार्यकारणभावस्तयोरपि साध्योपाध्योः प्रद-र्शितत्वात् कार्यकारणयोरेवेति मूलाशङ्काया असङ्गतिः। तथा हि स्या-

मरूपे शाकारम्भकावयवसमवेतत्वरूपशाकपाकजत्वं न कारणमपि तु तादृशावयवरूपमेव प्रत्यक्षविषयत्वरूपं, प्रत्यक्षत्वमपि नोद्भूतरूपकार्यमपि तु मतविशेषे प्रत्यक्षमेव तत्कार्यम्, परन्तु प्रदर्शितेषु धूमार्द्रेन्धनप्रभवधूमहेत्वादेरेव कार्यकारणभावः, तादृशवह्नेः तादृशवह्नित्वेन वह्नित्वेन वा कारणत्वमित्यन्यदेतत्, इत्यतः कार्यकारणयोरिति व्याचष्टे। कार्यकारणयोरेवेति । प्रमाणकोडीकृतत्वम् । प्रमाणविषयत्वम्, तथा च एककारणताप्रविष्टविषयान्तःपातिप्रमाविषयताश्रययोरुभयोरेवेत्यर्थः । तेन कार्यकारणभावविषयकसमूहालम्बनप्रमाविषयत्वस्य केवलान्वयित्वेऽपि न व्यवच्छेद्याप्रसिद्धिः । तथात्वं च कार्यकारणयोः कार्यत्वकारणतावच्छेदकत्वयोः कारणतावच्छेदककार्यतावच्छेदकयोश्चेति दर्शितसकलोपाधिसङ्ग्रहः । वह्निधूमयोः कारणकार्योभयरूपत्वात्, विनाशप्रतियोगित्वस्य भावत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकसम्बन्धत्वात्, सम्बन्धरूपावच्छेदकस्यापि कारणताघटकव्यापकताप्रविष्टत्वेन निरुक्तप्रमाविषयतावत्वात्, शाकारम्भकावयवसमवेतत्वस्य चावयवश्यामरूपनिष्ठकार्यभूतश्यामरूपकारणतावच्छेदकसम्बन्धत्वात्, प्रत्यक्षविषयत्वस्य च रूपस्य रूपवतो वा कार्यतावच्छेदकसम्बन्धत्वादिति ध्येयम् ।

मूले बहुधा व्याकुली स्यात् । द्रव्यत्वपृथिवीत्वाद्योर्व्याप्तिनिश्चयानुपपत्तिस्स्यादित्यर्थः । तदुपजीव्येति । कार्यकारणभावग्राहकप्रमाणपरम्परयोपजीव्येत्यर्थः । अन्येषाम् । द्रव्यत्वपृथिवीत्वादीनाम् । अनुकूलतर्केति। पृथिवीत्वं यदि द्रव्यत्वशून्यवृत्ति स्यात् जन्यगुणशून्यवृत्ति स्यादिति तर्कः पृथिवीत्वादौ द्रव्यत्वादिव्याप्तिग्राहकः, तत्र द्रव्यत्वशून्याऽपि पृथिवी जन्यगुणशून्या न भविष्यतीत्यादिव्यभिचारशङ्का विरोधिनी, तां च जन्यगुणा यदि द्रव्यत्वव्यभिचारिणः स्युः द्रव्यत्वावच्छिन्नसमवायिकारणजन्या न स्युरित्यादितर्कौ विरुणद्धि, तत्र चेष्टापत्तिशङ्काविरोधितया जन्यसत्त्वद्रव्यत्वादिना कार्यकारणभावग्राहकप्रमाणमुपयुज्यते, प्रथमतर्के च नेष्टापत्तिसम्भवः, पृथिव्यादेस्संयोगादिरूपगुणशून्यत्वे मूर्तत्वानुपपत्तेः, मूर्तत्वादेः विभुसंयोगादिव्याप्यत्वादिति । एवमन्यत्रापि कार्यकारणभावस्योपयोगित्वमूह्यम । कार्यकारणभावग्रहोपजीवनं प्रायिकं बोध्यम् ।

(दी०) पक्षेतरस्येत्यादि । ननु सन्दिग्धोपाध्यन्तरव-

त्पक्षेतरोऽपि व्यभिचारशङ्कामादधानः केन वारणीयः, स्वव्या-घातकत्वं च निराकृतमेव ।

(गा०) पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायक-त्वमिति न सन्दिग्धोपाधिरपि स इति मूलस्य यथाश्रुतार्थमाक्षिपति। नन्वित्यादिना । सन्दिग्धोपाध्यन्तरवदिति । व्यभिचारशङ्काधायकत्वे दृष्टान्तः । साध्यव्यापकत्वेन सन्दिग्धं साधनाव्यापकधर्मान्तरमेवे-त्यर्थः । व्यभिचारशङ्कामादधान इति । व्याप्यसंशयात्मकसाध्यध-र्मिकसाधनाव्यापकव्याप्यत्वसंशयद्वारा साध्ये साधनाव्यापकत्व-शङ्कां साध्यव्यापकत्वसंशयाधीनसाधनधर्मिकसाध्यव्यापकताव-च्छेदकावच्छिन्नाभाववद्वृत्तित्वसंशयरूपव्याप्यसंशयद्वारा साधन-धर्मिकसाध्याभाववद्वृत्तित्वशङ्कां वा जनयन्नित्यर्थः । तादृशशङ्काया जनने स्वव्याघातकत्वं मूलोक्तबाधकमुद्धरति । स्वव्याघातकत्वं चे-ति । निराकृतमेवेति । तद्धि न सर्वानुमानसाधारण्यमित्या-दिनेति शेषः ।

(दी०) अथात्र कश्चिदुपाधिर्भविष्यतीति शङ्का शङ्कापि-शाचीत्वाद्यथा न व्यभिचारशङ्काधायिका, तथा पक्षेतरस्योपा-धित्वशङ्काऽपि, तदाहिताऽपि च व्यभिचारशङ्का पक्षे व्यभिचा-रशङ्केव न प्रतिबन्धिका, अन्यथा निरुपाधिकसहचारभङ्गप्रसङ्गमा-त्रबलप्रवृत्तानामनुमानानां विलयप्रसङ्गादिति चेन्न । सन्दिग्धो-पाध्यन्तरसाधारणव्यभिचारशङ्काधीनप्रयोजकरूपवत्ता पक्षेतरेण तदाधाने प्रयोजनक्षतेः प्रतिबन्धकत्वासम्भवात् । व्यभिचारज्ञा-नत्वेन च प्रतिबन्धकतायां कारणविशेषजन्यत्वादिकं न निविश-ते गौरवात् मानाभावाच्च । कथमन्यथा करवह्निसंयोगः सर्वः संयोगो वा प्रत्यक्षसंयोगधर्मातिरिक्तधर्मसमवायी समवायित्वा-दित्यादितो न शक्त्यादिसिद्धिः ? निरुपाधित्वेऽप्यप्रयोजकत्वा-दिति चेन्न। निरुपाधित्वस्यैव प्रयोजकत्वात् । तथात्वेऽपि चाप्र-योजकत्वे निरुपाधित्वाभिमतानामितरेषामपि तथात्वात् ।

(ग।०) अत्र कश्चिदुपाधिर्भविष्यतीति शङ्केति । विशेषत उपाधितावच्छेदकमनुल्लिख्य एतत्साध्यव्यापक एतत्साधनाव्यापको न वा, एतत्साधनाव्यापक एतत्साध्यव्यापको न वेति शङ्कत्यर्थः । शङ्कापिशाचीत्वात् । दुरुच्छेदशङ्कात्वात् । पक्षेतरस्योपाधित्वशङ्काऽपीति । शङ्कापिशाचीत्वान्न व्यभिचारशङ्काधायिकेत्यनुषज्यते । अत्र व्यभिचारशङ्कासामग्र्याः स्थलान्तरे क्लृप्ताया अपि सत्त्वे तच्छङ्काया अनुत्पादोऽनुभवविरुद्ध इत्यनुशयानो न हेतुव्यभिचारसंशयाधायकत्वमित्यस्यानुमितिविरोधिव्यभिचारशङ्कानाधायकत्वाशयेन प्रकारान्तरेण पक्षेतरस्यादूषकत्वं शङ्कते । तदाहिताऽपि चेति । तस्योपाधित्वशङ्काहिता चेत्यर्थः । पक्ष व्यभिचारशङ्केवेति । पक्षे साध्यसन्देहदशायामप्यनुमित्युत्पत्त्या पक्षान्तर्भावेण व्यभिचारशङ्का यथा न प्रतिबन्धिकेत्यर्थः । न प्रतिबन्धिका । नानुमितिप्रतिबन्धिका । एतच्चानुमितिं प्रत्येव साक्षात्संशयसाधारणव्यभिचारग्रहः प्रतिबन्धकः, व्याप्तिज्ञाने तु व्यभिचारनिश्चय एवेति मतेन, व्याप्तिज्ञानाविघटनद्वारा व्यभिचारसंशयस्यानुमितिविरोधित्वमते व्याप्तिज्ञानप्रतिबन्धकतायाः पक्षविशेषनियन्त्रितत्वाभावेन तत्र पक्षीयव्यभिचारसंशयस्यानुमितिविरोधित्वव्यावर्त्तनायोगात्, सामान्यतः पक्षत्वस्य केवलान्वयित्वात् । अन्यथा । उक्तव्यभिचारशङ्काया अपि प्रतिबन्धकत्वे । निरुपाधिकेति । पक्षेतरत्वतत्समशीलातिरिक्तोपाधिविरहविशिष्टसहचारभङ्गापत्तिमात्रबलेन प्रवृत्तानां गगनं परिमाणवत् द्रव्यत्वाद् घटादिवदित्यनुमानानामुच्छेदापत्तेरित्यर्थः । तत्र पक्षे साध्यसन्देहेन तदन्तर्भावेण व्यभिचारशङ्कायां पक्षेतरत्वोपाधित्वशङ्काहितव्यभिचारशङ्कायाश्च सम्भवादित्यर्थः ।

न च तत्र व्यभिचारापादकनिरुपाधित्वभङ्गप्रसङ्ग एव व्यभिचारशङ्कानिवर्त्तक इति नोक्तानुमानविलयप्रसङ्ग इति वाच्यम् । अनौपाधिकत्वस्य दुर्निश्चेयतया तद्भङ्गापत्तेरयोगात् । बलान्तेन च उपाध्यन्तराग्रहसहितव्यभिचारग्रहमात्रसमाधानस्यैव विवक्षिततया तत्सङ्गतेश्च ।

प्रथमपक्षं दूषयति । सन्दिग्धेति । रूपवतेति । साध्यव्यापकतासंशयविषयत्वधर्मवतेत्यर्थः । प्रतिबन्धकत्वासम्भवादिति । न हि प्रयोजनक्षतिभिया सामग्री कार्यं न जनयतीति न्यायादिति भावः ।

द्वितीयपक्षं दूषयति । व्यभिचारज्ञानत्वेन चेति । कारणविशेषजन्यत्वाजन्यत्वादिकमिति । पक्षेतरत्वोपाधित्वसंशयाघटितसामग्रीजन्यत्वादिकं तत्संशयाजन्यत्वादिकं चेत्यर्थः । आदिपदात्साध्याभावांशे संशयान्यत्वपक्षीयव्यभिचारसंशयान्यत्वपरिग्रहः ।

ननु द्रव्यत्वादौ पक्षान्तर्भावेण व्यभिचारसंशयेऽपि तस्य परिमाणाद्यनुमापकतया तदन्यथानुपपत्तिरेव तादृशसंशयान्यत्वस्य प्रतिबन्धकतावच्छेदककोटिप्रवेशे मानमित्यत आह । कथमन्यथेति । अन्यथा । साध्याभावांशे संशयरूपस्य व्यभिचारसंशयस्य पक्षान्तर्भावेण व्यभिचारेण संशयस्य वाऽप्रतिबन्धकत्वे । साध्याभावांशे संशयान्यत्वस्यैव निवेशे करवह्निसंयोगमात्रपक्षकानुमानादपि शक्तिसिद्ध्यापत्तिः, संयोगान्तरेऽपि कार्यान्तरानुकूलशक्तेः सन्दिग्धतया साध्याभावांशे निश्चयरूपव्यभिचारज्ञानासम्भवात्, पक्षीयव्यभिचारसंशयान्यत्वनिवेशे च न तदापत्तिः, पक्षभिन्नसंयोगान्तरे व्यभिचारसंशयस्य प्रतिबन्धकत्वसम्भवादित्याशयेनाऽऽह । सर्वः संयोगो वेति । संयोगे संयोगधर्मातिरिक्तधर्मस्य बाधात् प्रत्यक्षत्वमतिरिक्तत्वप्रतियोगिविशेषणम्, तथा सति शक्तेरतीन्द्रियतया तत्र विशिष्टभेदसत्त्वेन तत्समवायितायाः सन्दिग्धत्वान्न बाधः । पक्षातिरिक्तघटरूपादौ व्यभिचारस्य तत्संशयस्य वारणाय संयोगधर्मेति । कालिकादिसम्बन्धेन प्रसिद्धातीन्द्रियधर्मवत्तया सिद्धसाधनवारणाय समवायीति । इत्यतः । अनुमानात् । न शक्त्यादिसिद्धिरिति । पक्षेतरत्वाद्यतिरिक्ते तत्रोपाधित्वाग्रहेण त्वन्मतासिद्धप्रतिबन्धकताकव्यभिचारज्ञानाभावादिति भावः ।

शङ्कते । निरुपाधिन्वेऽपीति । अप्रयोजकत्वात् । हेतोर्गमकतौपयिकरूपशून्यत्वात् । निरुपाधित्वस्येति । त्वदभिमतस्येत्यादिः, स्वमते पक्षेतरत्वादेरेवोपाधितासम्भवाद्यथाश्रुतासङ्गतेः । तथात्वेऽपि । तादृशनिरुपाधित्वसत्त्वेऽपि । अप्रयोजकत्वे । अप्रयोजकत्वस्य त्वयाऽपि स्वीकारे । इतरेषाम् । द्रव्यत्वादिहेतुकपरिमाणादिसाध्यकानुमानानाम् । तथात्वात् । अप्रयोजकताया आवश्यकत्वात् । तथा च तादृशानुमानोपपत्तये व्यभिचारज्ञानप्रतिबन्धकतायां विशेषणान्तरप्रवेशस्यापि सम्भव इति भावः ।

(दी०) अत्र च कुत्र पक्षातिरिक्ते व्यभिचारशङ्का कश्चायं

व्यामोहो यद्व्याप्तिग्राहकदृढतरप्रमाणविरहिणां निरुपाधित्वमिति, यतस्तत्र तत्रान्ततः पक्षसपक्षैकदेशवृत्तिधर्मावच्छिन्नसाध्यव्यापकानां सपक्षैकदेशवृत्तिधर्माणामुपाधित्वं सम्भाव्यते । इत्थं च यथा नातिप्रसङ्गस्तथा तत्र तत्र वक्ष्याम इति । सत्यम्, कथकसम्प्रदायानुरोधात् कथायां सन्दिग्धोपाधित्वेन पक्षेतरो नोद्भाव्य इत्येवम्परोऽयं ग्रन्थ इत्याहुः ।

(गा०) उक्तशक्तिसाधकानुमाने सिद्धान्तिमतसिद्धप्रतिबन्धकताकव्यभिचारशङ्काविरहं स्पष्टयति। अत्र चेति। कुत्र पक्षातिरिक्ते इति। पक्षातिरिक्तकिंधर्म्यन्तर्भावेणेत्यर्थः । संयोगातिरिक्ते सर्वत्रैव समवायिनि संयोगधर्मातिरिक्तधर्मसमवायितारूपसाध्यस्य निश्चितत्वादिति भावः । पक्षेतरत्वादेरनुपाधित्वेऽपि सिद्धान्तिनां गगनं परिमाणवत् द्रव्यत्वादित्याद्यनुमानस्य निरुपाधित्वाभिमानं निराकरोति । कश्चायमिति । कः । कुत्सितः । व्यामोहः । भ्रमः । दृढतरेति। सत्तर्केत्यर्थः । पक्षसपक्षैकदेशवृत्तिधर्मेति । गगनघटान्यतरत्वादीत्यर्थः । सपक्षैकदेशवृत्तिधर्माणाम् । घटत्वादीनाम् । उपाधित्वम् । सन्दिग्धोपाधित्वम् । पक्षे साध्यव्यापकत्वसंशयस्य दुर्वारत्वात् ।

ननूक्तव्यभिचारशङ्कायाः प्रतिबन्धकत्वे पर्वतो वह्निमान् धूमादित्यादावपि वह्न्यादिसिद्ध्यभावप्रसङ्ग इत्यत आह । इत्थं चेति । तत्र तत्र । व्यभिचारादिग्रन्थे । वक्ष्याम इति । प्रकृतहेतुसाध्ययोर्व्याप्तिग्राहकतर्कसत्त्वेन धूमादौ वह्न्यादिव्याप्तिनिश्चयात्तत्र तस्य व्यभिचारसंशयायोगः, तादृशतर्कस्य व्याप्तिनिश्चयस्य च तत्संशयप्रतिबन्धकत्वादिति वक्ष्याम इत्यर्थः । आहुरित्यनेन सम्प्रदायानुरोधेन तदुद्भावनं दुर्वारमित्यस्वरसः सूचितः ।

(चि०) सोपाधावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वादवच्छेदकभेदेन तदुभयसम्बन्धो वाच्यः, तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीवनमन्तरेणोपाधिरावश्यकः तथाऽनुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिग-

मकाभावाद् दूषकत्वम् ।

(दी०) सोपाधावेकत्रेत्यादि । उपलक्षणमेतत् । व्यभिचारिण्युपाधेरवश्यम्भावमात्रे तात्पर्यम् । उपजीव्योपजीवकभावो हि न कार्यकारणभावः, असम्भवात्, व्याप्यव्यापकभावस्त्वकिञ्चित्कर एव, विशेषतस्तु ज्ञायमानदूषकतायामेकमविज्ञायाऽप्यन्यतरज्ञानाच्च न ज्ञाप्यज्ञापकभावः,न चानुकूलतर्कविरहादेव व्याप्तेरग्रहे कृतमुपाधिज्ञानेन, विनाऽप्यनुकूलतर्कं व्यभिचाराग्रहे व्याप्तिग्रहसम्भवादिति भावः ।

(गा०) अनुकूलतर्काभाव उपाधिज्ञानोपजीवक इति तद्दूषकतयैवोपपत्तौ उपाधेर्दूषकत्वं निर्युक्तिकमिति पूर्वपक्षे सोपाधावेकत्रेत्यादिना मूलकृत उपाधेर्दूषकताव्यवस्थापनं न सङ्गच्छते, व्यभिचारिणि साध्यतदभावसहचारयोरविरोधायोपाधेरवश्यसत्ताया दूषकत्वाव्यवस्थापकत्वादित्यत आह । उपलक्षणमेतदिति । युक्त्यन्तरस्यैव उपाधेर्दूषकत्वसाधकत्वपरमेतदित्यर्थः ।

ननु यथाश्रुते उपाधेरवश्यम्भावस्य तद्दूषकतासाधकत्वेऽस्य तात्पर्यमित्याह । व्यभिचारिणीति । अवश्यम्भावमात्रेति । मात्रपदेन तद्दूषकतासाधकत्वव्यवच्छेदः । अनुकूलतर्काभावे उपजीव्यतायाः तद्दूषकतायां विनिगमकत्वेनोक्तत्वात् तां निराकृत्य उपाधेर्दूषकतां व्यवस्थापयति । उपजीव्योपजीवकभावो हीति । प्रकृते इति शेषः । असम्भवात् । अनुकूलतर्काभावस्याऽऽर्द्रेन्धनादिकारणत्वासम्भवात् । आकिञ्चित्करः । सम्भवन्नपि दूषकताया अविनिगमकः । उभयोरेव प्रत्येकमपरव्यापकत्वादिति भावः । विषयस्य व्याप्यव्यापकभावेऽपि व्यापकस्याज्ञानदशायां व्याप्यज्ञानसत्त्वेऽनुमित्यनुत्पादनिर्वाहाय व्याप्यज्ञानस्यापि दूषकताया आवश्यकत्वादुपाध्यनुकूलतर्काभावयोर्ज्ञायमानयोर्विरोधित्वे तयोर्व्याप्यव्यापकभावः सुतरामविनिगमक इत्याह । विशेषतस्त्विति । दूषकतायामित्यत्राकिञ्चित्कर इत्यनुषज्यते । ज्ञानाच्चेति चस्त्वर्थः । अनुकूलतर्काभावः स्वरूपसन्नेव व्याप्त्यग्रहप्रयोजकः, उपाधिस्तु ज्ञायमानः, एवं चोपाधित्वज्ञानदशायामनुकूलतर्काभावस्य स्वरूपसतो नियततया तत

एव व्याप्तग्रहनिर्वाहे उपाधेर्न तत्प्रयोजकत्वमित्याशङ्कां निराकरोति । न चेत्यादिना । विनाऽप्यनुकूलतर्कमिति । तथा चानुकूलतर्काभावो न स्वतो व्याप्तग्रहप्रयोजकोऽपि तु व्यभिचारग्रहद्वारा, स च सोपाधित्वज्ञानमपेक्षत इति तद्द्वारोपाधेर्दूषकत्वं निराबाधमेवेति भावः ।

(चि०) अन्ये तु यद्व्यावृत्त्या यस्य साधनस्य साध्यं निवर्तते स धर्मस्तत्र हेतावुपाधिः, स च धर्मो यस्याभावात्पक्षे साध्यसाधनसम्बन्धाभावः, यथा आर्द्रेन्धनवत्त्वम् । व्यावर्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके । अत एव तत्र साध्यसाधनसम्बन्धाभावः पक्षे । एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वयोस्सम्बन्धो निवर्तमानः पक्षधर्मताबलादनित्यत्वाभावमादाय सिद्ध्यति, तथा बाह्यानुद्भूतरूपवत्त्व निवर्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयत् प्रत्यक्षत्वाभावमादाय सिद्ध्यति, तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति । अत एव बाधानुन्नीतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्तकत्वादिति ।

(दी०) यद्व्यावृत्त्येति । अत्र पक्ष इति पूरणात्पक्षनिष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः । सत्प्रतिपक्षोन्नायकत्वं चात्र दूषकताबीजम् । तत्र चाप्रयोजकत्वात्साधनाव्यापकत्वं नोक्तम् । साधनस्य सोपाधित्वव्युत्पादनायैव केवलं यस्य साधनस्येति । यद्वा साधनस्येत्यनन्तरमधिकरणे इति पूरणात् साधनवन्निष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः, तथा च यद्व्यभिचारित्वेनेत्यादेरुपदर्शितार्थनिष्कर्ष

एवायम् । शुद्धस्य साधनावच्छिन्नस्य च साध्यस्य व्यापकाना-मुपाधीनां पक्षे क्वचित्साधनवति वा साध्याभावस्यैकमुन्नयनप्रकारमाह । स चेत्यादि । साधनवत्त्वेन ज्ञायमाने पक्षे साध्यसाधनसम्बन्धाभावसिद्ध्यन्पक्षधर्मताबलात्साध्याभावमादायैव पर्यवस्यति ।

(गा०) पर्वतो वह्निमान् धूमादित्यादौ ह्रदादौ साध्याभावोन्नायकव्यतिरेकप्रतियोगिनि वह्निसामग्र्यादावतिव्याप्तिवारणायाऽऽह । अत्रेति । पक्षे यद्व्यावृत्त्या साध्यं निवर्तत इत्यत्र निवृत्तिरुन्नयनविषयोऽभावः, प्रतियोगित्वमाख्यातार्थः, तृतीयायाः स्वरूपयोग्यत्वमर्थः, तथा च यदभावप्रयुक्तपक्षविशेष्यकोन्नयनविषयाभावप्रतियोगि साध्यम्, पक्षविशेष्यकसाध्याभावोन्नयनयोग्याभावप्रतियोगीय इत्यर्थः पर्यवसितः, तादृशयोग्यता च पक्षवृत्तित्वघटितेत्याशयेन व्याचष्टे । पक्षनिष्ठेति । पक्षनिष्ठत्वमुन्नायकव्यावृत्तिविशेषणम्, उन्नायकत्वं च व्याप्यत्वमेव, तथा च पक्षवृत्तितावच्छेदकरूपेण साध्याभावव्याप्यो योऽभावस्तत्प्रतियोगित्वमित्यर्थः, तेनायोगोलकं धूमवद्वह्नेरित्यादौ पक्षनिष्ठसाध्याभावस्य ह्रदादावुन्नायकव्यतिरेकप्रतियोगिनि वह्न्यादौ नातिव्याप्तिः, न वा पर्वतो वह्निमान् धूमादित्यादौ ह्रदादिवृत्तित्वविशिष्टत्वेन वह्न्याद्यभावव्याप्यव्यतिरेकस्य प्रतियोगिनि महानसत्वादौ । अत्र साधनाव्यापकत्वानुपादानात् साध्यसाधनोभयव्यापकपक्षावृत्तावतिप्रसङ्ग इत्याशङ्कां तस्य लक्ष्यत्वेन परिहरति । सत्प्रतिपक्षेति । यस्य साधनस्येति भागस्य लक्षणाप्रवेशेऽपि तदुक्तिं सार्थकयति । साधनस्येति । सोपाधित्वेति । सोपाधिव्यवहारविषयत्वप्रयोजकोपाधिसम्बन्धलाभायेत्यर्थः । साध्यसाधनसम्बन्धकथनेन तदभावसाधकव्यतिरेकप्रतियोगिन्युपाधावपि तस्य परम्परासम्बन्धलाभादिति भावः । तदंशस्य लक्षणप्रवेशनिर्वाहाय कल्पान्तरमनुसरति । यद्वेति । साधनवन्निष्ठेत्यादेरुक्तरीत्याऽर्थो निष्कर्षणीयः । उपदर्शितेति । वस्तुतस्तु इत्यादिनाऽस्मद्दर्शितनिष्कृष्टार्थ इत्यर्थः । तथा च न पौनरुक्त्यदोषः, अस्य यथाश्रुतपरित्यागेन तल्लक्षणविवरणरूपत्वादिति भावः ।

शुद्धसाध्यव्यापकार्द्रेन्धनोपाधेः साक्षात्साध्याभावोन्नायकतयैव ल-
क्षणसमन्वये अत एवेत्यादिना शुद्धसाध्याभावसाधकतया
साध्यसाधनसम्बन्धाभावोन्नायकत्वसम्पादनं व्यर्थमित्याशङ्कां नि-
रस्यति । शुद्धस्येति । साधनावच्छिन्नस्येति । पक्षधर्मताव-
च्छिन्नसाध्यव्यापकस्याभावात् साध्यसाधनसम्बन्धाभावसिद्धेरस-
म्भवेन वक्ष्यमाणप्रकारेण साध्याभावोन्नायकत्वं न तस्येति साध-
नावच्छिन्नस्येत्युक्तम् । सत्प्रतिपक्षोन्नायकतया उपाधितापक्षे पक्षा-
व्यापकविपर्ययस्य उपाध्याभासतया पक्षतावच्छेदकसामानाधिक-
रण्येन साध्यसिद्धेरुद्देश्यत्वे पक्षतावच्छेदकावच्छेदेन साध्याभा-
वोन्नयनमेवोपाधिनानिर्वाहकमतः पक्ष इति सामान्यत उक्तम् । व्य-
भिचारोन्नायकतया उपाधितापक्षे साधनवत्त्वावच्छेदेन साध्याभा-
वोन्नयनमप्रयोजकम्, यत्किञ्चित्साधनवति साध्याभाववत्त्वस्यैव
व्यभिचारत्वादतः क्वचित् साधनवतीत्युक्तम् । एकमुन्नयनप्रकारम् ।
साध्यसाधनसम्बन्धाभावे साध्यमाने पक्षधर्मताबलात् साध्याभाव-
साधकत्वरूपम् ।

मूले साध्यसाधनसम्बन्धाभावः साध्यसाधनयोरेकाविशिष्टाप-
राभावः । पक्ष इत्यस्य उत्तरकल्पे साधनवतीत्येवार्थः । एवमग्रेऽपि ।

साध्यसाधनसम्बन्धाभावसाधकतयाऽपि कथं साध्याभावसा-
धकत्वमित्यत आह दीधितौ । साधनवत्त्वेनेति ।

(दी०) ननु शुद्धसाध्याभावोन्नायकस्यार्द्रेन्धनवत्त्वादेः
कथं साध्यसाधनसम्बन्धाभावोन्नायकत्वमत आह । आर्द्रेन्धने-
ति । अत एवेति । साध्याभावसत्त्वे साध्यसाधनसम्बन्धाभाव-
स्याऽऽवश्यकत्वात्तदुन्नायकत्वमक्षतमिति भावः । द्रव्यत्वे इति ।
द्रव्यत्वस्य हेतुत्वाभिप्रायेण । अयञ्च प्रायशस्सम्भवतीत्यभिहितः ।
वस्तुतः प्रकारभेदेऽपि न क्षतिः । तथा च शुद्धसाध्यव्यापको-
पाधिस्थले शुद्धसाध्याभावः अवच्छिन्नतद्व्यापकस्थले त्ववच्छे-
दकवत्यवच्छिन्नसाध्याभावोऽवच्छेदकवत्त्वविशेषितेन चोपाधि-
विरहेण शुद्धसाध्याभावस्साधनीयः, अत एव गगनादौ स्पर्श-

वत्त्वेन प्रमेयत्वेन च प्रत्यक्षत्वे साध्ये बहिर्द्रव्यत्वावच्छिन्नसाध्य-
व्यापकस्योद्भूतरूपस्य तादृशसाध्याभावोन्नयनहेतुत्वमिति । पक्षे
यद्वृत्त्यावृत्त्या यस्य साधनस्य सम्बन्धि यत्साधनाविशिष्टं साध्यं
निवर्तते इत्यर्थस्तु यथाश्रुतग्रन्थस्वरससिद्धः, तत्र दूषकताबीजं
यदि सत्प्रतिपक्षोन्नायकत्वं तदा साधनानुप्रवेशो व्यर्थः, जलं द्रव्यं
गन्धवत्त्वादित्यादौ पृथिवीत्वादावतिव्याप्तिश्च ।

(गा०) शुद्धसाध्यव्यापकाभावस्य नावच्छिन्नसाध्याभावसाध-
कत्वमित्यभिमानविजृम्भितशङ्कावारकतया यथाऽऽर्द्रेन्धनवत्त्वमित्या-
दिग्रन्थमवतारयति । नन्विति । अत एवेत्यादिना साध्याभाव-
स्य साध्यसाधनसम्बन्धाभावप्रयोजकत्वमुक्तम्, तावता तत्स-
त्त्वे तत्सत्त्वावश्यकत्वलाभादुक्तशङ्कानिराकरणमिति स्फुटयति।
अत एवेतीति । तदुन्नायकत्वमित्यस्य बाधव्यभिचारयोरप्रसक्त्ये-
त्यादिः । द्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयदित्यस्य साध्यसाधनोभ-
यसम्बन्धाभावसाधनपरत्वाभावे साध्याभावसिद्ध्या साध्यसाधन-
सम्बन्धाभावोऽस्तीत्यग्रिममूलस्य यदभावात् पक्षे साध्यसाधन-
सम्बन्धाभाव इत्यस्य च विरोधः, प्रत्यक्षस्पर्शाश्रयत्वस्य हेतुत्वे
च तत्परत्वासम्भव इत्यतो द्रव्यत्वस्येति ।

मूलकृता तथा चेत्यादिना तदुभयसम्बन्धाभावस्याबाधो द-
र्शितः । साध्याभावसिद्ध्या । साध्याभावस्य प्रमितत्वेन ।

मूलकृतोऽप्युन्नयनप्रकारैक्ये निर्बन्धमाह । अयं चेति । सत्प्रति-
पक्षोन्नायकस्य उपाधितामते पक्षे साधनस्यासत्त्वे तत्र साधनव-
त्त्वानिश्चयादुपाध्यभावेनोभयसम्बन्धाभावसाधने साध्याभावपर्य-
वसानासम्भवात् प्रायश इत्युक्तम् । प्रकारभेदं दर्शयति । तथा
चेति । उक्तप्रकारसम्भवस्थलं दर्शयति । अत एवेति । स्पर्शवत्त्वे-
न प्रमेयत्वेन चेति । प्रथमे उपाध्यभावेन साध्यसाधनसम्बन्धा-
भावसाधने शुद्धसाध्याभावापर्यवसानम्, स्पर्शरूपसाधनाभावा-
बाधेन पक्षधर्मताबलाभावात्, द्वितीये तद्व्याप्तिविरहेण साध्य-
साधनसम्बन्धे प्रवेश्य उक्तलक्षणव्याख्यानं दूषयितुमाह । पक्ष
इति । गौरत्वाभाववान् मित्रातनयत्वादित्यादौ शाकपाकजत्वाद्यु-

पाधेः साधनसामानाधिकरण्योपलक्षितसाध्यव्यापकतया न स्वव्यतिरेकेण तादृशसाध्याभावसाधकत्वम्, अतो यत्साधनविशिष्टमिति वर्णितम्। सत्प्रतिपक्षोन्नायकत्वम् तदुन्नायकतामात्रम् । लक्ष्यतानियामकमिति शेषः । साधनानुप्रवेशो व्यर्थ इति । शुद्धसाध्याव्यापकस्यापि पक्षे उक्तरीत्या शुद्धसाध्याभावोन्नायकतया तदनन्तर्भावेऽपि लक्षणसमन्वयसम्भवादिति भावः । अतिव्याप्तिरिति । पक्षे साध्यसत्त्वेन सत्प्रतिपक्षानुन्नायकत्वात् साधनावच्छिन्नसाध्यव्यापकतया यथोक्तलक्षणसत्त्वाच्चेति भावः ।

(दी०) अथासिद्ध्युन्नायकत्वं तदा साध्यानुप्रवेशो निरर्थकः, जलं गन्धवत् द्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसङ्गश्च । अथ यथासम्भवमसिद्धिसत्प्रतिपक्षस्य चोन्नायकत्वं तदा वायुः स्नेहवान् गन्धवत्त्वादित्यादौ जलत्वपृथिवीत्वादावतिव्याप्तिः, साधनविशिष्टसाध्याप्रसिद्धेः । साध्यसाधनवत्त्वप्रकारकबोधविरोधिबुद्धिकाभावोन्नायकत्वमर्थः, विरुणद्धि चैकैकाभावबुद्धिरुभयवत्ताबोधम्, विरुद्धस्थले तु भ्रमादिरूपतथाविधबोधप्रसिद्ध्या समन्वय इत्यपि वदन्ति ।

(गा०) असिद्ध्युन्नायकत्वम् । असिद्ध्युन्नायकतामात्रम् । एवं सति साधनानुप्रवेशसार्थक्यं भवति, उक्तस्थलीयपृथिवीत्वादेः स्वरूपासिद्ध्युन्नायकतया लक्ष्यस्य सङ्ग्राहकत्वात् । साध्यानुप्रवेश इति । आत्मा प्रत्यक्षः स्पर्शाश्रयत्वादित्यादौ शुद्धसाधनाव्यापकस्योद्भूतरूपादेरभावेन पक्षधर्मविभुत्वादिविशिष्टेन साधनाभावोन्नयनसम्भवेन तदनन्तर्भावेऽपि लक्षणसमन्वयसम्भवात्, पृथिवीत्वादौ पक्षे साधनसत्त्वेन स्वरूपासिद्ध्यनुन्नायकतया ऽलक्ष्ये साधनावच्छिन्नसाध्यव्यापकतया यथोक्तलक्षणसत्त्वेनातिप्रसङ्गः । प्रत्येकोन्नायकेऽपि यथोक्तलक्षणसत्त्वादुभयोन्नायकत्वस्य लक्ष्यतानियामकत्वेऽतिव्याप्तिरिति यथासम्भवमित्युक्तम्, तथा चैकोन्नायकतयैव लक्ष्यतया नोक्तातिव्याप्तेरवकाशः, तदुपाधिसङ्ग्राहकतया चोभयानुप्रवेशसार्थक्यमिति भावः । जलत्वपृथिवीत्वादाविति । प्रथमस्य सत्प्रतिपक्षोन्नायकतया द्वितीयस्यासिद्ध्युन्नायकतया ल-

क्ष्यत्वात् इति भावः । साधनविशिष्टसाध्यस्याभावो न प्रविष्टः, अपि तु द्वयोरभावद्वयमनुगतरूपेणेति नोक्ताव्याप्तिरिति वदतां मतमाह । साध्येति । साध्यसाधनोभयप्रकारकबोधविरोधिनी बुद्धिर्यस्य तादृशाभावोन्नायकत्वमित्यर्थः । यत्किञ्चिदेकधर्मिकतादृशोभयप्रकारकलौकिकसन्निकर्षाद्यजन्यज्ञानसामान्यप्रतिबन्धकतावच्छेदकतद्धर्मिविशेष्यतानिरूपकप्रकारताश्रयाभावोन्नायकत्वं विवक्षितम् । पदार्थान्तरसहिततदुभयप्रकारकबोधविरोधितावच्छेदकत्वमन्याभावेऽपीति तदुन्नायकेऽतिव्याप्तिवारणाय सामान्यत्युक्तम् । नानाधर्मिकोभयप्रकारकज्ञानसामान्यप्रतिबन्धकतावच्छेदकत्वं विशेष्यभेदभिन्नाया न कस्या अपि साध्याभावादिप्रकारताया इति प्रतिबध्यज्ञाने यत्किञ्चिदेकधर्मिकत्वनिवेशः । विशिष्टवह्न्यादेर्यत्र साध्यता साधनता वा तत्र साध्यादौ तद्विशेषणाभावग्रहस्यापि विशिष्टसाध्यादिप्रकारकज्ञानविरोधितया प्रकृतपक्षे तदुन्नायकस्य वारणाय तद्धर्मिविशेष्यतानिरूपकत्वं प्रकारताविशेषणम् । प्रकृतपक्षे तादृशाभावोन्नायकत्वविवक्षयाऽन्यत्र तदुन्नायकेऽनुपाधौ नातिप्रसङ्गः ।

ननु उभयवत्ताज्ञानप्रतिबन्धकमुभयाभावज्ञानम्, तथा सति च यत्र एकसम्बन्धेनैव साध्यसाधनभावः तत्र तत्सम्बन्धेनोभयप्रकारकज्ञानविरोधितत्सम्बन्धावच्छिन्नोभयाभावोन्नायकतया सत्प्रतिपक्षाद्युन्नायकसङ्ग्रहेऽपि यत्र भिन्नसम्बन्धेन तथात्वं तत्र विभिन्नतत्सम्बन्धेन साध्यसाधनोभयप्रकारकज्ञानं प्रति नैकसम्बन्धावच्छिन्नोभयाभावज्ञानं प्रतिबन्धकमिति कीदृशाभावोन्नायकतया लक्षणं सङ्गमनीयमित्याशङ्कां निराचिकीर्षुः साध्यसाधनोभयस्य विभिन्नतत्सम्बन्धावगाहिज्ञानस्याधिकं त्विति न्यायेन प्रत्येकसम्बन्धावच्छिन्नप्रत्येकाभावज्ञानप्रतिबध्यत्वमपीति तदुन्नायकत्वमेवोभयविरोध्यनुगमकम्, अत उभयत्वाप्रकारकोभयज्ञाने उभयाभावज्ञानस्याविरोधित्वेऽपि न क्षतिरिति समाधत्ते । विरुणद्धीति । विरुद्धसाध्यसाधनयोरेकधर्मिणि प्रमारूपज्ञानासम्भवेऽपि भ्रमरूपस्य संशयरूपस्य वा उभयज्ञानस्य विरोधित्वेनैव तत्राभावद्वयानुगम इत्याह । विरुद्धस्थले चेति । अत्र च यादृशविरुद्धस्य न कुत्रापि धर्मिणि भ्रमः संशयो वा प्रसिद्धस्तदेकतरसाध्यकापरहेतुकोपाधावव्याप्तिः, यत्किञ्चिदेकधर्मिणि साध्यप्रकारकं यत्किञ्चिदेकधर्मिणि च साधनप्रकारकं

मिति रीत्या निवेशे भिन्नधर्मिकतदुभयप्रमामादाय वृत्तिमत्साध्यसाधनकोपाधिसङ्ग्रहेऽपि साध्यतावच्छेदकादिसम्बन्धेनावृत्तिसाध्यादिके तेन तेन सम्बन्धेनोभयप्रकारकस्य भिन्नधर्मिकस्यापि प्रमारूपज्ञानस्याप्रसिद्ध्या तत्र भ्रमाप्रसिद्धावव्याप्तिः, एवं साध्याभावोन्नायकताया एव मूलकृतोपादानादसिद्ध्युन्नायकस्य लक्ष्यत्वं न तदभिप्रेतमित्यादिकमस्वरसबीजम् ।

(दी०) यत्तु साध्यावृत्तित्वे सति साधनावृत्तिर्यस्तच्छून्यत्वेन साध्यसाधने अनुगमय्य तदभावोन्नायकत्वं वाच्यमिति तन्न । यत्र भिन्नाभिन्नसम्बन्धेन साध्यसाधनभावस्तत्र सद्धेतुके हेतुतासम्पादकेन सम्बन्धेन साध्यस्य साध्यतासम्पादकेन च हेतोरन्यत्रापि च यथा कथञ्चित्सम्बन्धेनोभयस्याभावोन्नायकेऽतिव्याप्तेः । किञ्च तादृशधर्मशून्यत्वेन रूपान्तरेण वा तदभावस्योन्नायकत्वमभिमतम् ? नाद्यः, साध्यसाधनान्यतरवति तदसम्भवात् । नान्त्यः, धूमेन पर्वते वह्नौ साध्ये महानसीयवह्नित्वाद्यवच्छिन्नाभावोन्नायकमहानसत्वादावतिव्याप्तेः ।

(गा०) साध्यसाधने अनुगमय्य तदभावत्वेनाभावद्वयानुगमनं दूषयितुमुपन्यस्यति । यत्त्विति । यत्र प्रमेयमात्रस्य साध्यता साधनता वा तत्र साध्यसाधनयोस्तदन्यान्यत्वेनानुगमो न सम्भवति, प्रमेयभिन्नाप्रसिद्धेरिति तत्तदवृत्तिशून्यत्वेनानुगमः । प्रमेयावृत्ति चावृत्त्येव प्रसिद्धम् । यत्रेति । पर्वतो वह्निमान् धूमसंयोगादित्यादावित्यर्थः । सद्धेतुक इति । अभावोन्नायक इत्यनेनान्वितम् । हेतुतासम्पादकेन सम्बन्धेनाभावस्य विवक्षणे तादृशेन समवायादिना साध्यस्य वह्न्यादेरभावस्योन्नायके वह्न्यवयववत्वादौ, साध्यतासम्पादकेन सम्बन्धेनाभावस्य विवक्षणे तादृशेन संयोगादिना हेतोर्धूमसंयोगादेरभावस्योन्नायके महानसत्वादौ, यत्किञ्चित्सम्बन्धेनाभावस्य विवक्षणे च तत्तत्सम्बन्धेन तत्तदभावस्योन्नायके तत्र तत्रैवातिव्याप्तिरित्यर्थः । अभावस्य प्रतियोगितावच्छेदकं विकल्प्यापि दूषयति । किञ्चेति । तादृशधर्मेति । धर्मपदं स्वरूपार्थकम्, तादृशान्यतरत्वावच्छिन्नप्रतियोगिताकस्य तादृशान्यतरत्वाश्रयप्रतियोगिताक-

स्य वाऽभावस्योन्नायकत्वं विवक्षितमित्यर्थः। अन्यतरत्वाति। पक्षे। तदसम्भवात्। अन्यतरत्वावच्छिन्नाभावस्य बाधेनोन्नायकत्वासम्भवात्। तथा च ह्रदो वह्निमान् द्रव्यत्वादित्यादौ वह्निसामग्र्यादेः पर्वतो वह्निमान् महानसत्वादित्यादौ च व्यञ्जनवत्त्वादेः सत्प्रतिपक्षस्यासिद्धेश्च उन्नायकस्यासङ्ग्रह इति भावः।।

(दी०) यच्च पक्षावृत्तित्वे सति ये साधनवदवृत्तयस्तच्छून्यत्वेन पक्षसाधनवन्ताविति प्रमाविशेष्यत्वेन वा द्वावनुगतीकृत्य तत्र साध्यव्यावर्त्तकत्वमर्थमाहुः। तत्र यदि सत्प्रतिपक्षव्यभिचारयोरन्यतरमात्रोन्नायकत्वं दूषकताबीजम् तदा द्वयोरनुगमनमफलम्। अथ यथासम्भवमुभयोन्नायकत्वम् तदाऽवृत्तिहेतुके सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः।

(गा०) सत्प्रतिपक्षव्यभिचारयोरुन्नायकसङ्ग्रहाय उन्नयनपक्षभूतपक्षसाधनवतोरनुगतरूपेणान्तर्भावं दूषयति। यच्चेत्यादिना। प्रमेयत्वस्य यत्र पक्षतावच्छेदकता साधनता वा तत्राप्रसिद्धिभयेन तत्तदन्यान्यत्वोपेक्षा। पक्षसाधनवन्ताविति। इतरविशेष्यकसमूहालम्बनव्यावृत्ततद्व्यक्तित्वेन प्रमाया निवेशो बोध्यः, अतः पूर्वापेक्षया लाघवम्, तादृशसमूहालम्बनव्यावृत्तस्य पूर्वापेक्षया लघुरूपान्तरस्य दुर्वचत्वात्। साध्यव्यावर्त्तकत्वम्। साध्याभावोन्नायकत्वम्। अर्थम्। उक्तलक्षणस्यैवेति शेषः। सत्प्रतिपक्षेति। सत्प्रतिपक्षोन्नायकत्वमात्रम्। व्यभिचारोन्नायकत्वमात्रमित्यर्थः। अवृत्तिहेतुके इति। ह्रदो वह्निमान् गगनादित्यादिस्थले वह्निसामग्र्यादावित्यर्थः। अव्याप्तिः, साधनवतो ऽप्रसिद्ध्या।

(दी०) यदपि च पक्षतावच्छेदके साधने च न वर्तते यत्तच्छून्यस्य पक्षतावच्छेदकसाधने इति प्रतीतिविशेष्यस्य वाऽऽश्रये साध्यव्यावर्त्तकत्वमर्थमाहुः। तत्रापि किं येन सम्बन्धेन हेतुता तेन, अथ येन पक्षतावच्छेदकं पक्षे वर्तते तेन, उत येन केनचित् तादृशधर्माश्रये साध्यव्यावर्तकत्वमाभिमतम्? नाद्यः, जलं वह्निमद्धूमादित्यादौ जलपक्षकवह्निसाध्यके संयोगसम्बन्धेन

साधने धूमादौ वह्निसामग्र्यादावव्याप्तेः; पक्षतावच्छेदकस्य संयोगेनावृत्तेः, संयोगेन धूमवतश्च वह्निमत्त्वनियमात् । न द्वितीयः, घटो जातिमान्मेयत्वादित्यादौ समवायित्वादावव्याप्तेः, वह्निमत्पर्वतपक्षके पर्वतो वह्निमान् धूमादित्यत्र धूमावयवे वह्निव्यावर्तके वह्निसामग्र्यादावतिव्याप्तेश्च । अत एव नेतरोऽपि, इत्यादि स्वयमूहनीयमिति कृतं पल्लवितेन ।

(गा०) साधनपक्षतावच्छेदकान्यतराश्रयत्वेनोभयोर्निवेशे साधनवतोऽप्रसिद्धावपि नान्यतराश्रयाप्रसिद्धिरित्याशयेन तत्र साध्याभावोन्नायकत्वार्थकत्वेन तल्लक्षणव्याख्यामुपन्यस्य दूषयति । यदपीत्यादि । पक्षतावच्छेदक इति । प्रमेयमात्रस्य यत्र पक्षतावच्छेदकता साधनता वा तत्सङ्ग्रहानुरोधेन तदन्यान्यत्वमुपेक्षितम् । पक्षतावच्छेदकसाधने इतिप्रथमाद्विवचनम् । तेनेति । द्वयं तादृशधर्माश्रय इत्यन्वयि । येन पक्षतावच्छेदकमिति । येन सम्बन्धेन पक्षतावच्छेदकावच्छिन्नं साध्यं साधनीयमित्यर्थः । वह्निसामग्र्यादौ । सत्प्रतिपक्षोन्नायके । संयोगेनावृत्तेरिति । तथा च जलरूपपक्षस्य साधनशून्यस्यान्यतराश्रयत्वेनोपादानासम्भवात् तत्र साध्याभावोन्नायकतया न लक्षणगमनसम्भव इति भावः । साधनतावच्छेदकसम्बन्धेन साधनवतः प्रसिद्धावपि साध्याभावस्य तत्र वाधेनोन्नायनं न सम्भवतीत्याह । संयोगेन धूमवतश्चेति । समवायित्वादौ । व्यभिचारोन्नायके । अव्याप्तेरिति । पक्षतावच्छेदकताघटकसमवायेन मेयत्वाश्रयाप्रसिद्धेः, पक्षतावच्छेदकघटत्वाश्रयस्य च साध्यवत्त्वनियमादिति भावः । अतिव्याप्तिमप्याह । वह्निमदिति । पक्षस्य साध्यशून्यत्वे वह्निसामग्र्यादिः सत्प्रतिपक्षोत्थापकतया लक्ष्य एव स्यादिति वह्निमत्पर्वतपक्षक इत्युक्तम् । धूमावयवे । पक्षतावच्छेदकताघटकसमवायेनान्यतरान्तर्गतसाधनाश्रये । अत एव । यत्किञ्चित्सम्बन्धेन धूमावयवादेर्धूमाद्याश्रयतया तत्र साध्यव्यावर्त्तकवह्निसामग्र्यादावतिव्याप्तेरेव ।

(चि०) यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्मत्वं पक्षेतरोऽपि क्वचिदुपाधिः, तत्तदुपाधेस्तु

तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वम् । न च वह्निधूमसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् । आपाद्याप्रसिद्धेरिति । तन्न । अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यम् । तच्च न व्यतिरेकित्वम्, अतिप्रसङ्गात्, विशेषलक्षणत्वे तु वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रसङ्गाच्च ।

(गा०) मूल व्यतिरेकिधर्मत्वमिति । तत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वे सति तत्सम्बन्धावच्छिन्नवृत्तिमत्त्वावच्छेदको यो धर्मस्तद्वत्त्वं तेन सम्बन्धेन तद्रूपेणोपाधित्वमित्यर्थः, अतो द्वित्वाद्यवच्छिन्नव्यतिरेकप्रतियोगित्वस्य यत्किञ्चित्सम्बन्धावच्छिन्नतत्प्रतियोगित्वस्य वा ऽव्यावर्त्तकत्वेऽपि न क्षतिः । संयोगादिसम्बन्धेन गुणत्वगुणघटोभयत्वाद्यवच्छिन्नस्योपाधितावारणाय विशेष्यदलम् । तत्तदुपाधेस्तु । तत्तद्रूपावच्छिन्नहेतुकोपाधेस्तु । लक्षणमित्यनुषज्यते । तत्तत्साध्येति । तत्तद्रूपावच्छिन्नसाध्यसाधनव्यापकत्वाव्यापकत्वावच्छेदकरूपवत्त्वमित्यर्थः । पक्षेतरत्वं वह्निधूमसम्बन्धोपाधिः स्यादिति योजना । वह्निधूमसम्बन्धोपाधिः । वह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकोपाधिः ।

(दी०) आपाद्याप्रसिद्धेः । आपाद्यस्य वह्निव्यापकत्वे सति धूमाव्यापकत्वस्य अप्रसिद्धेः । अनुमितीति । अस्मदुक्तं व्यभिचारोन्नायकत्वं तदुन्नयनस्वरूपयोग्यत्वं तद्व्याप्तिपक्षधर्मतारूपम् पर्यवसितसाध्यव्यापकत्वादिकं चानुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमेवेति भावः । ननु सामान्यलक्षणमितरव्यावृत्त्यौपयिकम्, विशेषलक्षणं तु दूषकतायामुपयुज्यते इत्यत्राऽऽह । विशेषेति ।

(गा०) तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वस्य तत्तत्साध्यसाधनकोपाधिव्यवहारविषयतावच्छेदकत्वमुपगच्छता वह्निव्यापकत्वे सति धूमाव्यापकत्वस्य वह्निसाध्यकधूमसाधनकोपाधिव्यवहारविषयतावच्छेदकत्वोपगमात् तस्य सद्धाव्यतया वह्नि

व्यापकत्वे सति धूमाव्यापकत्वेन तथाविधोपाधिव्यवहारविषयतावच्छेदकवत्त्वापत्तिरभिमता, एकस्यैव भिन्नरूपेणापाद्यापादकभावाविरोधादित्याशयेनापाद्याप्रसिद्धिं दीधितिकृद्व्याचष्टे । आपाद्यस्येति । धूमाव्यापकत्वस्य । धूमाव्यापकत्वरूपतादृशव्यवहारविषयतावच्छेदकस्य । अप्रसिद्धेः । तादृशावच्छेदकत्वेनापि क्वचित् प्रसिद्धिविरहात् ।

मूले आपाद्येत्युपलक्षणम्, उक्तधर्माप्रसिद्ध्या आपादकाप्रसिद्धिरपि द्रष्टव्या । तादृशव्यवहारविषयत्वापादनेऽपि उक्तस्यापादकत्वे आपादकाप्रसिद्धिः । भ्रान्तस्य तथा व्यवहारादिष्टापत्तिः । यथार्थतादृशव्यवहारविषयत्वापादने आपाद्याप्रसिद्धिरपि । व्यवहारस्य याथार्थ्यापादने वह्निव्यापकत्वसहितधूमाव्यापकत्वरूपव्यवहारविषयतावच्छेदकवह्निपकत्वस्यैवापादकत्वेनोपगन्तव्यतया आपादकाप्रसिद्धिर्दुर्वारेत्यवधेयम् । एतेन पक्षेतरत्वे वह्निव्यापकत्वे सति धूमाव्यापकत्वरूपस्याऽऽपादकस्यापि उक्तलक्षणकर्त्राऽनुपगमात्तस्याऽऽपत्त्यप्रसक्त्याऽऽपाद्याप्रसिद्ध्या तन्निराकरणासङ्गतिरिति परास्तम् ।

ननु व्यतिरेकिधर्मत्वस्यैव सिद्धान्तिनिरुक्तव्यभिचारोन्नायकत्वादिज्ञानस्यापि स्वतो व्यभिचारज्ञानद्वारा वाऽनुमित्यप्रतिबन्धकत्वेन सिद्धान्तिनिरुक्तरूपस्यापि न यथोक्तरूपतेति तुल्यानुयोग इत्यत आह । अस्मदुक्तमिति । तच्च व्याप्तिपक्षधर्मतारूपम् । साध्यव्यभिचारव्याप्यत्वे सति साधनरूपपक्षवृत्तितारूपम् । अनुमितिप्रतिबन्धकेत्यादिनाऽन्वयः । तस्य तथात्वं च व्यभिचारानुमितिजनकज्ञानविषयत्वावच्छेदकतया पर्यवसितसाध्यव्यापकताघटितोक्तरूपस्यापि उपाधिव्यभिचारे पर्यवसितसाध्यव्यभिचारव्याप्त्यादिग्राहकज्ञानविषयतावच्छेदकतया पर्यवसितसाध्यव्यभिचारासिद्धेरेव पक्षधर्मताबलेनानुमितिविरोधिशुद्धसाध्यव्यभिचारसिद्धिरूपत्वादित्यवधेयम् ।

नन्वस्यापि वादिनो विशेषलक्षणमनुमितिविरोधिज्ञानविषयतावच्छेदकमित्येतन्मतेऽपि न दोष इत्याशङ्कायां विशेषलक्षणे दोषमवतारयति । नन्वित्यादि । दूषकतायाम् । अनुमितिप्रतिबन्धकव्यभिचारज्ञानजनने ।

मूले विशेषलक्षणत्वे इति । उक्तविशेषधर्मस्य लक्षणत्वे । अनु-

मितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वे स्वीकृते त्वित्यर्थः । वह्निधूमेति । पक्षेतरत्वे वह्निसाध्यकधूमहेतुकानुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकरूपत्ववत्त्वापत्तेरित्यर्थः ।

(दी०) यथाश्रुते ऽवच्छिन्नसाध्यव्यापकोपाध्यव्याप्त्या यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वमेव वक्तव्यम्, तथा च वह्निना धूमस्य धूमेन वह्नेर्वा साधने पक्षेतरस्य तद्रूपज्ञानादनुमितिप्रतिबन्धापत्तिरित्यर्थः । व्यवहारौपयिकत्वे च तत्रोपाधिव्यवहारापत्तिः, पर्यवसितेत्याद्यभिधाने चास्मन्नयप्रवेश इति भावः । व्यवहारौपयिकम् । स्वव्यभिचारेण साध्यव्यभिचारोन्नायकत्वम् । लक्षणं तु तत्तत्साध्यसमानाधिकरणत्वे सति तत्तत्साधनाव्यापकत्वं साध्यसाधनभेदाद्भिन्नमेव । वस्तुतो व्यभिचारिणस्साधनस्यैवानुप्रवेशाच्च नातिप्रसङ्गः । न च रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावादेरुपाधितापत्तिः, गुरुत्वव्यभिचारिरूपव्यक्तेस्तद्व्याप्यत्वात् तदव्याप्यरूपव्यक्तेश्च गुरुत्वाव्यभिचारादिति । दूषणौपयिकं तु यथासम्भवमननुगतमेवेति मतमिदं परे परिष्कुर्वन्ति । तन्न । तथा हि साध्यसाधनव्यक्तिस्वरूपगर्भं नोपाधित्वम्, अपि तु साध्यतावच्छेदकसाधनतावच्छेदकधर्मगर्भम्, तत्तद्गुणत्वेन सकलगुणव्यक्तिषु सोपाधेरपि द्रव्यत्वस्य गुणत्वेन सकलगुणेष्वेव निरुपाधित्वात्, गुणत्वेन गुणे साध्ये सत्तात्वेन रूपेण सोपाधेरपि सत्ताया गुणकर्मान्यत्वविशिष्टसत्तात्वेन निरुपाधित्वात् । तथा च तद्रूपावच्छिन्ने साध्ये तद्रूपावच्छिन्ने साधने च क उपाधिरित्यत्र तद्रूपावच्छिन्नसाध्यसमानाधिकरणत्वे सति तद्रूपावच्छिन्नसाधनाव्यापकत्वमनुगतं लक्षणं वाच्यम्, न तु तद्रूपावच्छिन्नतत्तत्साधनव्यक्त्यव्यापकत्वम्, अननुगमात्, तथा च गुरुत्वत्वावच्छिन्नसमानाधिकरणस्य रूपत्वावच्छिन्नाव्यापकस्य

पृथिवीत्वाभावादेरुपाधित्वं दुर्वारम् । व्यभिचारित्वेन साधन-विशेषणं तूपदर्शितमेवेति सङ्क्षेपः ।

(गा०) अत्रापि तादृशरूपाप्रसिद्ध्या पूर्ववदापत्त्यसम्भव इति तत्सम्भवं दीधितिकृदुपपादयति । यथाश्रुते इति । शुद्धसाध्यव्यापकत्वान्तर्भाव इत्यर्थः । तद्रूपवत्ताज्ञानादनुमितिप्रतिबन्धापत्तिरिति । यद्यपि नेयमापत्तिर्यथाश्रुतमूलतो लभ्यते, तथापि पक्षेतरत्वेऽनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकरूपवत्त्वापत्तौ पक्षेतरत्वनिष्ठयत्किञ्चित्साध्यव्यापकताघटितरूपेऽनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वापत्तिः पर्यवस्यति, तस्याश्च पर्यवसानं तद्रूपावच्छिन्नविषयकज्ञानस्यानुमितिप्रतिबन्धकत्वापत्ताविति न विरोधः ।

उक्तरूपस्य व्यवहारमात्रौपयिकत्वेऽपि न निर्वाह इत्याह । उपाधिव्यवहारापत्तिरिति । वह्निसाध्यकधूमहेतुकोपाधिव्यवहारस्य यथार्थतापत्तिरित्यर्थः । अतो न पूर्वोक्तव्यवहारापत्तिदूषणावसरः । अत्रापादकं पूर्वोक्तव्यवहारविषयतावच्छेदकवह्निविषयकत्वमेव तच्च रूपं नेदानीमप्रसिद्धमित्यवधेयम् ।

ननु निरुक्तपर्यवसितसाध्यव्यापकताघटितमेव लक्षणमेतन्मतेऽपि विवक्षणीयम्, अतो नावच्छिन्नसाध्यव्यापकासङ्ग्रहः, न वा पक्षेतरातिव्याप्तिरित्यत आह । पर्यवसितेत्यादीति । एतन्मतं परिष्कुर्वतां मतमुपन्यस्यति । व्यवहाराविति । व्यवहारौपयिकम् । उपाधिव्यवहारौपयिकम् । लक्षणम् । इतरभेदानुमापकम् । तत्तत्साध्येति । अवच्छिन्नसाध्यव्यापकोपाधिसङ्ग्रहाय लाघवाय च व्यापकत्वमुपेक्ष्य सामानाधिकरण्यनिवेशः । साध्यविरुद्धवारणाय साध्यसामानाधिकरण्यावच्छेदकसाधनाव्यापकतावच्छेदकरूपवत्त्वविवक्षया धूमवान् वह्नेरित्यादौ ह्रदवृत्तित्वविशिष्टद्रव्यत्वादिकं वारणीयम् । साध्यसाधनयोर्विशिष्य निवेशस्याऽऽवश्यकतया तद्भेदादुपाधिभेद इष्ट एवेत्याह । साध्येति । सद्धेतौ सपक्षैकदेशवृत्तिधर्मेऽतिव्याप्तिं वारयति । वस्तुत इत्यादि । वस्तुतः । वस्तुगत्या । व्यभिचारिण इति । साध्यसाधनयोर्विशिष्य प्रवेशाद्यत्साध्यस्य यत्साधनं व्यभिचारि तदुभयघटितमेव लक्षणं कर्त्तव्यम्, तथा च यस्य यद्व्यापकं तदुभयघटितं नोपाधित्वमिति क्वातिप्रसङ्ग इत्यर्थः । गुरुत्व-

व्यभिचारीति। तैजसरूपव्यक्तीनां पृथिवीत्वाभावव्याप्यत्वादित्यर्थः। तथा च तत्तद्व्यक्तित्वेनैव साध्यसाधनयोर्निवेशनीयतया तैजसरूपहेतुकगुरुत्वसाध्यकोपाधिलक्षणप्रविष्टतद्रूपाव्यापकत्वस्य पृथिवीत्वाभावे ऽसत्त्वान्नातिप्रसङ्ग इत्यर्थः। तद्रूपघटितलक्षणस्य तत्राव्याप्तिविरहेऽपि पार्थिवरूपात्मकहेतुघटितलक्षणातिव्याप्तिरेवेति शङ्कामुद्धरति। तदव्याप्येति। पृथिवीत्वाभावो यदव्यापकस्तद्रूपेत्यर्थः। गुरुत्वाव्यभिचारादिति। तथा च गुरुत्वतद्रूपोभयघटितलक्षणमेव नास्ति, क्वातिप्रसङ्ग इति भावः।

ननु उक्तरूपज्ञानं व्यभिचारानुमानानुपयोगि, व्यापकत्वाघटितत्वात्, नापि साध्यव्यापकत्वघटितम्, अवच्छिन्नसाध्यव्यापकासङ्ग्रहात्, नापि साधनपक्षधर्मावच्छिन्नसाध्यव्यापकताघटितम्, अननुगमादित्यस्मदुक्तरीतिरेवाऽऽदरणीयत्यत आह। दूषणतेति। दूषणता। व्यभिचारोन्नायकता। अननुगतमेव। शुद्धसाध्यतत्तद्धर्मावच्छिन्नसाध्यव्यापकताघटितमेव, तदननुगमस्यादोषत्वादिति भावः। स्वरूपगर्भम्। स्वरूपमात्रगर्भम्। मात्रपदेन साध्यतावच्छेदकगर्भताव्यवच्छेदः। धर्मगर्भमिति। तत्कुत इत्यपेक्षायामाह। तत्तदिति। गुणव्यक्तिषु। साध्यीभूतासु। घटत्वाद्युपाधिना, सोपाधेरपि। द्रव्यत्वस्य निरुपाधित्वादिति। तथा च साध्यस्य रूपभेदानिवेशे रूपभेदेन एकसाध्यके सोपाधिनिरुपाधिभेदानुपपत्तिरिति भावः। साध्यस्य रूपभेदान्तर्भावफलमुक्त्वा साधनस्य रूपभेदान्तर्भावफलमाह। गुणत्वेनेति। रूपभेदान्तर्भावेन यादृशं लक्षणं तद्दर्शयति तथा चेति। रूपभेदपक्षे हेतुभूतधर्मिणोऽपि विशिष्टान्तर्भावे रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावस्योपाधितावारणं सम्भवतीति तदन्तर्भावं निराकरोति। न त्विति। अनुगमादिति। हेतुव्यक्तिभेदेनोपाधिताभेदस्य निष्प्रयोजनकत्वादित्यर्थः। धूमादौ साध्ये वह्नित्वाद्यवच्छिन्नमहानसीयवह्न्यादिहेतावप्यार्द्रेन्धनादेरनुपाधित्वानुपगमादिति भावः। तावता लक्षणे को दोष इत्यपेक्षायामाह। तथा चेति। पृथिवीत्वाभावादेरिति। रूपत्वावच्छिन्नतैजसरूपव्यक्त्यव्यापकताशून्यस्यापीति शेषः।

ननु साध्यव्यभिचारिसाधनाव्यापकत्वनिवेशे नायं दोषो वारणीय इत्यत आह। व्यभिचारित्वेनेति। तथा चास्मन्मत एव प्रवेश

इति भावः ।

(चि०) केचित्तु साधनव्यापकोऽप्युपाधिः क्वचिद् यत्र पक्षावृत्तिर्हेतुः । यथा करका पृथिवी काठिनसंयोगादित्यत्रानुष्णाशीतस्पर्शवत्त्वम् । न चात्र स्वरूपासिद्धिरेव दोषः, सर्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः ।

(दी०) उपाधिलक्षणे साधनाव्यापकत्वं न विशेषणम्, दूषकतायामनुपयोगात्, अव्याप्तिकरत्वाच्चेति सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनामभिप्रायं प्रकाशयति केचित्त्विति ।

(गा०) ननु साधनाव्यापकत्वघटितस्यैवोपाधिलक्षणस्योक्तत्वात् करका पृथिवी काठिनसंयोगादित्यत्र साधनाव्यापकस्य कथम् उपाधित्वस्वीकार इत्याशङ्कां निराकरोति । उपाधिलक्षण इति । दूषकतायाम् । सत्प्रतिपक्षोत्थापकतायाम् । व्यभिचारिणि साधने साध्यस्यापि निरुक्तोपाधिलक्षणाक्रान्ततयोपाधित्वे व्यभिचारसाधने तद्व्यभिचाररूपसाधनस्य साध्याविशेषादिदोषस्याकिञ्चित्करतया साध्यं च नोपाधिरिति मूलासङ्गतिपरिजिहीर्षया परं प्रत्युद्भाव्य इति पूरयिष्यन् साध्यतावच्छेदकावच्छिन्नसाध्यस्योपाधितयोद्भावने वक्ष्यमाणसाध्यविशेषादिदोषानवकाशात् तद्रूपावच्छिन्नोद्भावनखण्डनायोगात् साध्यविशेषणं पूरयति । साध्यतावच्छेदकावच्छिन्नमिति । साध्याविशिष्टत्वादिति मूलं धारयन् साध्याविशिष्टतया दूषकताबीजं पूरयति । पक्षे इति । पक्षे साधनरूपे । साधनस्य । साध्यात्मकोपाधिव्यभिचारस्य । अनुमानस्य । सिषाधयिषया सम्भवेऽपि वैयर्थ्यात् । हेतुनिश्चयेनैव व्याप्तिविज्ञानविघटनात् । अनिश्चये । पक्षे साधनस्येत्यनुषज्यते । तस्य । अनुमानस्य । यद्यप्युपाध्यन्तरव्यभिचारलिङ्गकव्यभिचारानुमापकपरामर्शस्यापि व्याप्तिज्ञानं प्रति व्यावर्त्तकधर्मदर्शनत्वेन विरोधितया सर्वत्रैव व्यभिचारानुमितिवैयर्थ्यम्, तथाप्युपाध्यन्तरोद्भावने तादृशपरामर्शसम्पादकतयैवोपयुज्यते, साध्यस्य च साध्याव्यापकताघटितोपाधितयोद्भावनम-

नुपयुक्तम्, उपाधिव्यभिचारे साध्यव्यभिचारव्याप्तिनिश्चयस्यैवो-पाधौ साध्यव्यापकतोपदर्शनफलत्वात्, साध्यव्यभिचारे तु सा-ध्यव्यभिचारव्याप्तिग्रहस्यानुपयुक्तत्वात्, तद्ग्रहमन्तरेणापि हेतौ तद्ग्रहस्य स्वतो व्याप्तिज्ञानप्रतिबन्धकत्वादित्यत्र तात्पर्यम्। हेतौ साध्यग्राहकतर्कसद्भावे सन्दिग्धोपाधेर्नानुमानोच्छेदकत्वम्, अतः साध्यस्य सन्दिग्धोपाधितया उद्भावनं स्वयं निराकरोति। हेताविति । कृतं सन्दिग्धोपाधिनेति । तत्कर्तव्यस्य व्यभिचार-संशयान्तरस्यानपेक्षणात् साध्ये उपाधित्वसंशयस्यैव साध्ये सा-धनाव्यापकत्वसंशयरूपत्वादिति भावः। कथमिति । साध्ये साध्य-व्यापकत्वसंशयायोगेन साधने तद्व्यभिचारसंशयरूपेण तत्र साध-नाव्यापकत्वसंशयेनैव सन्दिग्धोपाधित्वनिर्वाहादिति भावः।

(चि०) साध्यं च नोपाधिः, व्यभिचारसाधने साध्याविशिष्टत्वात्, अनुमितिमात्रोच्छेदप्रसङ्गाच्च । स चायं द्विविधः निश्चितः सन्दिग्धश्च । साध्यव्याप-कत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचार-निश्चयाधायकतया निश्चितोपाधिः । यथा वह्निमत्त्वे-न धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम् । यत्र च साधनाव्यापकत्वसन्देहस्साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशयाधाय-कतया सन्दिग्धोपाधिः ।

(गा०) मूले स चेति। उपाधित्वग्रहेणानुमानदूषकश्चेत्यर्थः, ईश्व-रसाधकसदनुमानेऽपि सन्दिग्धोपाधेरुदाहरणीयतया तस्य चानु-पाधित्वेन एतद्ग्रन्थस्य वास्तवोपाधिविभाजकत्वायोगात्। निश्चितः। उपाधित्वनिश्चयविषयः। सन्दिग्धः। तत्संशयविषयः। निश्चितोपाधिः। निश्चयविषयतयाऽनुमानदूषकः। तथा दूषकत्वे हेतुः व्यभिचारनि-श्चयाधायकतयेति। यत्र चेति। यत्र धर्मे त्वित्यर्थः। तत्र धर्मे। स-न्दिग्धोपाधिरिति भावप्रधानम्। तथा च संशयविषयतया दूषकत्व-मित्यर्थः। तथात्वे हेतुव्यभिचारसंशयाधायकतयेति। शाकपाक-जत्वादावुपाधित्वसंशयस्य साधने सोपाधित्वसंशयपर्यवसिततया

तत्र साध्यव्यभिचारसंशयाधायकतयेत्यर्थः ।

(दी०) साध्यतावच्छेदकावच्छिन्नम् साध्यं च नोपाधिः परं प्रत्युद्भाव्यः, साध्याविशिष्टत्वात् पक्षे साधनस्य निश्चयेऽनुमानस्य वैयर्थ्यात् अनिश्चये च तस्यायोगात् । सन्दिग्धोपाधित्वेनापि न तदुद्भावनमित्याह । अनुमितीति । हेतौ साध्यव्यभिचारस्सन्दिग्धश्चेत्कृतं सन्दिग्धोपाधिना ? असन्दिग्धश्चेत्कथं तस्य सन्दिग्धोपाधित्वमिति तु तत्त्वम् । हेतुव्यभिचारेति । व्याप्यसंशयस्य व्यापकसंशयहेतुत्वादिति भावः । न च तत्र मानाभावः, कोटिस्मरणादित एव तदुपपत्तेः, क्वचित्तदनुविधानस्यापि व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरणे एवोपक्षीणत्वात् । तदग्रहे तु तत्संशयाद्व्यापकसंशयाभावादिति वाच्यम् । महानसे हुताशनो न जलह्रदे इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां हुताशनसंशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वात् । अत एवोत्कटकोटिकाद्व्याप्यस्य संशयाद्व्यापकस्याप्युत्कटकोटिकः संशयः, कारणोत्कर्षेणैव कार्योत्कर्षात् । समानेत्यादिसूत्रं तूपलक्षणपरम्, तत्रस्थश्चकारो वाऽनुक्तसमुच्चयार्थ इति वदन्ति ।

(गा०) तत्संशयस्य व्यभिचारसंशायकत्वमेव कथमित्यत आह दीधितौ । व्याप्यसंशयस्येति । तथा च व्याप्यसंशयविधया व्यभिचारव्याप्यसोपाधित्वसंशयस्य तत्संशयाधायकत्वमिति भावः । तत्र । व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे । तस्य तदहेतुत्वे तद्दशायां तदुत्पादः कुतः कारणादित्यपेक्षायामाह । कोटिस्मरणादित इति । अवश्यकल्प्यहेतुभावादित्यादिः । तदुपपत्तेः । व्यापकसंशयोपपत्तेः । व्याप्यसंशयासत्त्वे क्वचिदनुत्पन्नस्य व्यापकसंशयस्य तदनन्तरमुत्पत्तेस्तद्धेतुत्वसिद्धिः स्यादित्यत आह । क्वचिदिति । तदनुविधानस्य । अन्वयव्यतिरेकानुविधानस्य । तत्स्मरणे एव । व्यापकतदभावरूपकोटिस्मरणे एव । उपक्षीणत्वात् । उपयोगितया चरितार्थ-

त्वात् । व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यग्रहस्थले व्याप्य-संशयस्य व्यापकतदभावास्मारकतया न कोटिद्वयोपस्थापकतया उपयोगित्वमित्यत आह । तदिति । तदग्रहे । साहचर्यग्रहे । तत्संशयात् । व्याप्यसंशयात् । व्यापकसंशयाभावात् । तादृशकारणाभावेनानुत्पादात् । प्रकारान्तरेण कोटिद्वयोपस्थितिस्थले इतरसकलकारणसत्त्वे व्याप्यसंशयान्वयव्यतिरेकाभ्यां व्यापकसंशयान्वयव्यतिरेकतस्तत्र तद्धेतुत्वं दुरपवादमेव, अन्यथा साधारणधर्मदर्शनादेः कोटिस्मरणादिनाऽन्यथासिद्धिः स्यादिति समाधत्ते । महानस इति । पर्वतादिकमपि पश्यतामित्यनेन धर्मिज्ञानसत्त्वं दर्शितम् । भावाभावाभ्यां भावाभावदर्शनादिति यथासङ्ख्यमन्वयः । अत एव । तस्य तद्धेतुत्वादेव । उत्कटकोटिकात् । व्याप्यांशे तदभावांशे वा उत्कटात् । उत्कटकोटिकः । व्याप्यांशे तदभावांशे वा उत्कटः । औत्कट्यं चाव्याप्यवृत्तिजातिविशेषो विषयताविशेषो वा । कारणोत्कर्षेणेति । कारणोत्कर्षस्यैव कार्योत्कर्षप्रयोजकत्वात्, तस्याकारणत्वे कोटिस्मरणादिरूपकारणस्याविशेषेण व्यापकसंशयौत्कट्यस्याकस्मिकतापत्तेरित्यर्थः । व्याप्यसंशयस्य साधारणधर्मदर्शनादितुरीयत्वे समानानेकधर्मोपपत्तेरित्यादिसूत्रविरोधः, संशयहेतुसाधारणधर्मदर्शनादित्रयस्यैव परिगणनादित्यत आह । समानेत्यादीति ।

तत्सूत्रं तु समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति । अस्यार्थः समान एको योऽनेकवां तत्कोटितदभावकोटिमतां धर्मः तत्तदभावसहचरितत्वेन तत्तदभावसहचरितवृत्तिधर्मवत्त्वेन वा गृहीतो गृह्यमाणो वा यो धर्म इति यावत्, तदुपपत्तेः धर्मिणि तद्वत्ताज्ञानात्, तादृशज्ञानस्य कोट्युपस्थितिद्वारा साक्षादेव वा हेतुत्वमिति हेत्वाभासे व्यक्तीभविष्यति । विप्रतिपत्तिः । एकधर्मिणि विरुद्धकोटिद्वयप्रतिपत्तिजनकं वाक्यद्वयं शब्दो नित्यो न वेत्यादिरूपम्, ततः तादृशवाक्ययोर्मिथो विरोधेन शाब्दबोधानुपधायकयोर्धर्मिणि कोटिद्वयोपस्थितिद्वारा मानससंशयजनकत्वम्, तादृशवाक्यज्ञानस्य तत्तद्धर्मिकतत्तत्कोटिसंशये तत्तद्धर्मिवाचकपदसाकांक्षतत्तत्कोटिवाचकपदज्ञानत्वेन हेतुता, त-

द्रूपावच्छिन्नजन्यत्वेऽपि संशयस्य न शाब्दत्वापत्तिः, विरोधिकोटि-
गोचरशाब्दसामग्र्यभावादिघटितसामग्रीजन्यत्वात् , तज्जन्यत्व-
स्यैव शाब्दत्वप्रयोजकत्वात् । तत्तत्कोटिप्रत्यक्षे तुल्यबलायास्तद्वि-
परीतकोटिप्रत्यक्षसामग्र्या इव तच्छाब्दबोधे विपरीतकोटिशाब्द-
सामग्र्या अपि प्रतिबन्धकत्वे मानाभावात् तत्र संशयाकार एव
शाब्दबोध इत्येकदेशिनः । उपलब्धिः । तत्कोटिनिश्चयः । अनुपल-
ब्धिः । तत्कोट्युपलब्धिविरोधिनी तदभावोपलब्धिः । तदव्यव-
स्था । धर्मिणि तद्विषयत्ववद्व्यावृत्तधर्मवत्त्वधीः, ततश्च तत्कोटिम-
द्व्यावृत्तत्वविशिष्टवत्ताज्ञानस्य तत्कोटिविशिष्टबुद्धिविरोधितया कोटि-
द्वयविशिष्टधीरूपसंशयजनकत्वासम्भवात् तत्तत्कोटिमत्त्वमुपेक्ष्य
स्वरूपसत्तत्कोटिनिश्चयविषयवत्त्वं धर्मिणि विशेषणतयोपात्तम् ।
अत्र च तत्तत्कालसहकृतस्य तत्तत्कालीनतत्तत्पुरुषीयतत्तत्कोटि-
निश्चयविषया ये ये तत्तद्धर्मिव्यावृत्तत्वज्ञानस्य संशयजनकत्वे
तत्तद्धर्मिव्यावृत्तत्वज्ञानाभावविशिष्टतत्तद्धर्मिकतत्तत्कोटिनिश्चयस्य
संशयप्रतिबन्धकत्वे वा गौरवमित्यालोच्य तत्तत्कोटिसहचरिता-
भावप्रतियोगित्वमेव ज्ञानागर्भमसाधारण्यं संशयप्रयोजकमिति दी-
धितिकृता वक्ष्यते । निरुक्तसाधारणधर्मदर्शनादित्रयस्य प्रत्येकमेव
संशयोपधायकता, तृणारणिमणीनां वह्न्युपधायकतावत्, चाक्षुष-
त्वादिभिः सङ्करेणेह प्रकृते जनकतावच्छेदकजातिकल्पनासम्भवा-
द्व्यभिचारः प्रकारान्तरेण वारणीयः । साधारणधर्मदर्शनादीनां सं-
शयहेतुत्वेऽपि तदसत्त्वे कोटिस्मरणादिघटिततुल्यबलकोटिभास-
कसामग्रीभ्यां विरोधग्रहसत्त्वेऽपि स्वस्वकार्यजनने बाधकाभावा-
त संशयो दुर्वारः, तादृश्योरपि प्रत्यक्षसामग्र्योः परस्परप्रतिरोध-
कत्वे साधारणधर्मदर्शनादिसत्त्वेऽपि संशयविलोपप्रसङ्ग इति संश-
यत्वस्य विषयताविशेषरूपतायामेव निर्वाहः, तथा सति तादृशवि-
षयताभिन्नविषयताया एव विरोधिकोटिग्रहसामग्रीप्रतिबध्यताव-
च्छेदकत्वोपगमात् तादृशविषयताप्रयोजकसाधारणधर्मदर्शनादितः
संशयनिर्वाहः, विरोधग्रहेण तद्ग्राहकसामग्र्या वा सहिताया एव
विरोधिकोटिभासकसामग्र्याः प्रतिबन्धकत्वान्न कोटिद्वयसमुच्चया-
नुपपत्तिरित्यादि बोध्यम् ।

साधारणधर्मदर्शनादिकमन्तरेणापि तुल्यबलसामग्रीभ्यां संश-

यो जन्यते, साधारणधर्मदर्शनादेः कोटिद्वयोपस्थापकतयैवोपयोग इति संशयत्वादेः कार्यतावच्छेदकत्वविद्वेषिणो नव्याः, तन्मते संशयत्वं न विषयताविशेषः. परन्तु एकधर्मिकभासमानविरोधिकोटिद्वयज्ञानत्वं तत्तत्सामग्रीसमाजप्रयोज्यमेवेति। विशेषापेक्ष इति विशेष्यते व्यावर्त्यते विशेषदर्शनविषयो ऽनेनेति विशेषो विशेषदर्शनम्, तदपेक्षस्तज्जन्यः, तादृशविशेषापेक्षत्वं संशयसामान्यस्यैव। विमर्शः। एकधर्मिणि विरुद्धकोटिद्वयज्ञानम् , तच्च संशयलक्षणमिति।

साधारणधर्मदर्शन एव व्याप्यसंशयस्यान्तर्भावनीयतया तस्य स्वतन्त्रतायामस्वरसो वदन्तीत्यनेन सूचितः।

(दी०) कोटिद्वयसहचरितधर्मवत्तया धर्मिज्ञानं हेतुः, धर्मस्यैकत्वं ज्ञानस्य च निश्चयत्वं नोपयुज्यते गौरवात्, अवगाहते च लिङ्गसन्देहो लैङ्गिकतदभावसहचरितौ लिङ्गतदभावौ धर्मिणः, तथा च साधारणधर्म एव तस्यान्तर्भाव इति तु नव्याः।

(गा०) नव्यमतमाह। कोटिद्वयेति। तत्तत्कोटिसहचरितधर्मवद्धर्मिज्ञानत्वेन साधारणधर्मवत्ताज्ञानं संशयहेतुरित्यर्थः। अत्र तत्तत्कोटिसहचरितधर्मयोः पृथगन्तर्भावेन कारणताद्वयम्, न तु कोटिद्वयसाहचर्यावच्छिन्नत्वद्वयं धर्मस्यैकविषयतायां निवेश्यैककारणत्वं कल्प्यते, येनोभयसहचरितधर्मभेदादेकस्यापि धर्मस्य विषयतायां साहचर्यावच्छिन्नत्वद्वयासत्त्वेन कोटिद्वयसहचरितव्याप्याभावोभयावगाहिसंशयो न सङ्गृहीतः स्यादित्याह। धर्मस्यैकत्वमिति। निश्चयत्वेन हेतुत्वे संशयासङ्ग्रहात् तत्परित्यागमपि स्फुटयति। ज्ञानस्य च निश्चयत्वमिति।

न च ज्ञानस्य निश्चयत्वाविवक्षणे कारणतावच्छेदकाभावप्रतियोगिन्यप्रामाण्यग्रहे निश्चयत्वस्य निवेशनीयतया गौरवमिति वाच्यम्। भवतामप्रामाण्यनिश्चयाभावविशिष्टत्वेन व्याप्यसंशयस्य हेतुत्वान्तरकल्पनेन महागौरवात्।

एतेन तत्तत्कोटिसहचरितधर्मवत्ताज्ञानस्य हेतुतायां तत्तद्धर्मविषयता अवश्यं विशिष्य निवेश्याः, साहचर्यावच्छिन्नविषयतात्वेन सकलधर्मविषयतानामनुगमे सकलधर्म्यघटितभ्रमत्वग्रहाणामभावकूटस्यैकत्र निवेशनीयतया एकधर्मघटितभ्रमत्वग्रहविषयधर्मा-

न्तरग्रहस्य संशयाजनकत्वापत्तेः, तथा च तत्कोटिसहचरिततद्धर्मवत्ताज्ञानस्य तदभावसहचरिततद्धर्मवत्ताज्ञानसहकारेणैव फलोपधायकत्वमुपेयते, न तु तादृशधर्मान्तरज्ञानसहकारेण गौरवादिति धर्मस्य एकत्वापेक्षेत्यादि परास्तम् । व्याप्यसंशयस्य पृथक्कारणत्वादिकल्पनापेक्षया लाघवेन तत्कोटिसहचरितैकधर्मवत्ताज्ञानेन फलजनने तदभावसहचरितधर्मान्तरवत्ताज्ञानस्यापि क्लृप्तकारणताकस्य सहकारित्वोपगमात् ।

यत्तु तत्तत्कोटिसहचरितधर्मवत्तानिश्चयजन्यसंशये तादृशधर्माणामपि धर्मितावच्छेदकतया भानमुपेयते, तथा च तत्र विशेष्यतावच्छेदकज्ञानविधयैव तादृशधर्मवत्तानिश्चयस्य हेतुत्वात् संशये न तस्य स्वतन्त्रहेतुत्वमिति व्याप्यसंशयस्य पृथक्कारणत्वमावश्यकमिति तदपि न । तत्कोटिसंशये तद्व्याप्यतद्व्याप्याभावोभयप्रकारज्ञानत्वरूपव्याप्यसंशयत्वेन हेतुत्वे व्याप्यतदभावप्रकारकत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहात्, सामानाधिकरण्यापेक्षया गुरुशरीरस्य व्याप्यत्वस्य निवेशे गौरवाच्च तत्तत्कोटिसहचरितधर्मवत्ताज्ञानत्वेन पृथक् पृथक् कारणत्वान्तरकल्पनाया एवोचितत्वात् । व्याप्यसंशयस्य कोटिद्वयसहचरितधर्मावगाहित्वं स्फुटयति । अवगाहते चेति । लिङ्गम् । व्याप्यम् । लैङ्गिकम् । व्यापकम् । लिङ्गतदभावयोर्लैङ्गिकतदभावसहचरितत्वस्य यथासङ्ख्यमन्वयः । व्याप्यसंशयदशायां व्याप्ये व्याप्तिघटकसहचारितत्वस्य ग्रहनियमेऽपि तदभावे व्यापकाभावसहचारग्रहो न नियत इति चेत्? एवमेव, परन्तु यदा व्यापकसंशयस्तदा तद्ग्रहोऽपि फलबलात् कल्प्यते, यत्र च तदग्रहस्तत्र व्यापकसंशयस्यैवापलाप इति भावः ।

(दी०) लिङ्गतदभावयोः प्रत्येकमेकैककोटिसाधारण्येऽपि मिलितयोरसाधारण्यम्, सत्प्रतिपक्षस्थले विरुद्धयोरिव हेत्वोरिति तु टीकाकारानुयायिनः ।

(गा०) सत्प्रतिपक्षस्थले विरुद्धहेतुद्वयज्ञानस्यासाधारणधर्मवत्ताज्ञानविधया साध्यसंशायकत्वम्, तदभावव्याप्यवत्ताग्रहप्रतिबन्धकतायां तद्व्याप्यवत्ताज्ञानस्योत्तेजकतया न हेतुरूपपरामर्शस्य संशयप्रतिबन्धकत्वमिति टीकाकारमतमनुसृत्य व्याप्यसंशयस्या-

ध्यसाधारणधर्मज्ञानान्तर्भावं वदतां मतमाह । लिङ्गेति । कोटिसा-धारण्येऽपि । कोटिसहचरितत्वेऽपि । मिलितयोरिति । उभयत्वाव-च्छिन्नयोरित्यर्थः । असाधारण्यम् । तत्तदभावव्यापकाभावप्रतियो-गित्वम् । उभयत्वावच्छिन्नाभावस्य तत्तत्कोटिव्यापकत्वग्रहे च व्यापकसंशयोऽपलपनीय एवेति भावः । हेत्वोरित्यत्र प्रत्येकमित्या-दिकं सर्वमनुषज्यते ।

अत्रेदमस्वरसबीजम्, शब्दत्वादेः शब्दत्वत्वादिना नित्यत्वादिम-द्व्यावृत्तत्वस्य जातित्वादिना च धर्मिवृत्तित्वस्य ग्रहे संशयानुदयात् येन रूपेणासाधारण्यग्रहस्तेनैव रूपेणासाधारणधर्मस्य धर्मिणि धीः संशयहेतुरुपेया, धूमादिसंशयस्य च धूमधूमाभावाद्युभयत्वेन उभ-याविषयकतया कथं संशायकता ? विरुद्धतया गृह्यमाणयोरेकवि-शिष्टेऽपरप्रकारकमिवोभयत्वेनोभयप्रकारकमपि ज्ञानमनाहार्यमनुभ-वविरुद्धमिति न संशयस्य तथात्वसम्भवः ।

यदि च तत्तद्रूपावच्छिन्नोभयत्वेनासाधारण्यग्रहसहिततत्त-द्रूपावच्छिन्नोभयवत्ताज्ञानस्य हेतुतायां तत्तद्रूपावच्छिन्नप्रकार-कत्वमेवावच्छेदकं न तूभयत्वसहिततत्तद्रूपावच्छिन्नप्रकारता-कत्वं गौरवादित्युच्यते, तथापि उभयत्वेनासाधारण्यग्रहसहितस्य भावाभावोभयवत्ताज्ञानस्यान्यत्र संशयहेतुताया अक्लृप्तत्वात्तामव-लम्ब्य व्याप्यसंशयत्वेन पृथक्कारणताखण्डनानुपपत्तिः, उभयत्वेन तत्तदभावव्यापकाभावप्रतियोगित्वज्ञानसाहित्यं निवेश्य भावाभावो-भयप्रकारकज्ञानहेतुतापेक्षया धूमादौ वह्न्यादिव्याप्यत्वग्रहसहितधू-मादितदभावप्रकारकज्ञानत्वरूपसंशयत्वेन हेतुतायामेव लाघवात्,

यदि चोभयत्वेनासाधारण्यग्रहसहितभावाभावोभयप्रकारकज्ञा-नहेतुता तदुभयसमुच्चयस्थले फलेत्युच्यते, तथाप्येतन्मते संशय-मात्रीयकोटिद्वयमात्रस्यैव मिलितस्यासाधारणतया व्यभिचारिजल-त्वादिसंशयाद्व्याप्यधूमादिसंशयस्याविशेषः ।

न च साधारणधर्मदर्शनान्तर्भावमतेऽपि जलत्वादेर्वह्न्याद्यभा-वस्य जलत्वाद्यभावस्य च वह्न्यादेः सहचरिततया तत्संशयविशेष इति वाच्यम् । व्याप्यत्वस्य व्यापकसामानाधिकरण्यनियततया व्याप्याभावत्वस्य च व्यापकाभावसामानाधिकरण्यनियततया तत्त-त्कोटिसाधारण्यग्राहकत्वेन संशयोपयोगितया तन्मते व्याप्यसंशय-

स्य संशयान्तरो विशेषात्, असाधारण्यग्रहे च व्याप्त्यादिग्रहस्यानुपयोगात्, एवमेकसम्बन्धेन तत्तत्कोटिमद्व्यावृत्तस्य सम्बन्धान्तरेण धर्मिणि ग्रहे संशयानुत्पत्त्या सम्बन्धैक्यमवश्यमपेक्षणीयम्, धूमतदभावयोश्च मिलितयोः संयोगेन विशेषणताविशेषेण वा व्यावृत्तत्वग्रहेऽपि धूमादिसंशये तादृशेन केनापि सम्बन्धेन धर्मिण्युभयप्रकारकताविरहेण कथं संशायकता ?

यत्तु अन्यतरसम्बन्धेन भावाभावोभयस्य व्यावृत्ततया तेन सम्बन्धेन च संशयस्योभयप्रकारकतया संशायकत्वमिति। तदसत् । यद्रूपावच्छिन्नसम्बन्धेन उभयत्वावच्छिन्नस्यासाधारण्यग्रहः अन्यतरत्वरूपतद्रूपावच्छिन्नस्य संसर्गतया संशये ऽभानात् । यद्रूपावच्छिन्नसम्बन्धघटितासाधारण्यग्रहस्तद्रूपाश्रयसम्बन्धेन धर्मिण्यसाधारणधर्मग्रहमात्रस्य संशायकत्वे शब्दत्वं नित्यसम्बन्धेनोभयव्यावृत्तमिति ग्रहदशायां समवायस्यानित्यत्वभ्रमेऽपि अखण्डोपाधिरूपसमवायत्वावच्छिन्नसम्बन्धेन शब्दत्वज्ञानस्य नित्यत्वादिसंशायकतापातादित्याद्युहनीयम ।

(दी०) इत्थं च साधनाव्यापकत्वसंशये साध्यव्यापकव्यभिचारसंशयात्साध्यव्यभिचारसन्देहो हेतौ स्फुट एव । साध्यव्यापकत्वसन्देहे तु साधनाव्यापकव्याप्यत्वसंशयात्साध्ये साधनाव्यापकत्वसन्देहो बोध्यः । उपाधेस्साध्यव्यापकत्वसन्देहेनाऽऽहितात्साधने साध्यव्यापकव्यभिचारसन्देहात् साध्यव्यभिचारसन्देह इत्थमेव च दलद्वये संशयस्थले व्यभिचारसंशयस्योक्तिसम्भव इत्यपि वदन्ति ।

(गा०) उपाधित्वघटकसाधनाव्यापकत्वादिसंशयस्य साध्यव्यभिचारव्याप्यसंशयपर्यवसानं दर्शयति । इत्थं चेति । साधनाव्यापकत्वसंशय इति । साध्यव्यापकतावच्छेदकतया निश्चिते शाकपाकजत्वत्वादौ साधनाव्यापकतावच्छेदकत्वसंशये सतीत्यर्थः । साध्यव्यापकव्यभिचारसंशयात् । स्वस्मिन् । तदव्यापकत्वस्य तस्मिन् स्वाभाववद्वृत्तित्वेन तुल्यवित्तिवेद्यतया साधने साध्यव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वसंशयपर्यवसानात् । स्फुट एवे-

ति । व्यापकव्यभिचारस्य व्याप्यव्यभिचारव्याप्यत्वादिति भावः। साध्यव्यापकत्वसन्देहे त्विति । साधनाव्यापकतावच्छेदकत्वनिश्चयविषयधर्मे साध्यव्यापकतावच्छेदकत्वसंशये त्वित्यर्थः । साधनाव्यापकव्याप्यत्वसंशयादिति । व्यापकत्वव्याप्यत्वयोस्तुल्यवित्तिवेद्यतया साध्यतावच्छेदके साधनाव्यापकतावच्छेदकावच्छिन्नव्याप्यतावच्छेदकत्वघटकसाधनाव्यापकतावच्छेदकत्वव्याप्यधर्मसंशयादित्यर्थः । साध्ये । साध्यतावच्छेदके । साधनाव्यापकत्वसन्देहः । साधनाव्यापकतावच्छेदकत्वरूपव्यभिचारसंशयः । अत्र साधने उपाधिव्यभिचारस्य निश्चितत्वेन संशयायोगात् तत्र तत्संशयाधीनसाध्याभाववद्वृत्तित्वसंशयानवकाश इत्याशयः । तत्रापि हेतुधर्मिकसाध्याभाववद्वृत्तित्वरूपव्यभिचारसंशयमुपपादयितुमत आह । उपाधेरिति । उपाधेः । उपाधितावच्छेदकस्य । साध्यव्यापकत्वसन्देहेन । विशेषणीभवत्साध्यव्यापकत्वसंशयेन । आहितात् । साधने साध्यव्यापकतावच्छेदकत्वविशेषितोपाधितावच्छेदकत्वावच्छिन्नाभाववद्वृत्तित्वसंशयादित्यर्थः । अत्र च संशये साध्यव्यापकतावच्छेदकत्वस्य उपलक्षणतयैवाभावप्रतियोगितावच्छेदकतया भासमानोपाधितावच्छेदके भानम्, उपाधितावच्छेदकतया भानासम्भवात्, तादृशभाने तन्निश्चयस्यापेक्षितत्वात् ।

न च व्यापकतावच्छेदकत्वमात्रेणैवोपाधितावच्छेदकभानं न तु तद्गतासाधारणरूपेणापीति तादृशसंशयस्य व्यापकतावच्छेदकत्वांशे निर्धर्मितावच्छेदकतयाऽवच्छेदकतया भानेऽपि न तन्निश्चयोऽपेक्षित इति वाच्यम् । व्यापकतावच्छेदकमेयत्वादिविशिष्टस्य केवलान्वयितया व्यापकतावच्छेदकत्वविशिष्टावच्छिन्नाभावस्याप्रसिद्ध्या संशयेनास्पर्शात् ।

न च व्यापकतावच्छेदकत्वोपलक्षिततद्धर्मावच्छिन्नाभाववद्वृत्तित्वसंशयोऽपि दुर्घटः, तद्धर्मावच्छिन्नाभाववद्वृत्तित्वनिश्चयस्य तद्विरोधित्वादिति वाच्यम् । उपलक्षणीभूतव्यापकतावच्छेदकत्वमात्रपुरस्कारेणोपाधितावच्छेदकभानोपगमात् तत्तद्धर्मावच्छिन्नाभाववद्वृत्तित्वनिश्चयस्य च विशेषतत्तद्धर्मावगाहितत्तद्धर्मावच्छिन्नाभाववद्वृत्तित्वसंशयं प्रत्येव विरोधितया व्यापकतावच्छेदकत्वमात्रेण तदवगाहिसंशयस्याप्रत्यूहत्वात् ।

न च विशेषणसन्देहाद्विशिष्टसंशयो भवन् विशेषणसंशयधर्मितावच्छेदकमवश्यमुल्लिखतीति नियमः प्रामाणिकः, दण्डी पुरुष इति निश्चयादशायां पुरुषस्य दण्डो रक्तो न वेति संशयात् रक्तदण्डवान् पुरुष इत्यादिनिश्चयासत्त्वे रक्तवान् न वा पुरुष इत्यादिसंशयस्योपगमात् ।

न चाभावप्रतियोगितावच्छेदकतया तदवच्छेदकतया वा भासमाने नोपलक्षणस्य प्रकारतया भानम्, नीलो घटो नास्तीत्याद्याकारकस्य घटादिसामान्याभावग्रहस्य नीलदण्डवान्नास्तीत्याकारकस्य दण्डव्यादिसामान्याभावादिग्रहस्य वाऽननुभविकत्वादिति कथं व्यापकतावच्छेदकत्वमुपलक्षणतया साध्यतावच्छेदकेऽवगाहमानो व्यापकव्यभिचारसंशय इति वाच्यम् । प्रतियोगिताया यत्र प्रतियोगिसंसर्गतया भानं तत्रैव तथा नियमात् । अत्रोपाध्यभावे उपाधितावच्छेदकावच्छिन्नप्रतियोगितायास्तादृशरूपावच्छिन्नाभाववद्वृत्तित्वाभावे तादृशाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च प्रकारतयैव भानोपगमात् । इत्थमेव चेति । विशेषरूपावच्छिन्ने यत्र धर्मिणि यद्रूपं सन्दिग्धं विशेषरूपावच्छिन्नतद्रूपावच्छिन्नतद्धर्मिघटितकोटितावच्छेदकावच्छिन्नविषयकसंशयोपगमेनैवेत्यर्थः ।

दलद्वयेति । साध्यव्यापकत्वसाधनाव्यापकत्वोभयेत्यर्थः । उक्तिसम्भव इति । अन्यथा साधनाव्यापकत्वनिश्चयस्थले साध्यव्यापकत्वसन्देहे साध्ये साधनाव्यापकव्याप्यत्वसंशयात् साधनाव्यापकत्वसन्देहसम्भवेऽपि यत्र साधनाव्यापकत्वमप्युपाधौ सन्दिग्धं तत्र साध्यव्यापकत्वस्य सन्दिग्धतया साधने साध्यव्यापकोपाधिव्यभिचारस्यैव साध्ये सन्दिग्धसाधनाव्यापकत्वविशेषितोपाधिव्याप्यत्वस्यापि संशयासम्भवेन व्यभिचारसंशयाधानानिर्वाहादिति भावः । साधनाव्यापकत्वनिश्चयस्थले उक्तरीत्या साध्ये साधनाव्यापकत्वसंशयस्यानुमित्यौपयिकव्यापकतानिश्चयत्वविरोधिनः सुघटतया हेतौ साध्याभाववद्वृत्तित्वसम्पादनाय प्रयासो विफल इत्यस्वरसो वदन्ति इत्यनेन सूचितः ।

(चि०) यथा मित्रातनयत्वेन श्यामत्वे साध्ये

शाकाद्याहारपरिणतिजत्वम् । न च तेनैव हेतुना शाकपाकजत्वमपि साध्यम्, तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधने ऽर्थान्तरम् । श्यामत्वमात्रे विवादो न तूभयत्र । न चैवं धूमाद्वह्न्यनुमानेऽपि वह्निसामग्र्युपाधिस्स्यात् । तत्र वह्निनेव तत्सामग्र्याऽपि समं धूमस्यानौपाधिकत्वनिश्चयात्, अत्र तु मित्रातनयत्वव्याप्यश्यामसामग्र्या स्यातव्यमित्यत्र कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावात् । अत एव साध्यसामग्र्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः, यत्र तु तन्नास्ति तत्र साऽप्युपाधिरित्यभिसन्धाय सामग्री च क्वचिन्नोपाधिर्न तु सर्वत्र इत्युक्तम् । यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादिः, यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे ।

(दी०) उभयेति । एकांशेऽपरस्यैकविशिष्टापरसाध्यतायान्तु एकैकस्योपाधित्वमिति तु तत्त्वम् । ईश्वरेति । वस्तुतः सद्धेतावपि तत्त्वाग्रहदशायामुपाधिसन्देहेन व्यभिचारसन्देह इति भावः ।

(गा०) परार्थस्थले सन्दिग्धोपाधितया उद्भावितस्य शाकपाकजत्वस्य साधनाव्यापकत्वसंशयनिरासाय श्यामत्वसंशयविषयमित्रातनये शाकपाकजत्वसाधने श्यामत्वस्योपाधित्वं मणिकारेणोक्तम्, युगपदुभयसाधने साध्यतया न कस्याप्युपाधित्वसम्भव इत्यभिमानेन युगपदुभयसाधनमाशङ्क्य चार्थान्तरेण तद् दूषितम् । तत्र च श्यामत्वे इव शाकपाकजत्वेऽपि विवादसम्भवान्नार्थान्तरमित्यालोच्य एकदा उभयानुमानमुपाधिनैव स्वयं दूषयति ।

एकांशेऽपरस्येति । उपाधित्वमित्यग्रिमेणान्वयः । साध्यं च नापो-धिरिति प्रवादस्य तद्रूपावच्छिन्नसाधने तद्रूपावच्छिन्नस्य नो-पाधितयोद्भावनमित्यर्थकत्वादिति भावः ।

नन्वस्तु विभिन्नरूपेणोभयसाधने एकांशे ऽपरस्योपाधित्वम्, उभयत्वेनैकविशिष्टापरत्वेन वोभयं साधनीयमित्यत आह । एकवि-शिष्टापरेति । उभयत्वावच्छिन्नस्याप्युपलक्षणमेतत् । एकैकस्येति । प्रत्येकरूपावच्छिन्नस्य उभयस्यैवेत्यर्थः । साध्यस्य भिन्नरूपेणो-पाधितायामविवादादिति भावः ।

मूले न चैवमिति । एवम् । साध्योत्पादप्रयोजकशाकपाकजत्वस्य साधनाव्यापकत्वसंशयेन सन्दिग्धोपाधित्वे । वह्निसामग्री । वह्न्यु-त्पादप्रयोजिका सामग्री । उपाधिः । सन्दिग्धोपाधिः । स्यात् । अनौ-पाधिकत्वनिश्चयात् । व्याप्तिग्राहकतर्कसम्भवेन तन्निश्चयात् । तथा च साधनाव्यापकत्वसंशयायोगेन न तत्सामग्र्याः सन्दिग्धोपाधित्वम-पीति भावः । श्यामसामग्र्या । शाकपाकजत्वेन । व्याप्य स्थातव्यम् । व्यापनीयम् । इत्यत्र । इति निश्चयविषयतयाऽभिमतयोर्मित्रातनय-त्वशाकपाकजत्वयोः । कार्यकारणभावादीनामभावात् । अभावेन ता-दृशनिश्चयासम्भवात् । अत्र हेतुगर्भविशेषणं व्याप्तिग्राहकाणामिति । साध्यव्यापकतासंशयेन सन्दिग्धोपाधिमुदाहरति । यथा तुल्य-योगक्षेमयोरिति । सतोरिति शेषः । योगक्षेमयोस्तुल्यत्वे सती-त्यर्थः । साध्ये साधनस्य उपाधौ च साध्यस्य व्यापकताग्राहकसा-मग्रीसाम्य इति यावत् ।

नन्वीश्वरसाधकसदनुमाने कथं शरीरजन्यत्वादेरुपाधित्वमु-क्तमित्यत आह । दीधितौ वस्तुत इति । वस्तुगत्येत्यर्थः । तत्त्वाग्रह-दशायाम् । अनुकूलतर्कानवतारेण सद्धेतुत्वाग्रहदशायाम् । उपा-धिसन्देहेन शरीरजन्यत्वादावुपाधित्वसंशयेन । व्यभिचारसन्देह इति । अतोऽनुपाधेरपि तस्य उपाधित्वसंशयविषयतया दूषक-त्वमिति शेषः ।

उभयसंशयस्थलमुदाहरति मूले । यथा चेति । सन्दिग्धानैका-न्तिकवदिति दूषकत्वमात्रांशे दृष्टान्तः । तथा च व्यभिचारसन्दे-हस्येव उपाधिसन्देहस्याप्युद्भावनं युज्यत एवेति भावः ।

(चिं०) यत्तु उपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति । तन्न, सन्दिग्धानैकान्तिकवद्व्यभिचारसंशयाधायकत्वेन दूषकत्वात् ।

(दी०) सन्दिग्धेति । न चानैकान्तिकत्वसन्देहः प्रतिबन्धको न तु तज्ज्ञानमिति तदर्थं तदुद्भावनमफलमिति वाच्यम् । अनैकान्तिकत्वसंशयान्मम व्याप्तिग्रहो मा भूदित्यभिप्रायेण प्राचां हेतुदोषत्वेनासाधकतासाधकतया जिज्ञासादिद्वारा परम्परया सन्देहोपयोगित्वेन च तदुद्भावनस्य साम्प्रदायिकत्वात् । उपाधित्वस्य संशये निश्चये च जायमानं यज्ज्ञानमनुमितिं विरुणद्धि तदेवास्य दूषकताबीजमित्यभिप्रायेणाह । सन्दिग्धेति । तद्व्यतिरेकस्य क्वचिद्व्यापकत्वेन क्वचिच्च पक्षधर्मत्वेन सन्दिग्धत्वाद् बाधोन्नीतेति ।

(गा०) व्यभिचारसंशयोद्भावनमेव न घटत इत्याशङ्कते दीधितौ । न चेति । न तु तज्ज्ञानामिति । न व्यभिचारसंशयस्य विषयो हेतुरिति संशयज्ञानं प्रतिबन्धकमित्यर्थः । तदर्थम् । सन्देहज्ञानफलकम् । अफलम् । अनुपयुक्तफलम् । तथा च सन्दिग्धोपाधेर्व्यभिचारसंशयाधायकतया दूषकत्वेऽपि तत्सन्देहोद्भावनं सुतरामफलमिति भावः । मा भूत् । न भवति । इत्यभिप्रायेण । एतदर्थबोधनेच्छया । तवात्र व्याप्तिरनुमता नवेति प्रतिवादिनं प्रति मध्यस्थानुयोग उक्ताभिप्रायेण व्यभिचारसंशयोद्भावनसङ्गतावपि, तादृशानुयोगं विना तदुद्भावनमसङ्गतम्, अतस्तदपि प्रकारान्तरेण सङ्गमयति । प्राचामिति । दोषेणैवासाधकत्वसाधनं साम्प्रदायिकमते उक्तं प्राचां हेतुदोषत्वेनेति । ज्ञायमानं सद्यदनुमितिविरोधीति तस्यैव स्वमते हेतुदोषतया व्यभिचारसन्देहस्य च स्वरूपसत एव तथात्वेन न तथात्वसम्भव इत्यत उक्तं प्राचामिति । एतदनुशयेनैव प्रकारान्तरमाह । जिज्ञासादिद्वारेति । प्रतिवादिना स्वसंशयो

द्भावने संशयप्रयोजकजिज्ञासोदयेन तत्प्रयोजकरूपप्रतिसन्धाने सति सामग्रीवशान्मध्यस्थस्यापि संशयो भवतीति संशयोद्भावनस्य संशयोपयोगित्वेन तस्य सम्प्रदायसिद्धत्वादित्यर्थः । परम्परया यदुद्भावनं संशयोपयोगि तस्याप्युद्भावने ऽन्येषामपि तथाविधानामुद्भावनप्रसङ्ग इत्याशङ्कावारणाय साम्प्रदायिकत्वादित्युक्तम् । तथा चान्येषां तथाविधानामुद्भावनमसाम्प्रदायिकत्वान्न क्रियत इति भावः ।

(चि०) उपाधेरिव व्यभिचारनिश्चयाधायकतया इदानीमुपाधेर्दूषकताबीजं निरूप्यते । नाप्यस्य व्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वम, तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् । न च प्रतिपक्षबाहुल्येनाधिकबलार्थमुद्भावनम्, शतमप्यन्धानां न पश्यतीति न्यायात्, एकेनापि बहूनां प्रतिबन्धाच्च । व्याप्तिपक्षधर्मते हि बलम्, तच्च तुल्यमेव, न तु भूयस्त्वमपि, एकस्मादप्यनुमितिदर्शनात् । सन्दिग्धोपाधेरदूषकतापत्तेश्च, तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वात् । अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात्, व्यतिरेकेऽसाधारण्यात् ।

(गा०) मूले प्रतिपक्षबाहुल्येनाधिकबलार्थमिति । प्रतिपक्षः । प्रतिसाध्यसिद्धेर्विरोधी प्रकृतसाध्यसाधको हेतुः, तस्य बाहुल्यमनेकता, तदभिन्नं यदधिकबलं तदर्थमित्यर्थः । उद्भावनमित्यत्र न चेत्यस्य सम्बन्धः । अत्र हेतुः व्याप्तिपक्षधर्मते हीत्यादि । हि । यस्मात् । व्याप्तिपक्षधर्मते । तयोर्ज्ञानम् । बलम् । शतमपीति । व्याप्तिपक्षधर्मताज्ञानासत्त्व इत्यादिः । कार्यप्रयोजकस्य कस्यचिद्विरहे एकजातीयानेककारणान्तरसत्त्वेऽपि फलानुत्पत्तिरिति न्यायेन भूयोभिरपि प्रतिहेतुभिरनुमितिप्रतिबन्धरूपफलानिर्वाहादित्यर्थः । एकेनापीति । व्याप्तिपक्षधर्मताभ्यां ज्ञायमानेनेत्यादिः । प्रतिबन्धात् । कार्यस्य । व्याप्तिपक्षधर्मताभ्यां एकमात्रहेतुज्ञानस्यापरानुमितिबन्धकताप्रयो-

जकं विरोध्यनुमितिसामग्रीत्वं दर्शयति । एकस्मादपीति ।

ननु सन्दिग्धोपाधेरदूषकतापत्तेरिति मूलमसङ्गतम्, तस्य सत्प्रतिपक्षोन्नायकत्वासम्भवेऽपि व्यभिचारसंशयाधायकत्वेन दूषकत्वसम्भवादित्याशङ्क्याह दीधितौ । उपाधित्वस्येति । उपाधित्वस्य संशयो निश्चयश्चानुमितिविरोधियद्विषयकज्ञानजनकस्तद्विषयकज्ञानजनकत्वमेवास्य सन्दिग्धोपाधेर्दूषकताबीजमिति नियमाभिप्रायेणेत्यर्थः । तथा च सत्प्रतिपक्षोत्थापकत्वेन निश्चितोपाधेर्दूषकत्वमते उपाधित्वनिश्चयस्य नानुमितिविरोधिव्यभिचारज्ञानजनकत्वमिति न तत्संशायकतया सन्दिग्धोपाधेर्दूषकतासम्भवः । अस्येत्यत्रेदंशब्दस्य नोपाधिसामान्यपरत्वम्, तथा सत्युपाधित्वसंशयस्य साध्यव्यापकाभावज्ञानजनकतया दूषकत्वान्निश्चितोपाधेरपि तद्द्वारा दूषकत्वानुपपत्त्या उपाधिमात्रस्यैवादूषकतापत्त्या सन्दिग्धेत्यभिधानासङ्गतेः । सन्दिग्धोपाधेः सत्प्रतिपक्षानुत्थापकत्वे तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वादिति मूलोक्तहेतुर्न साधकः, साधनाव्यापकत्वेन निश्चितस्य साध्यव्यापकत्वेन च सन्दिग्धस्योपाधेर्व्यतिरेकस्य पक्षे सन्दिग्धत्वादिति पूरयन् व्याचष्टे तद्व्यतिरेकस्येति । क्वचिदिति । साध्यव्यापकतासंशयस्थल इत्यर्थः । क्वचिच्चेति । साधनाव्यापकत्वसंशयस्थले चेत्यर्थः ।

(चि०) पक्षवृत्तिश्चोपाधिर्न स्यात्, यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्यत्वम्, अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वम्, तद्व्यतिरेकस्य पक्षावृत्तित्वात्, न च नायमुपाधिः, तल्लक्षणसत्त्वात्, अन्यथाऽपि दूषकत्वसम्भवाच्च, किञ्च साध्यव्यापकव्याप्यत्वेनोपाधेस्साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः ? न ह्यव्यापकव्यतिरेकादव्याप्यव्यतिरेकः । नापि व्याप्तिविरहरूपतया, असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात् । नाप्यनौपाधिकत्वज्ञानस्य, व्याप्तिधीहेतुत्वस्य तत्त्वेन

व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धावन्त-र्भावः । न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्या-पकत्वज्ञानमन्यव्याप्तिज्ञानं प्रति प्रतिबन्धकमि-त्युक्तम् ।

(दी०) ननु बाधे ऽवतीर्णे तत एव हेतोरसाधकत्वात्कृ-तमुपाधिना, न वाऽसाधारण्यम्, पक्षस्यैव सपक्षत्वात्, अवतीर्णे तु नोपाधित्वम्, पक्षेतरान्तरवत्साध्यव्यापकताया एवाग्रहात् अनुकूलतर्कादिना कथञ्चित्तद्ग्रहे च नासाधारण्यम् व्यतिरेकि-तयाऽन्वयव्याप्त्यग्रहस्य सत्प्रतिपक्षतया च सत्प्रतिपक्षान्तरस्या-किञ्चित्करत्वात्, इत्यरुचेराह । पक्षवृत्तिश्चेति । पक्षे तद्ग्रहदशायां तदभावग्रहासम्भवादिति भावः । व्याप्तिविरहरूपतां निरस्य व्याप्तिज्ञानाभावद्वारकतां निरस्यति । नापीति । अनौपाधिक-त्वज्ञानस्य । औपाधिकत्वज्ञानाभावस्य । कारणविघटकतया । कारणाभावरूपतादृशज्ञानविषयतया । अनौपाधिकत्वज्ञानस्य का-रणत्वं नान्वयव्यतिरेकासिद्धम्, परन्तु सोपाधित्वज्ञानस्य प्रति-बन्धकताया विना कारणीभूतज्ञानविघटनमसम्भवित्वेन कल्पनी-यम्, सैव त्वसिद्धेति दूषणतात्पर्याद्यथाश्रुतमेव साधीय इत्यपि वदन्ति । व्याप्यत्वासिद्धेर्व्याप्यत्वज्ञाने । अन्तर्भावः तद्-द्वारा दूषकत्वम् ।

(गा०) बाधोन्नीतेत्यादि दूषणमुद्धृत्य दूषणान्तरमवतारयति न न्वित्यादिना । बाधे वह्न्यादावुष्णत्वादौ । निश्चत इत्यर्थः । तत एव । बाधावतारादेव । हेतोः । कृतकत्वादेः । असाधकत्वात् । अनुष्णत्वादेर-साधकत्वात् । कृतमुपाधिनेति । तथा च तदा पक्षेतरस्यादूषकत्वेऽ-पि क्षतिविरहादिति भावः । सपक्षत्वात् । साध्याभावरूपसाध्य-वत्त्वेन निश्चितत्वात् । हेतोश्च तदव्यावृत्तत्वादिति शेषः । अनव-तीर्णे त्विति । बाध इत्यनुषज्यते । नोपाधित्वम् । नैव दूषकत्वम् ।

पक्षेतरान्तरवदिति। पर्वतो वह्निमानित्यादिस्थलीयपक्षेतरत्व इवे-
त्यर्थः। साध्यव्यापकतया एवाग्रहादिति। पक्षे साध्यसन्देहस्य
व्यभिचारसंशयतया साध्यव्यापकतानिश्चयप्रतिबन्धकत्वादिति भा-
वः। व्यापकताग्राहकानुकूलतर्कसत्त्वे व्यभिचारसंशयो ऽकिञ्चि-
त्कर इत्यत आह। अनुकूलेति। आदिपदात् स्वतःसिद्धव्यभिचा-
राग्रहपरिग्रहः। नासाधारण्यम्। तदभावस्य दोष इति शेषः। व्य-
तिरेकितया। साध्याभावगमकतौपयिकसाध्यव्यापकतानिश्चय-
विषयप्रतियोगिरूपव्यतिरेकप्रतियोगितया। अन्वयव्याप्त्यग्रहस्य।
असाधारण्यप्रयुक्तस्य। अकिञ्चित्करत्वादित्यग्रिमेणान्वयः। स-
त्प्रतिपक्षतया। प्रतिरोधमात्रफलकतया। सत्प्रतिपक्षान्तरस्य।
असाधारणतया विरोधिसाध्यसिद्ध्यौपयिकव्यापकतान्तरग्रहविष-
यप्रतियोगित्वकस्य। पक्षवृत्तिश्चेति मूलं पक्षवृत्तितया गृह्यमाणपर-
मित्याशयेन तस्य दूषकत्वानुपपत्तिबीजमाह। पक्ष इति।

मूले तल्लक्षणसत्त्वादिति। साध्यव्यापकत्वे सति साधनाव्या-
पकत्वरूपलक्षणसत्त्वादित्यर्थः। साधनाव्यापकत्वस्थले पक्षावृत्ति-
त्वप्रवेशे उक्तधर्मेषु लक्षणासत्त्वनिर्वाहमालोक्य अन्यथाऽपीति। व्य-
भिचाराद्युन्नायकतया ऽपीत्यर्थः। दूषकत्वसम्भवादिति। तथा च
नोपाधित्वानभ्युपगमसम्भव इति भावः। साध्याव्यापकत्वे। साध्या-
व्यापकत्वग्रहे। अव्यापकेति। अव्यापकत्वेन गृहीतेत्यर्थः। अ-
व्याप्येति। अव्याप्यतया गृहीतेत्यर्थः।

नापि व्याप्तिविरहरूपतयेत्यादिना व्याप्यत्वासिद्ध्यन्तर्भावशङ्काया
निराकृतत्वात्। नाप्यनौपाधिकत्वेत्यादिना पुनस्तदन्तर्भावशङ्का-
निराकरणस्यासङ्गतिरित्याशङ्कां निराकरोति दीधितौ। व्याप्तिविर-
हेति। अत्रानौपाधिकत्वज्ञानरूपव्याप्तिज्ञानकारणविघटकतयोपाधि-
त्वज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वं यथाश्रुतार्थः, तदर्थपरत्वे भि-
न्नधर्मकतया उपाधित्वप्रकारकज्ञानस्य स्वतो व्याप्तिज्ञानप्रतिबन्ध-
कताखण्डनमनाशङ्कितनिराकरणमित्याशङ्क्य तद्ग्रन्थं व्याप्तेरनौपा-
धिकत्वरूपताविरहेऽपि व्याप्तिग्रहे स्वत उपाधिज्ञानं प्रतिबन्धकमि-
त्यर्थकतया व्याचष्टे। अनौपाधिकत्वेति। औपाधिकत्वज्ञानं साध्य-
व्यापकत्वसाधनाव्यापकत्वाभ्यां कस्यचिद्धर्मिणो ज्ञानम्, न तु सा-
धनधर्मिकं स्वाव्यापकसाध्यव्यापकत्वज्ञानम्, असमानधर्मिकतया

प्रतिबन्धकताखण्डनपराग्रिममूलग्रन्थासङ्गतेः । अभावरूपकारणप्रतिबन्धकासम्भवाद्विघटकपदस्य प्रतिबन्धप्रयोजकार्थकता न सम्भवतीत्यन्यथा व्याचष्टे । कारणेति । तादृशज्ञानेति । औपाधिकत्वज्ञानेत्यर्थः । असिद्ध्यन्तर्भावनायोपाधिनिष्ठतासम्पत्तये ज्ञानविषयतापर्यन्तानिवेशनम् । यथाश्रुतेऽप्यग्रिमदूषणग्रन्थं सङ्गमयतां मतमाह । अनौपाधिकत्वज्ञानस्येति । विनाकारणीभूतज्ञानविघटनं सोपाधित्वज्ञानस्य प्रतिबन्धकताया असम्भवित्वेनेति योजना । सोपाधित्वज्ञानस्येति । भिन्नधर्मितासम्पत्तये पूर्ववद्व्याख्येयम् । असम्भवित्वेनि । जनकज्ञानं विघटयत एवेत्यादिनियमादिति भावः । सैव । तस्य प्रतिबन्धकतैव । असिद्धा । भिन्नधर्मिकत्वात् । सोपाधित्वज्ञानप्रतिबन्धकतया अनौपाधिकत्वज्ञानहेतुत्वसाधकतया शङ्कितुरभिप्रतत्वे उपाधिज्ञानस्य साक्षात्प्रतिबन्धकस्य कारणाविघटकत्वकथनासङ्गतिरिति तत्प्रतिबन्धकतायाः शङ्कितुरनभिप्रेततया तन्निराकरणानौचित्यमत्रास्वरसबीजम् । व्याप्त्याद्यभावानात्मकत्वे व्याप्यत्वासिद्धहेत्वाभासेऽन्तर्भावासम्भवात् व्याप्यत्वासिद्ध इत्यादिकं कथितव्याप्तिज्ञानाभावद्वारकत्वार्थकतया व्याचष्टे । व्याप्यत्वासिद्ध इति ।

(चिं०) न च साध्यव्यापकाव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्याप्यत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यम् । न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणम्, येन तत्प्रतिबन्धकं स्यात्, किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा । नापि व्यभिचारोन्नायकत्वेन, यथा हि साध्यव्यापकव्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयम्, व्याप्तिग्राहकसाम्यात् । नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया, साध्यव्याप्याव्यापकत्वेनोपाधे-

रेव साध्याव्यापकत्वसाधनात् । तस्मादुपाधिर्हेत्वाभासान्तरमिति ।

(दी०) भिन्नधर्मिकत्वं परिहरन्नाह । न चेति । न हीति । विरोधिविषयकत्वाभावेन साक्षात्प्रतिबन्धकत्वासम्भवादिति भावः । साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमित्युभयत्रैव बहुव्रीहिः । तस्मादित्यादेरदूषणं वेति शेषः ।

(गा०) भिन्नधर्मिकत्वापरिहारेण न चेत्यादिना उपाधिज्ञानदशायां व्याप्तिज्ञानोत्पत्त्यसम्भवकथनेन तस्य प्रतिबन्धकत्वव्यवस्थापनं न सङ्गच्छते, तद्दशायामन्यत्र व्याप्तिज्ञानानुत्पादस्य परासिद्धत्वादिति भिन्नधर्मिकत्वपरिहारेण सोपाधित्वग्रहस्य व्याप्तिग्रहानुत्पादप्रयोजकत्वप्रदर्शनपरतां तद्ग्रन्थस्याह । भिन्नेति । बाधादिबुद्धेर्विशिष्टबुद्धाविव जनकज्ञानाविरोधित्वेऽपि सोपाधित्वज्ञानस्य समानधर्मिकव्याप्तिज्ञाने प्रतिबन्धकत्वं सम्भवतीति कथं न हीत्यादिना जनकज्ञानाविरोधित्वेन तत्प्रतिबन्धकताखण्डनमित्याशङ्कानिराकरणाय प्रकृते बाधादिबुद्धिवैधर्म्यं दर्शयति । विरोधीति । ग्राह्याभावादीत्यर्थः । असम्भवादिति । ग्राह्याभावाद्यविषयकज्ञानस्य साक्षादप्रतिबन्धकत्वनियमादिति भावः ।

मूले येनेत्यस्य कारणविघटनद्वारेति शेषः । तर्हि किन्द्वारेत्याकाङ्क्षायामाह । किन्त्विति ।

तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमिति मूलस्य यथाश्रुतासङ्गतिः, उपाधौ साध्यव्यभिचारज्ञानस्य उपाधित्वघटकसाध्यव्यापकताज्ञानाविरोधितया ऽप्रसक्तत्वात् साध्यव्याप्याव्यभिचारस्य साध्य एव साध्यव्यभिचारव्यभिचारितया तदनुमापकत्वात् , इत्यतो व्याचष्टे । उभयत्रैव बहुव्रीहिरिति । साध्यव्याप्यव्यभिचारि यस्येति बहुव्रीहिणा तृतीयान्तस्य व्याप्याव्यापकत्वेनेत्यर्थः, साध्यं व्यभिचारि यस्येति बहुव्रीहिणा चरमपदस्य साध्याव्यापकत्वमित्यर्थः । इति नोक्तदूषणद्वयावकाश इति भावः । क्लृप्तदोषानन्तर्भावे उपाधेरदूषकत्वमपि सम्भवतीति उपाधिर्हेत्वा-

भासान्तरमिति निर्भरो नोपपद्यत इत्यतः पूरयति । अदूषणं वेति(१) ।

(चि०) उच्यते । आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीजचिन्तनम्, यदि हि साध्यसाधनसहचारदर्शने-नोपाधौ साध्यव्यापकतानिश्चय एव नास्ति, तदोपाधित्वनिश्चयाभावाद् दूषकतैव नास्तीति क्व बहिर्भावान्तर्भावचिन्ता । किञ्च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्वथा साध्यव्यापकतानिश्चयो वाच्यः, तेन विना तेषामभावात् । तस्मादुपाधिनिश्चयाद्व्यभिचारनिश्चयः तत्संशयात्तत्संशय इति व्यभिचारज्ञानद्वारा । साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया वोपाधेर्दूषकत्वम् । यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयम् । न च साधनाभाववद्वृत्तित्वमुपाधिरिति वाच्यम् । उपाधिमात्रोच्छेदप्रसङ्गात् । सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकवत् । अवृत्तिगगनादौ साध्याव्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च ।

(दी०) दूषकताबीजचिन्तनमिति निश्चयदशामधिकृत्य । यन्निश्चयद्वारोपाधित्वनिश्चयस्य दूषकत्वं तत्संशयद्वारा तत्संशयस्यापि तथात्वमिति भावः । व्यभिचारज्ञानद्वारेति । मानसे व्यभिचारनिश्चये उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते, व्यभिचारानुमानं पुनरग्रे वक्ष्यति ।

(१) इतः परं समाप्तिपर्यन्तं पुस्तकान्तरे पाठो न दृश्यते ।

(गा०) साध्यव्यापकतायास्साधनाव्यापकताया वा निश्चयविरहेऽपि सन्दिग्धोपाधेर्दूषकतया तन्निश्चयस्थल एव दूषकताबीजविचार इति मूलोक्तासङ्गतिमाशङ्क्याह । दूषकतेति । निश्चयदशामिति । उपाधिना दूषकत्वदशाभिप्रायेणेत्यर्थः । उपाधित्वसंशयदशायां कथं दूषकत्वमित्याकाङ्क्षापूरणाय भावं व्याचष्टे । यन्निश्चयेति । तत्संशयस्यापीति । उपाधित्वसंशयस्यापीत्यर्थः । इदानीं व्यभिचारसंशयद्वारकत्वमुपाधिसंशयस्य सामान्यतोऽभिप्रेतम्, तत्संशयात्तु तत्संशय इत्यग्रिमग्रन्थेन च विशेषतस्तदभिधास्यत इति न पौनरुक्त्यम् । व्यभिचारज्ञानद्वारेति मूले ज्ञानपदस्यानुमितिसंशयोभयपरत्वे यद्वेत्यादिना वक्ष्यमाणस्य व्यभिचारोन्नायकतापेक्षस्यानेन सह पौनरुक्त्यमित्यत आह । मानस इति । उपयुज्यत इत्यत्रोक्तम्, न तु तदनुमापकत्वमिति शेषः । व्यभिचारानुमानम् । उपाधिव्यभिचारानुमापकम् ।

(दी०) व्याप्तीति । साध्यसम्बन्धितावच्छेदकरूपविरहः साधनतावच्छेदके साध्यसम्बन्धितानवच्छेदकत्वपर्यवसन्नः साध्यवदन्यावृत्तित्वविशिष्टसाध्यवद्वृत्तित्वविरहो वोन्नेयः, न तु स्वसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यकत्वम्, स्वत्वस्याननुगतस्याभावेन तत्तत्साधनपर्यवसाने साध्यप्रासिद्धिमात्रेणैव कृतार्थत्वात् । साध्यव्यापकोपाधिव्यभिचारित्वेन हेतौ साध्यव्यभिचारित्वं साधनाव्यापकोपाधिव्याप्यत्वेन साध्ये साधनाव्यापकत्वमनुमेयमिति तु नव्याः । व्यतिरेकिणि साधने व्याप्तिविरहस्य व्यभिचारस्य चोन्नयने उपाधिः साधनाभाववदवृत्तित्वम् । व्यभिचारास्फुटतादशायामुपाध्यनुसरणाद्यत्राधिकरणे हेतोः साध्यव्यभिचारित्वं तदीयधर्मे नास्य साध्याव्यापकत्वग्रहः । उपाधिमात्रेति । तेनापि व्यभिचारानुमाने तत्रापि तथाविधोपाधिसम्भवादिति भावः । वस्तुतस्तु व्यापकव्यभिचारिणो व्याप्याव्यभिचारित्वे व्याप्यव्यापकभावव्याघातापत्त्या हेतोः सा-

ध्यव्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्याव्यापकत्वान्नो-
पाधित्वमिति तत्त्वम् । अवृत्तीति व्याप्यत्वाभावसाधनाभिप्रा-
येण । साधनाव्याप्यस्योपाधित्वे च नैष दोषः ।

(गा०) व्याप्तिविरहोन्नायकतया वेत्यत्र स्वव्यापकसामानाधि-
करण्यरूपव्याप्तेर्विवक्षितत्वेऽसङ्गतिः, तादृशव्याप्तेः सोपाधिसाधनघ-
टिताया अप्रसिद्ध्या तदभावाप्रसिद्धेः,साधनान्तरघटिततादृशव्याप्ति-
विरहग्रहस्य च प्रकृतव्याप्तिग्रहाविरोधित्वात्, तद्वदन्यावृत्तित्वरूप-
व्याप्तेर्विवक्षितत्वे तदभावो व्यभिचार एवेति कल्पभेदानुपपत्तिः,
अतो व्याप्त्यन्तरपरतामाह । साध्येत्यादि । तथा च धूमादावेव धू-
मादिरूपसाध्यसम्बन्धितावच्छेदकरूपव्याप्तेः प्रसिद्ध्या आर्द्रेन्धना-
दिव्यभिचारेण वह्न्यादौ तदभावसाधने न दोष इति भावः । अव-
च्छेदकत्वं च स्वरूपसम्बन्धविशेषः, स्वत्वघटिततया ऽननुगमने
विशिष्य साधनतावच्छेदकानां निवेशनीयतया व्यभिचारिणि प्र-
तियोग्यप्रसिद्ध्या साध्याप्रसिद्धेर्दुर्वारत्वात् ।

ननु द्रव्यं सत्त्वादित्यादौ सत्तादिहेतोः साध्यसम्बन्धितावच्छे-
दकविशिष्टसत्तात्वादिमत्त्वादुपाधिव्यभिचारेण तत्रापि तदभावसाध-
ने बाध इत्यत आह । साधनेति । साध्यसम्बन्धितानवच्छेदकत्वेति ।
तथा च शुद्धसत्तात्वादिरूपसाधनतावच्छेदके उपाध्यभाववद्वृत्ति-
तावच्छेदकत्वेन द्रव्यत्वादिसामानाधिकरण्यानवच्छेदकत्वं साध-
नीयम्, तत्र च न बाधावसरः, तत्तत्साधनतावच्छेदके तदवच्छेद-
कत्वावगाहिनोऽनुमितिजनकज्ञानस्य विरोधितयोपपत्तेरिति भावः ।
स्वरूपसम्बन्धरूपावच्छेदकत्वघटितोक्तव्याप्तेर्व्याप्तिवादे स्वयं दूषि-
त्वादव्यभिचरितसामानाधिकरण्यरूपव्याप्त्यभावस्योन्नायकतामाह ।
साध्यवदिति । विरहो वेति । एतादृशव्याप्तिविरहो न व्यभिचाररूपः,
अपि तु तदतिरिक्तोऽवृत्तिवृत्तिः साधनाभावरूपव्याप्त्यप्रसिद्ध्यप्रति-
योगिकश्चेति सामञ्जस्यम् ।

यदि च लाघवात्साध्यवदन्यावृत्तित्वविशिष्टवृत्तिमत्त्वमेव व्या-
प्तिरुच्यते, तदा तदभाव एवात्र विवक्षितः । ननु स्वव्यापकसाध्य-
सामानाधिकरण्याभावस्याप्रसिद्ध्या साधनासम्भवेऽपि स्वाव्यापक-
साध्यकत्वस्य प्रसिद्धस्य साधनं कथमुपेक्षितम्, तज्ज्ञानस्यापि

स्वहेतुकानुमितिजनकज्ञाने साध्यांशे स्वव्यापकत्वभानविरोधित्वोपयुक्तत्वादित्यत आह । न त्विति । स्वसमानेति । स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकसाध्यतावच्छेदककत्वमित्यर्थः । उन्नेयमिति विपरिणतेन सम्बन्धः । तत्तत्साधनपर्यवसाने । विशिष्य तत्तत्साधनानां साध्यविशेषणाद्यव्यापकत्वघटकतया निवेशने । कृतार्थत्वादिति । उक्तसाध्यप्रसिद्धावेव प्रकृतसाध्यविशेषणतया प्रकृतसाधनाव्यापकत्वभानेन तस्या एव प्रकृतसाध्यसाधनव्याप्तिग्रहप्रतिबन्धकतया समीहिते सिद्धे साधने उपाधिव्यभिचारेण स्वाव्यापकसाध्यकत्वानुमानवैयर्थ्यात् । साध्यवदन्यावृत्तित्वविशिष्टसाध्यसामानाधिकरण्याभावसाधनेऽपि साधने विशेष्यविशेषणभावानापन्नाव्यभिचारसाध्यसामानाधिकरण्योभयप्रकारकानुमितिजनकज्ञानस्य विशिष्टाभावप्रकारकज्ञानाप्रतिबध्यस्य सम्भवाद्यभिचारिमात्रसाधनेनैव चानुमितिजनकज्ञानप्रतिबन्धकसम्भवाद्विशिष्टाभावानुमानमफलमित्यालोच्याव्यभिचाररूपव्याप्तिग्रहविघटनाय व्यभिचारः साधने साधनीयः व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबन्धाय परसाध्ये साधनाव्यापकत्वमेव साधनीयम्, न तु साधने स्वाव्यापकसाध्यसामानाधिकरण्यं स्वाव्यापकसाध्यकत्वं वा, येन साध्याप्रसिद्ध्यादिरिति निष्कृष्टमतमाह । साध्येति । केवलान्वयिनि साधने व्यभिचाराद्यनुमानेऽप्रसिद्ध्या साधनाभाववदवृत्तित्वोपाधिशङ्कानवकाशाद्व्यतिरेकिसाधनपक्षकव्यभिचाराद्यनुमानपरतां शङ्काग्रन्थस्याह । व्यतिरेकिणीति । व्यभिचारानुमाने तादृशोपाधेः साध्यशून्येऽवृत्तौ वक्ष्यमाणसाध्याव्यापकत्वासङ्गतेर्व्यभिचारानुमान एव च तस्य सम्भवदुक्तिकोपाधिताकतया च शङ्काया उभयानुमानपरतामाह । व्याप्तीति । ननु व्यभिचारनिरूपकाधिकरणमात्रवृत्तिधर्मे साध्यव्यभिचारिणि साधनाभाववदवृत्तित्वासत्त्वात्कथं तस्य साध्यव्यभिचाररूपसाध्यव्यापकत्वघटितोपाधित्वं ग्राह्यमित्यत आह । व्यभिचारास्फुटतादशायामिति । साधनाधिकरणे साध्याभावानिश्चयदशायामित्यर्थः । उपाध्यनुसरणात् । उपाधित्वेन व्यभिचारानुमानात् । तन्निश्चयदशायां तदनुमानवैयर्थ्यादिति भावः । अस्य । साधनाभाववदवृत्तित्वस्य । साध्याव्यापकत्वग्रहः । साध्याव्यभिचाररूपसाध्याव्यापकत्वनिश्चयः । तादृश-

धर्मे साध्यव्यभिचाररूपसाध्यानिश्चयादिति भावः ।

मूले उपाधिमात्रोच्छेदप्रसङ्गादिति । उपाधिमात्रस्यैव व्यभिचारानुमापकत्वोच्छेदप्रसङ्गादित्यर्थः ।

साधनाभाववद्वृत्तित्वरूपोपाधिव्यभिचारहेतुकव्यभिचारानुमानमेवास्ति कथमुपाधिमात्रोच्छेद इत्याशङ्कापरिहारायात्र हेतुमाह दीधितौ । तेनापीति । साधनाभाववद्वृत्तित्वोपाधिनापीत्यर्थः । साधनाभाववद्वृत्तित्वरूपोपाधिव्यभिचारेणेति यावत् । व्यभिचारानुमाने । स्वव्यभिचारद्वारा कर्त्तव्ये । तत्रापि । तादृशव्यभिचारानुमानेऽपि । तथाविधेति । उपाधिव्यभिचाररूपसाधनाभाववद्वृत्तित्वरूपेत्यर्थः ।

व्यभिचारानुमानासम्भवेऽपि तत्संशायकतया उक्तोपाधिदूषणं स्यादेवेत्यतस्तदनुपाधित्वनिश्चयं स्वयमुपपादयंति । वस्तुतस्त्वति । व्यापकव्यभिचारिण इति । साध्यव्यापकत्वेन निश्चितस्य व्यभिचारोन्नायकोपाधेर्व्यभिचारितया निश्चितस्य प्रकृतहेतोः । व्याप्यव्यभिचारित्वे । प्रकृतसाध्याव्यभिचारित्वे । व्याप्यव्यापकभावव्याघातापत्त्या । साध्योपाध्योर्व्याप्यव्यापकभावभङ्गापत्त्या । उपाधिव्यभिचारि साधनं यदि साध्यव्यभिचारशून्यं स्यात्, उपाधिव्यभिचारशून्यवृत्तिः स्यात् इति यावत्, तदा साध्यव्यापकव्यभिचारो न स्यादित्याकारा उपाधिव्यभिचारे साध्यव्यभिचारव्यभिचारशङ्कानिवर्त्तकापत्तिर्बोध्या । हेतोः । उपाधिव्यभिचारस्य । साध्यव्याप्यत्वेन । साध्यव्यभिचाररूपसाध्यव्याप्यतया निश्चयेन । साधनाभाववद्वृत्तित्वस्येति । उपाधिव्यभिचाररूपहेत्वव्यापकतया निश्चितस्येत्यादिः । साध्याव्यापकत्वात् । साध्याव्यभिचाररूपसाध्याव्यापकत्वनिश्चयात् । नोपाधित्वम् । नोपाधित्वग्रहः । नैष दोषः । नावृत्तौ साध्याव्याप्यत्वरूपसाध्याव्यापकत्वम्, उपाधेरपि तत्र सत्त्वादिति शेषः ।

(दी०) साधनेति यथाश्रुताभिप्रायेण, प्रतियोगिव्यधिकरणसाधनाभाववद्वृत्तित्वस्य साधनवदन्यवृत्तित्वस्य चोक्तौ तथात्वासम्भवात् । एवञ्च सत्प्रतिपक्षे निश्चितोपाधिवत्सन्दिग्धोपाधिरुद्धाव्यः । न च तत्कर्त्तव्यस्य व्यभिचारसन्देहस्य प्रति-

हेतुसमाजादेव सिद्धेः किं तेनेति वाच्यम् । परस्परसंवलनेनैवानु-मित्यनुत्पादे तत्र व्यभिचारसन्देहस्यावश्यमुत्पत्तौ मानाभावात् उपाधिसन्देहाद्विशिष्यैकत्र व्यभिचारसन्देहेन तुल्यबलत्वाभावा-त् । न चातुल्यबलेन सत्प्रतिपक्षो व्यभिचारादिशङ्काधानं वा, स्वरसतः सन्दिग्धव्यभिचारादिनापि तथात्वप्रसङ्गादिति । अत्र च क्वचिदुपाधेस्तुल्यबलत्वे सत्प्रतिपक्षोन्नायकतया तर्कादिसा-चिव्यादधिकबलत्वे च बाधोन्नायकतयापि दूषकत्वम्, व्या-प्यत्वादिप्रतिसन्धाने तदुन्नयनस्य ततोऽनुमितिप्रतिरोधस्य च दु-र्वारत्वात् । परन्तु सार्वत्रिकत्वं न तस्येति ध्येयम् ।

(गा०) संयोगादिहेतुकव्यभिचारानुमानेऽप्युपाधेः साधनाव्या-पकत्वमुपपादयिष्यन्नाह । यथाश्रुतेति । उक्तौ उपाधितयोक्तौ । तथा-त्वम् । साधनाव्यापकत्वम् । सत्प्रतिपक्षोत्थापकतया दूषकताप्रक्षे सन्दिग्धोपाध्युद्भावनप्रसङ्गस्य पूर्वपक्षे उक्तत्वात् प्रसङ्गमुद्धरति । एवं चेति । व्यभिचारज्ञानद्वारोपाधेर्दूषकत्वे चेत्यर्थः । तत्कर्तव्यस्य । सन्दिग्धोपाधिफलस्य । प्रतिहेतुसमाजादेव सिद्धेरिति । एकध-र्मिगते विरुद्धभावाभावसाध्यकतयोपन्यस्तहेतुद्वये तत्तत्साध्यसा-धनौपयिकव्याप्तिद्वयसत्त्वं साध्यतदभावव्याप्ययोरविरोधप्रसङ्गेना-सम्भवीति प्रतिसन्धानेन सत्प्रतिपक्षसंवलनादुभयत्र हेतौ स्वसा-ध्यव्यभिचारसंशयस्य सिद्धेरित्यर्थः । किं तेनेति । किमुपाधिस-न्देहेनेत्यर्थः । तथा च सत्प्रतिपक्षे सन्दिग्धोपाध्युद्भावनमफल-मिति भावः । परस्परसंवलनेनेति । विरोध्यनुमितिसामग्र्योर्मिथो मेलनेनैवेत्यर्थः । अनुमित्यनुत्पादे । साध्यतदभावयोरनुमित्यनुत्पा-दोपपत्तौ । तस्य व्यभिचारसंशयाकल्पकत्वेनेति शेषः । तत्र । स-त्प्रतिपक्षसंवलनस्थले । अवश्यमुत्पत्तौ । उक्तप्रतिसन्धानात्तदुत्प-त्तेरावश्यकत्वे । मानाभावादिति । तथा च प्रतिहेतौ व्यभिचारसं-शयार्थं सन्दिग्धोपाध्युद्भावनमुपयुक्तमेवेति भावः ।

ननु तथापि सन्दिग्धोपाधिरकिञ्चित्करः, प्रतिहेतोरनुमित्यनु-त्पादकतायाः सत्प्रतिपक्षसंवलनादेव सिद्धेरित्याशङ्कानिवृत्त्यर्थं प्र-

तिहेतौर्दुर्बलत्वे प्रकृते साध्यसिद्धिनिर्वाह इति तस्य हीनबलतार्थं सन्दिग्धोपाध्युद्भावनमित्याह उपाधिसन्देहादिति । एकत्रेति । उपाध्युद्भावनविषयहेतावित्यर्थः । तुल्यबलत्वाभावादिति । तस्य हेतोर्हेत्वन्तरापेक्षया हीनबलत्वादित्यर्थः । तदर्थं सन्दिग्धोपाध्युद्भावनौचित्यादिति शेषः ।

प्रतिहेतौ हीनबलत्वेन किमुपक्रियत इत्याकाङ्क्षायामाह । न चेति । न हीत्यर्थः । अतुल्यबलेन । हीनबलेन । प्रतिहेतुना । सत्प्रतिपक्षः । अनुमितिप्रतिबन्धः । तुल्यबलविरोध्यनुमितिसामग्र्या एवानुमितिप्रतिबन्धकत्वादित्यर्थः । तथा च स्वाभिमतसाध्यसिद्ध्यर्थमेव प्रतिहेतौ सन्दिग्धोपाध्युद्भावनादिति भावः । हीनबलप्रतिहेतुज्ञानस्य स्वतोऽनुमित्यप्रतिबन्धकत्वेऽपि प्रकृतहेतौ व्यभिचारशङ्कासम्पादनेनानुमितिविरोधित्वमेवेत्याशङ्कां परिहरति । व्यभिचारशङ्काधानं वेति । विनिगमकबलेन हीनबले व्याप्तिभङ्गावधारणे ऽधिकबले व्याप्तिनिश्चयादिति भावः । स्वरसत इति । उपाधिसन्देहाद्यघटितसामग्रीतोऽपीत्यर्थः । तथात्वप्रसङ्गात् । सत्प्रतिपक्षादिप्रसङ्गात् । व्यभिचारोन्नायकतया ऽव्याप्यत्वोन्नायकतया च दूषकत्वमुपाधेर्मूलकृतोक्तम्, न तु सत्प्रतिपक्षोन्नायकतया, क्वचिच्च तदुन्नायकतयाऽपि दूषकत्वसम्भवान्मूले न्यूनतेति स्वयं तदाह । अत्र चेति । ध्येयमित्यग्रिमेण सम्बध्यते । तुल्यबलत्वे इति । साध्यधर्मिकप्रकृतहेतुव्यापकताग्राहकसामग्रीतुल्यबलस्वधर्मिकसाध्यव्यापकताग्राहकतायामित्यर्थः । सत्प्रतिपक्षोन्नायकतयेति । दूषकत्वमित्यग्रिमेण सम्बध्यते । सत्प्रतिपक्षोन्नायकत्वम् । साध्यानुमितिसामग्रीतुल्यबलसाध्याभावानुमितिसामग्रीसम्पादकत्वम् । अधिकबलत्वे इति । निश्चितप्रामाण्यकसाध्यव्यापकताग्रहविषयत्व इत्यर्थः । तथा सति प्रकृतहेतौ साध्यव्याप्तिग्रहे ऽप्रामाण्यग्रहेण साध्यानुमितिसामग्र्याः साध्याभावानुमित्यप्रतिबन्धकत्वेन साध्याभावानुमापकतया । दूषकत्वम् । साध्यानुमितिविरोधित्वम् । साध्यानुमितिसामग्र्या अपूर्णतयाऽपि तदनुमित्यनुत्पादसम्भवात् सम्भेदे नान्यतरवैयर्थ्यमिति न्यायेन बाधानिश्चयस्याप्यनुमितिविरोधित्वं दुर्वारम् । व्याप्त्यादिप्रतिसन्धान इति । उपाधौ निश्चितप्रामाण्यकसाध्यव्यापकत्वज्ञाने तदभावस्य च पक्षधर्मतानिश्चये । तदुन्नयनस्य । बाधोन्नयन-

स्य । तत इति । तुल्यव्यापकत्वादिग्रहविषयोपाधित इत्यर्थः । अनुमितिप्रतिरोधस्य । प्रतिरोधरूपसत्प्रतिपक्षोत्थापनस्य । सार्वत्रिकत्वं न तस्येति । यथा साधनाव्यापकत्वघटितोक्तलक्षणाक्रान्तस्योपाधेर्व्यभिचारस्याव्याप्यत्वस्य चोन्नायकत्वं सार्वत्रिकं तथा न बाधादूयुन्नायकत्वम् , पक्षे साध्यवति तदसम्भवादिति भावः ।

(चि०) अथोपाध्याभासाः । असाधारणविपर्ययो यथा अन्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम् । अप्रसिद्धसाध्यविपर्ययो यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः । बाधितसाध्यविपर्ययो यथा वह्निरुष्णस्तेजस्त्वादित्यत्राकृतकत्वम् । पक्षाव्यापकविपर्ययो(१) यथा क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्राणुव्यतिरिक्तत्वम् । अत्राणुव्यतिरेकस्य क्षित्यादेरेकदेशवृत्त्या भागासिद्धेः । पूर्वसाधनव्यतिरेको यथा शर्करारसोऽनित्योऽनित्यवृत्तिगुणत्वात्, रसो नित्यो रसनेन्द्रियजन्यनिर्विकल्पकविषयत्वात् रसत्ववदित्यादौ, पूर्वसाधनतायाः प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकित्वस्येति वस्तुव्यवस्था न स्यात्, उपाधेर्नित्यदोषत्वाच्च । न हि यद्येन सोपाधिसम्बद्धं तत्तेनानुपाधित्वसम्बद्धं सम्भवति, न तु सत्प्रतिपक्षोच्छेदः पूर्वसाधनव्यतिरेकस्यानुपाधित्वे बीजम् । स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्यव्यापकत्वेनानुपाधित्वात् । न च पूर्वहेतोस्तत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं

(१) पक्षाविपर्यय इति पु० पा० ।

त्रेति वाच्यम् । अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात् । पूर्वसाधनव्याप्यव्यतिरेको यथा अकर्तृकत्वानुमाने नित्यत्वादिः । पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम् । पक्षेतरसाध्याभावो यथा अत्रैव पर्वतेतराग्निमत्त्वम् । न चात्र व्यर्थविशेषणत्वं दूषणम्, तत्त्वेऽप्युपाधेराभासत्वात् । तत्तुल्यश्च यथा अत्रैव पर्वतेतरेन्धनवत्त्वम् । एवं वह्निसामग्र्यादिकमूह्यम् ॥

इति तत्त्वचिन्तामणावुपाधिप्रकरणम् ॥

(दी०) असाधारणविपर्यय इति । इदं च सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्य । यद्यपि व्यतिरेकेण सत्प्रतिपक्षत्वे सत्प्रतिपक्षान्तरस्यादोषत्वान्नासाधारण्यं दोषाय, तथापि सत्प्रतिपक्षोन्नयनौपयिकसाध्यव्यापकत्वग्राहकप्रमाणाभावे तात्पर्यम् ।

(गा०) ननूपाधेरसाधारणविपर्ययत्वं कथमाभासताप्रयोजकम्, तद्व्यतिरेकस्यासाधारण्येन पक्षे साध्याभावासाधकत्वेऽपि तद्व्यभिचारेण हेतौ साध्यव्यभिचारसाधने असाधारण्यानवकाशेन तत्साधकतया दूषकत्वसम्भवात्, दूषकत्वे सदुपाधिताया दुर्वारत्वादित्यत आह । इदं चेति । असाधारणविपर्ययस्याऽऽभासताधानं चेत्यर्थः । सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्येति । यत्र सत्प्रतिपक्षोन्नयनार्थमुपाध्युद्भावनं तादृशस्थलाभिप्रायेणेत्यर्थः । व्यतिरेकेणेति । उपाधिव्यतिरेकहेतुनेति शेषः । सत्प्रतिपक्षत्वे । साध्याभावसाधने । असाधारण्यम्, न दोषायेत्यनेन सम्बध्यते ।

ननु व्यतिरेकिणि असाधारणफलस्यान्वयव्याप्तिग्रहस्याकिंचित्करत्वेऽपि सत्प्रतिपक्षप्रयोजकतया असाधारण्यं दोष एवेत्यत आह ।

सत्प्रतिपक्षे इति । पक्षोन्नायकतयेत्यर्थः । अदोषत्वात् । अदोषताया व्यवस्थापितत्वात् । प्रमाणाभावे तात्पर्यमिति । असाधारणाविपर्ययस्य प्रसिद्धानुमानीयपर्वतेतरत्वादेस्तादृशप्रमाणाभावेनादूषकत्वादुपाध्याभासत्वे तात्पर्यम् । यद्यप्येवं व्यभिचारोन्नायकत्वे व्याप्तघनवकाशः, तत्रातिव्यापकतानिश्चयस्यापेक्षितत्वात्, तथापि असाधारणविपर्ययतयैवोपाध्याभासतेति यथाश्रुताभिप्रायेण सत्प्रतिपक्षोन्नायकत्वाभिप्रायेणेति प्रथममुक्तम् ।

(दी०) तदयं निष्कर्षः, यत्र यद्दोषोन्नायकतया दूषणत्वमुपाधेस्तत्र तदुन्नयनौपयिकरूपवैकल्यमेवाभासत्वे प्रयोजकम्, एवं च यत्र स्थापनायां पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्या तत्र पक्षाव्यापकविपर्ययस्याभासत्वम्, तद्विरहेण पक्षैकदेशे सत्प्रतिपक्षेऽप्येकदेशान्तरे साध्यसिद्धेरप्रत्यूहत्वात्, यत्र तु पक्षतावच्छेदकावच्छेदेन तथा तत्र तादृशस्योपाधित्वमेव, एकदेशे प्रतिपक्षस्यापि तादृशसिद्धिविरोधित्वात् साध्यविपर्ययस्यासत्त्वमनुपाधित्वे प्रयोजकम्, न त्वज्ञातम्, अज्ञातस्यापि तस्य व्यापकव्यतिरेकेण सिद्धिसम्भवात् ।

(गा०) उपाधेराभासताबीजं सर्वसाधारणं निर्वक्ति । तदयमित्यादिना । दूषणत्वमुपाधेरिति । उपाधिमुद्भावयतोऽभिमतमिति शेषः । एवं सति पक्षाव्यापकविपर्ययस्य यत् उपाध्याभासत्वमुक्तं तदपि न सार्वत्रिकमित्याह । एवं चेति । सामानाधिकरण्येन । सामानाधिकरण्यमात्रेण । आभासत्वमिति । अदूषकत्वादिति शेषः । अदूषकत्वमेव विवृणोति । पक्षैकदेशे इति । सत्प्रतिपक्षेऽपि पक्षतावच्छेदकसामानाधिकरण्यमात्रेण साध्याभावव्याप्यवत्ताज्ञानसम्पादनेऽपि । तादृशोपाधिव्यतिरेकस्य पक्षतावच्छेदकावच्छेदेनावर्तमानतया तदवच्छेदेन साध्याभावव्याप्यवत्ताज्ञानासम्पादकत्वादिति भावः । एकदेशान्तरे इति । पक्षतावच्छेदकसामानाधिकरण्यमात्रेणेत्यर्थः । उपाधित्वमेव । न तु तदाभासत्वम् । दूषक-

त्वादिति शेषः। तदेव दर्शयति। एकदेश इति। तादृशासिद्धिविरोधित्वात्। अवच्छेदकावच्छेदेनानुमितौ विरोधित्वात्। अप्रसिद्धसाध्यविपर्यय इत्यत्राप्रसिद्धपदस्य तदानीमज्ञायमानत्वार्थकताभ्रमनिराकरणाय साध्यविपर्ययस्याज्ञातत्वरूपमप्रसिद्धत्वं नोपाधेराभासताप्रयोजकम्, बीजाभावात्, किन्तु अत्यन्तासत्त्वरूपम्, केवलान्वयिसाध्यके एव उपाधेरलत्साध्यविपर्ययकत्वेनाभासत्वात्, तत्र विपर्ययस्यात्यन्तासत्त्वेन साधयितुमशक्यत्वादित्याह साध्यविपर्ययस्येति। साध्यविपर्ययस्यासत्त्वम्। विपर्ययत्वावच्छेदेन साध्यप्रतियोगिकत्वम्, साध्यतावच्छेदकविपर्ययप्रतियोगितानवच्छेदकत्वमिति यावत्। तस्य। साध्यविपर्ययस्य। व्यापकव्यतिरेकेणेति। साध्यव्यापकतया गृहीतस्योपाधेर्व्यतिरेकेणेत्यर्थः। सिद्धिसम्भवादिति। पृथवीत्वादिना पृथिवीतरभेदादेरिवेत्यादिः।

(दी०) अथ सिद्धसाध्यविपर्ययत्वेन चाभासत्वम्, व्यभिचारोन्नायकतया दूषकत्वपक्षे विनापि साध्यप्रसिद्धिं प्रत्येकपदार्थप्रसिद्ध्यैव घटो नाभिधेय इत्यादिप्रतिज्ञापत्तेः, व्युत्पादयिष्यते च तत्र प्रतिज्ञाविरहः, व्यापकाभावेनाप्रसिद्ध्यैव व्याप्याभावस्य सिद्ध्यभ्युपगमात्, पूर्वसाधनव्यतिरेकत्वन्तु नोपाधित्वेन नाप्यनुपाधित्वेन नियतम्, वह्निना धूमस्य स्थापनायां प्रतिहेतावार्द्रेन्धनाभावे वह्न्यभावस्योपाधितया धूमाभावस्य चार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वह्नावार्द्रेन्धनस्यानुपाधितायाश्च प्रसङ्गात्। परन्तु पूर्वसाधनव्यतिरेकस्य प्रतिहेतावुपाधित्वेनोद्भावने सत्प्रतिपक्षमात्रमुच्छिद्येत, सर्वत्रैव तत्सम्भवात्। आभासत्वेऽपि स्थापनया विशेषाग्रहदशायामेव सत्प्रतिपक्षोपन्यासात्, वस्तुतः साध्याव्यापकस्यापि पूर्वसाधनव्यतिरेकस्य तदानीं तत्त्वेनाग्रहादुपन्याससम्भवात्। अतो बलवत्तरानुकूलतर्कं विना पूर्वसाधनव्यतिरेको नोपाधित्वेनोद्भाव्य इति कथकसमयवशादेवासावुपाधित्वेन नोपन्यस्यत इति। यथा अकर्तृकत्वेति।

कादाचित्कत्वेन सकर्तृकत्वस्थापनायामजन्यत्वे प्रतिहेताविसर्थः।

इति तत्त्वचिन्तामणिदीधितावुपाधिप्रकरणम् ॥

(गा०) पूर्वसाधनव्यतिरेकत्वं नोपाध्याभासताप्रयोजकम्, क्वचित्तस्यापि सदुपाधित्वात्, परं तु सत्प्रतिपक्षस्थले कथकसम्प्रदायवशात्तस्योपाधित्वेन नोद्भावनमित्यत्रैव मूलतात्पर्यमित्याह । पूर्वेति । नोपाधित्वेन नियतमिति दृष्टान्तविधयोक्तम् । एतन्नियमेति प्रसङ्गमाह । वह्निनेति । हेतुनेति शेषः । स्थापनायाम् । वादिना प्रथमसाधने । प्रतिहेतौ । धूमाभावसाध्यके । वह्न्यभावस्येति । धूमाभावरूपसाध्याव्यापकतया अनुपाधेरित्यादिः । पूर्वसाधनव्यतिरेकस्येति शेषः। उपाधितायाः प्रसङ्गादित्यन्वयः। द्वितीयनियमेऽतिप्रसङ्गमाह । धूमाभावस्येति । प्रतिहेतौ। धूमस्य साधके । आर्द्रेन्धनस्येति । प्रसिद्धोपाधेरिति शेषः । परन्त्विति । अस्य नोपाधित्वेनोद्भाव्य इत्यग्रिमेणान्वयः । असौ । पूर्वसाधनव्यतिरेकः । उपाधित्वेनानुद्भावने हेतुं वक्ष्यति कथकसमयवशादिति । तत्समयबीजमाह पूर्वसाधनव्यतिरेकस्येत्यादिना । सर्वत्रैव । प्रतिहेतुमात्र एव। तत्सम्भवात् । पूर्वसाधनव्यतिरेकस्योपाधितयोद्भावनसम्भवात् ।

नन्वयोगोलकं धूमवद्वह्नेः, तन्न धूमवदार्द्रेन्धनाभावादित्यादौ सत्प्रतिपक्षे वह्न्यभावस्य पूर्वसाधनव्यतिरेकस्य नोत्तरसाधने उपाधितयोद्भावनसम्भवः, वह्नेर्धूमाव्याप्यत्वेन तदभावत्वस्य धूमाभावाव्यापकत्वग्रहादित्यत आह । आभासत्वेऽपि स्थापनाया इति । पूर्वसाधनस्य वस्तुगत्या तत्साध्याव्याप्यत्वेऽपीत्यर्थः । विशेषाग्रहदशायामेव । तस्य तदव्याप्यत्वाग्रहदशायामेव । सत्प्रतिपक्षोपन्यासात्। साध्याभावसाधकहेतूपन्यासात् । तद्ग्रहदशायां तत एव हेतोरसाधकतया प्रतिहेतूपन्यासवैयर्थ्यादिति भावः। वस्तुतः। वस्तुगत्या । तदानीम्। विशेषाग्रहदशायाम् । तत्त्वेन। साध्याव्यापकत्वेन । उपन्याससम्भवादिति । उपाधितया पूर्वसाधनव्यतिरेकोद्भावनसम्भवादित्यर्थः। अतः । उक्तरीत्या सत्प्रतिपक्षोच्छेदप्रसङ्गात् । बलवत्तरेत्यादिर्नोद्भाव्य इत्यन्तः कथकसमयाकारः । इति कथकसमयेति । इ-

त्याकारकसमयेत्यर्थः । वशादेवेति । न त्वाभासत्वादित्येवकारार्थः । असौ । पूर्वसाधनव्यतिरेकः ।

ननु क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्र स्थापनायां अनित्यत्वस्य प्रागभाववृत्तेः कार्यत्वाव्याप्यत्वेन नित्यत्वं पूर्वसाधनव्याप्यव्यतिरेककं न भवति, एवं क्षित्यादिकमकर्तृकं शरीराजन्यत्वात् व्योमवदित्यादौ क्षित्यादिव्योमान्यतरत्वावच्छिन्नसाध्यव्यापकत्वे सति तदन्यतरत्वावच्छिन्नसाधनाव्यापकं नित्यत्वञ्चोपाधिरेवेति कथमाभास इत्यत आह । कादाचित्कत्वेनेति । तथा च क्षित्यादिकं सकर्तृकं कादाचित्कत्वादित्यत्रानित्यत्वं कादाचित्कत्वव्याप्यम्, तद्व्यतिरेकश्च नित्यत्वमिति न पूर्वोक्तो दोषः, क्षित्यादिकमकर्तृकमजन्यत्वादिति प्रतिहेतौ क्षित्यादिव्योमान्यतरत्वावच्छिन्नाकर्तृकत्वव्यापकं यथा नित्यत्वम्, तथा तदवच्छिन्नाजन्यत्वरूपसाधनाव्यापकमपीति न स उपाधिरिति न द्वितीयोऽपि दोष इति दिक् ॥

इति श्रीमहामहोपाध्यायश्रीगदाधरभट्टाचार्यचक्रवर्त्तिकृतौ तत्त्वचिन्तामणिदीधितिव्याख्याने

उपाधिप्रकरणम् ॥

पक्षताप्रकरणम् ।

(चि०) व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते। तत्र न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वम् । सन्देहो हि न विशेषणं, परामर्शपूर्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात् । नोपलक्षणम्, अव्यावर्त्तकतापत्तेः ।

(दी०) अनुमितिलक्षणैककार्यानुकूलतासङ्गत्या पक्षधर्मतां निरूपयितुमाह । व्याप्तीति । सन्दिग्धेति । यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिवर्त्यो यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्षतेत्यर्थः । तेन न पक्षसाध्यविशेष्यकसंशयाननुगमो न वा सम्बन्धान्तरेण सन्देहेऽपि निर्णीतसम्बन्धेन पक्षत्वम्, न वा तमःप्रभृतिषु समवायेन आकाशादिसाधने तद्वैकल्यम् ।

(गा०) मूले व्याप्तिपक्षधर्मतयोः सङ्गत्यप्रदर्शनेन न्यूनतां परिजिहीर्षुस्तयोरेककार्यकारित्वरूपसङ्गतिं दर्शयन् व्याप्त्यनन्तरमित्यादिमूलमवतारयति । अनुमितीति । अनुमितिलक्षणं अनुमितिस्वरूपं यदेककार्यं तदनुकूलत्वसङ्गत्या तत्प्रयोजकत्वरूपसङ्गत्या, प्रयोजकत्वञ्च कारणतावच्छेदकस्यापीति व्याप्तिपक्षधर्मतयोः परामर्शनिष्ठकारणतायामवच्छेदकत्वेन अनुमित्यजनकत्वेऽपि न क्षतिः । यद्यपि पक्षताया न कारणतावच्छेदकघटकत्वं तामनन्तर्भाव्य पर्वतादिवृत्तित्वज्ञानत्वेनैवानुमितिजनकत्वात् तथाऽपि पक्षताया अनुमितौ स्वातन्त्र्येण कारणतया तदुपलक्षितधर्मिवृत्तितायाश्च कारणतावच्छेदकतया तद्घटितविशिष्टस्यैककार्यानुकूलत्वमक्षतमेवेति ध्येयम् ।

निरूपयितुमिति । निरूपणं प्रतिपत्त्यनुकूलो व्यापारः । एवञ्च पक्षधर्मताघटकपक्षतानिरूपणस्यापि पक्षधर्मताप्रतिपत्त्यनुकूलत्वेन तन्निरूपणत्वमक्षतमिति मूले पक्षतानिरूपणेऽपि पक्षधर्मतां निरूपयितुमित्यस्य नासङ्गतिः । पक्षे धर्मत्वं यस्या इति व्युत्पत्त्या पक्षधर्मतापदं पक्षीयधर्मविशेषरूपपक्षतापरमिति केचित् । तच्चिन्त्यम् । तथात्वे लिखनसङ्क्षेपनिर्बन्धिनो दीधितिकारस्य पक्षतां निरूपयितुमित्यस्य उपेक्षाया बीजाभावात् ।

व्याप्तीतीति । व्याप्तिनिरूपणानन्तरमिति मूलपाठाभिप्रायेण । व्याप्त्यनन्तरमिति पाठे च तत्रकाराभावात् प्रत्यक्षेत्यादीत्युपेक्ष्य प्रत्यक्षवित्यादि इति रीत्या प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थधारकस्य तथाविधलिखनासङ्गतेः ।

तत्रेति मूले तत्पदं पक्षधर्मतापरं सप्तम्यर्थश्च घटकत्व अन्वयश्चास्य पक्षत्वमित्यत्रेत्यवधेयम् । सन्दिग्धेत्यादिमूलग्रन्थस्य सन्दिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विधेयतया साध्यीभूतधर्मसन्देहवत्त्वं, तादृशसन्देहपर्यवसितं पक्षतेत्यर्थः । तत्र साध्य धर्मत्वानिवेशनमफलं धर्मपदसार्थक्याय, स्वास्मिन् सन्दिग्धं साध्यधर्मत्वं साध्यं धर्मो यस्य इति बहुव्रीहिबलात् साध्यनिरूपितधर्मित्वपर्यवसितं पक्षत्वमित्युक्तौ, साध्ये सन्दिग्धं स्वधर्मत्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षनिरूपितधर्मत्वस्य चाप्रसिद्धिस्थले वक्ष्यमाणानुपपत्तिप्रयोजकं तत् । एवं साध्यकोटिकसंशयस्य निवेशे साध्यं पक्षवृत्ति न वा, साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संशयासंग्रहः तादृशसंशयोपादाने च पक्षः साध्यवान्न वेति संशयादनुमित्यनुपपत्तिरतो धर्मत्वांशं परित्यज्य केवलान्वयिग्रन्थे मणिकृतैव वक्ष्यमाणतथाविधसकलसंशयानुगमप्रकारं दर्शयति । यत्रेति । यत्र इति यद्धर्मावच्छिन्ने, सप्तम्यर्थश्च निर्णयान्वयि विशेष्यत्वम्, साध्यस्य । साध्यतावच्छेदकावच्छिन्नस्य । षष्ठ्यर्थः प्रकारत्वं, तस्यापि निर्णयेऽन्वयः । तत्र । तद्धर्मावच्छिन्ने, सप्तम्यर्थोऽनुमित्यन्वयि विशेष्यत्वम् । तादृशसम्बन्धेन साध्यानुमितौ । तादृशसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नविधेयताकानुमितौ जनकीभूतेत्यर्थः । पक्षविशेष्यकसाध्याभावावशिष्टबुद्धाविव साध्यधर्मिकपक्षावृत्तित्वपक्षनिष्ठाभावप्रतियोगित्वविशिष्टबुद्धावपि पक्षः

साध्यवानिति निश्चयस्य प्राचीनमते प्रतिबन्धकत्वात् साध्यं पक्षवृत्ति न वेत्यादिसंशयसंग्रहः । एवञ्च शुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकताकसंशयो हेतुरिति पर्यवसितम् । तादृशनिश्चयप्रतिबध्यत्वस्य यथाश्रुतस्य घटादिविषयकसमूहालम्बनात्मकवह्निमत्त्वादिनिश्चयप्रतिबध्यघटादिसंशयसाधारणत्वात् तादृशनिश्चयत्वावच्छिन्नप्रतिबन्धकताप्रवेशः ।

अवच्छिन्नत्वञ्चान्यूनवृत्तित्वं न तु स्वरूपसम्बन्धविशेषः । तेन वह्निसामान्याभावविशिष्टबुद्धौ महानसीयत्वादिविषयतामनन्तर्भाव्य वह्निमान् महानसीयवह्निमानित्यादिसकलज्ञानसाधारणवह्नित्वावच्छिन्नवत्तानिश्चयत्वेनैव प्रतिबन्धकताकल्पनान्महानसीयवह्निमान् वह्निसामान्याभाववान् वा पक्ष इत्याकारकसंशयं प्रति महानसीयवह्नित्वावच्छिन्नप्रकारकनिश्चयत्वेनाप्रतिबन्धकत्वेऽपि न तथाविधसंशयस्य महानसीयवह्नित्वावच्छिन्नसाध्यकानुमितौ पक्षतात्वानुपपत्तिः । न वा महानसीयवह्न्यभावादिविशिष्टबुद्धिप्रतिबन्धकतावच्छेदककोटौ वह्नित्वावच्छिन्नप्रकारताकत्वादेर्निविष्टत्वेऽपि वह्निमानित्याद्यनुमितौ महानसीयवह्निमान्न वा पक्ष इत्यादिसंशयस्य पक्षतात्वापत्तिः । इत्थञ्चाहार्यस्य भ्रमत्वज्ञानास्कन्दितस्य च निश्चयस्याप्रतिबन्धकतया अनाहार्यत्वं भ्रमत्वज्ञानानास्कन्दितत्वञ्च निश्चयविशेषणं देयमतो न तथाविधनिश्चयत्वान्यूनवृत्तिप्रतिबन्धकत्वाप्रसिद्धिः । पर्वतो वह्निमान्न वेत्यादेः कस्यापि संशयस्य धर्मान्तरावच्छिन्नविशेष्यताकान्यसंसर्गकान्यधर्मावच्छिन्नप्रकारकनिश्चयसाधारणसंयोगसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारकनिश्चयत्वाद्यन्यूनवृत्तिप्रतिबन्धकताकत्वं न सम्भवतीति प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वादेः प्रकारताविशेषणत्वम् । उपनीतभानात्मकबाधनिश्चयस्यापि साध्यवत्तानिश्चयसामान्यनिवर्त्तनीयतया भ्रमत्वज्ञानास्कन्दितस्य च तस्यानुमित्यविरोधितया तथाविधबाधदशायामनुमित्यापत्तिरतः संशयत्वनिवेशनम् ।

न च पक्षसाध्यविशेष्यकसंशयसाधारणस्यानतिप्रसक्तस्य सं-

शयत्वस्य दुर्वचतया पुनरननुगमतादवस्थ्यमिति वाच्यम् । बाधनिश्चयनिवर्त्तनयिस्यैवात्र संशयपदेन विवक्षितत्वात् केवलान्वयिनि च साध्ये पक्षनिष्ठाभावप्रतियोगित्वनिश्चय एव सुलभो बाधः, एकविधबाधोपादानेनैव विविधसंशयानुगमसम्भवात्तदननुगमो न दोषाय, अनुगमस्यापि कथञ्चित् सम्भवात् ।

यत्तु साध्यपक्षवैशिष्ट्यावगाहित्वमेव संशयपदेन विवक्षितमिति नाननुगमः । साध्यं पक्षवृत्ति न वेति साध्यविशेष्यकसंशयस्यापि तथात्वादिति, तदसत् । तथा सति साध्यपक्षवैशिष्ट्यानवगाहिनः साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संशयस्यासंग्रहात् ।

न च केवलान्वयिस्थले साध्यं पक्षवृत्ति न वेत्येतादृशसंशयादेवानुमित्युपपत्त्या तथाविधसंशयासंग्रहो न दोषाय इति वाच्यम् । प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयस्य केवलान्वयिग्रन्थे मणिकृतैव संगृहीततया तद्विरोधात् ।

वस्तुतस्तु तादात्म्यसम्बन्धेन वाच्यसाध्यकप्रमेयपक्षकस्थले च तादृशसंशयाप्रसिद्धिः तादात्म्यसम्बन्धेन पक्षसम्बन्धित्वाभावरूपकोट्यप्रसिद्धेः । न च साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयस्य पक्षतात्वेऽपि उक्तस्थले पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितेरुद्देश्यत्वे पक्षतावच्छेदकावच्छेदेन वर्त्तमानभेदप्रतियोगित्वकोटिकसंशयस्यैव सामानाधिकरण्येन साध्यवत्तानिश्चयप्रतिबध्यतया पक्षतात्वमङ्गीकर्त्तव्यं तच्च न सम्भवति प्रमेयत्वाद्यवच्छेदेन वर्त्तमानभेदाप्रसिद्ध्या कोट्यप्रसिद्धेरिति वाच्यम् । प्रमेयत्वाद्यवच्छेदेन वर्त्तमानस्य द्वित्वावच्छिन्नभेदस्यैव प्रसिद्ध्या साध्यतावच्छेदकावच्छिन्नतादृशभेदप्रतियोगित्वकोटिकसंशयस्यैव तत्र पक्षतात्वसम्भवात् । तत्र पक्षतावच्छेदकावच्छिन्नवृत्तिकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वोभयत्वावच्छिन्नतदभावकोटिकसंशयस्य पक्षतात्वोपगमसम्भवाच्च । एवमप्रसिद्धसाध्यकव्यतिरेक्यनुमानस्थले पक्षसाध्यवैशिष्ट्यावगाहिसंशयानुपपत्तेस्तत्र साध्यात्मकाभावप्रतियोगिनि पक्षसम्बन्धित्वसंशयस्य पृथिवीतरत् पक्षसम्बन्धि न वेत्याकारकस्यैव पक्षतात्वेनोपगन्तव्यतया पक्षसाध्यवैशिष्ट्यावगाहित्वनिवेशासम्भवात् ।

अथ वह्निव्याप्यसाध्यकस्थले महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकस्थले च वह्निमान्न वा पक्ष इत्यादिसंशयस्य पक्षतात्वप्रसङ्गः साध्यवत्तानिश्चयनिवर्त्तनीयत्वात्। न च सिद्धिकालेऽनुमितिवारणमेव पक्षताहेतुत्वकल्पनफलं एवञ्च उक्तसंशयस्यानुमितिहेतुत्वोपगमेऽपि सिद्धिदशायमनुमित्यापत्त्यसम्भवात् तस्य पक्षतात्वमिष्टमेव इति वाच्यम्। साध्यतावच्छेदकावच्छिन्नसाध्यतदभावान्यतरस्मिन् पक्षसम्बन्धावगाहिसन्देहस्यैव प्राचीनैः पक्षतात्वोपगमात् अन्यथा बाधसाधारणरूपेण पक्षतात्वोपगमेऽपि सिद्धिकालेऽनुमितिवारणसम्भवात् बाधवारकसंशयत्वनिवेशनस्यापि निष्प्रयोजनकतापत्तेः।

न च तादृशसंशयस्य वह्निव्याप्याद्यभाववत्तानिश्चयरूपबाधाप्रतिबध्यतया नातिप्रसङ्ग इति वाच्यम्। वह्निव्याप्याभावाभाववान् पर्वतः पर्वतो वह्निमान्न वा इति संशयस्य तादृशबाधनिश्चयप्रतिबध्यतया तावताऽपि तद्वारणासम्भवात्।

यत्तु प्रकृतसाध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रतिबध्यतानिवेशान्नोक्तातिप्रसङ्गः, वह्न्यभावविशिष्टज्ञानत्वावच्छिन्नाया वह्निव्याप्यवत्तानिश्चयप्रतिबध्यताया अवच्छेदककोटौ वह्निव्याप्यत्वावच्छिन्नविषयताया अनन्तर्भावादिति तन्न। वह्न्यभावादिसाध्यकस्थले वह्निमान्न वेत्यादिसंशयासंग्रहप्रसङ्गात्,वह्निविशिष्टबुद्धित्वावच्छिन्नाया वह्न्यभावादिनिश्चयप्रतिबध्यताया अवच्छेदकगर्भे वह्न्यभावत्वावच्छिन्नविषयताया अनिवेशात् यत्र च वह्निव्याप्यत्वावच्छिन्नस्यैव पक्षत्वं साध्यत्वञ्च तत्र वह्निव्याप्यो वह्निमान्न वेति संशयवारणस्याप्यशक्यत्वात्।

यत्तु साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयताघटितधर्मावच्छिन्नत्वेन प्रतिबध्यताया निवेशनीयतया वह्निव्याप्यवत्ताज्ञानं प्रति वह्न्यभावादिनिश्चयत्वेनाप्रतिबन्धकतया तद्विषयतायाः साध्यवत्त्वज्ञानप्रतिबन्धकतावच्छेदकत्वविरहेण नातिप्रसङ्गः। तदपि न। तावताऽपि महानसीयवह्नित्वावच्छिन्नसाध्यकस्थले महानसीयवह्न्यभावाभाववान् पर्वतः स वह्निमान्न वेति संशयवारणासम्भवात्।

अत्रोच्यते, संशयत्वं स्वनिष्ठविषयताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालित्वं ज्ञानभेदेन विषयताभेदानभ्युप-

गमात् संशयनिष्ठवह्निमत्पर्वतादिविषयताया अपि प्रत्येकं निश्चयवृत्तित्वात् प्रतिबन्धकतावच्छेदकघटकत्वोपपत्तिः वह्न्यभाववान् पर्वतो घटवान्न वेत्याकारकसंशयस्य तादृशधर्माक्रान्तस्य साध्यवत्त्वनिश्चयप्रतिबध्यस्य च वारणाय साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नत्वेन निरुक्तसंशयत्वघटकप्रतिबध्यता विशेषणीया, घटादिमत्ताज्ञानत्वावच्छिन्नप्रतिबध्यताया अतथात्वान् नातिप्रसङ्गः। तत्र पक्षे वह्न्यभाववान्न वेति संशयस्य पक्षतात्वमिष्टमेव तस्य वह्निः पक्षनिष्ठाभावप्रतियोगी न वेति संशयसमशीलत्वात्। स्वनिष्ठविषयतायाञ्च बाधप्रतिबध्यतावच्छेदकत्वं निवेशनीयन्तेन वह्निव्याप्यसाध्यकस्थले वह्निमान्न वा पक्ष इत्येतादृशसंशयस्य व्युदासः तत्र वह्निव्याप्याभावाभावत्वेन व्याप्यस्य पृथग्भाने ऽपि संशयत्वघटकीभूतस्वनिष्ठवह्निमत्पक्षविषयिताया वह्निव्याप्याभावनिश्चयप्रतिबध्यतावच्छेदकत्वविरहात्। एवञ्च शुद्धवह्नित्वावच्छिन्नसाध्यकस्थले वह्न्यभाववान् पक्ष इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवह्निमान्न वा पक्ष इत्येतादृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशनमित्यवधेयम्।

एतेनावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण कोटिद्वयावगाहिनो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिमत्तानिश्चयप्रतिबध्यत्वेऽपि निरुक्तसंशयत्वाभावेन न पक्षतात्वमिति संक्षेपः।

अथावच्छेदकावच्छेदेन कोटिमवगाहमानस्य कोटिद्वयावगाहिनः समुच्चयस्य पक्षतात्वापत्तिः तस्याप्युक्तरूपाक्रान्तत्वात्।

न च विरोधावगाहित्वनिवेशात्तद्वारणसम्भवः। कुत्रचित् किञ्चित्प्रतियोगिकविरोधभानस्य समुच्चयेऽप्यक्षतत्वात् साध्यतदभावादिविरोधावगाहित्वस्य प्रत्येकं सकलसंशयसाधारण्यासम्भवादिति चेन्न। संयोगादेरव्याप्यवृत्तित्वज्ञानदशायान्तद्वत्त्वग्रहविषयीभूतधर्मिणि तदभावादिग्रहोत्पत्त्या तद्वत्ताग्रहस्य तदभावग्रहप्रतिबन्धकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामपेक्ष्य व्याप्यवृत्तितावगाहित्वेनैव प्रतिबन्धकतोपेयते। व्याप्यवृत्तित्वज्ञानवाच्छिन्नाधारताकत्वं सर्वत्र प्रतिबन्धकज्ञाने तादृशाधारताया अन्ततः संसर्गतये-

च भानमुपेयते एवञ्च समुच्चयनिष्ठकोटिविषयिता न विपरीतधी-प्रतिबन्धकतावच्छेदिका, व्याप्यवृत्तित्वविषयित्वानिरूपितत्वात् अत उक्तसंशयत्वनिरुक्तौ स्वपदेन समुच्चयोपादानासम्भवेन तस्य पक्षतात्वापत्तिविरहात् ।

अथवा स्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकीभूता या स्वावच्छेदकधर्मावच्छिन्ननिरूपितविरोधविषयितानिरूपिता प्रकारिता सामानाधिकरण्यसम्बन्धेन तद्विशिष्टप्रकारितैव संशयत्वं तच्च समुच्चयव्यावृत्तं समुच्चये विरोधाभानेन कोटिद्वयविषयितयोर्विरोधविषयित्वानिरूपितत्वात् संशये चान्ततः कोट्योः संसर्गतयापि परस्परविरोधभानोपगमेन सकलसंशयसंग्रहः । यदंशे संशयत्वं तत्कोटिविरोधस्यैव उक्तरूपेण उपादानसम्भवात् न वस्त्वन्तराविरोधभानमादायातिप्रसङ्गः ।

केचित्तु साध्यनिश्चयसाध्याभावनिश्चयप्रतिबध्यतावच्छेदकविशेष्यताशालित्वं समुदितार्थः संशये च धर्मिणि उभयप्रकारतानिरूपितैकविलक्षणविषयता समुच्चयवैलक्षण्यायोपगम्यते इति तादृशविषयताया विभिन्नरूपेण उभयनिश्चयप्रतिबध्यतावच्छेदकतया नासम्भव इत्याहुः । तच्चिन्त्यम् ।

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतदभावकोटिकज्ञानत्वादिकमुपेक्ष्य निरुक्तरूपेण संशयनिवेशस्य प्रयोजनं दर्शयति । तेनेति । न पक्षेति । पक्षविशेष्यकस्य । पक्षः साध्यवान्न वेत्यस्य । साध्यविशेष्यकस्य । साध्यं पक्षवृत्ति न वेत्याकारकस्य संशयस्य, नाननुगमः तथा सति फलस्याविलक्षणतया व्यभिचारेण कारणता भज्येतेति भावः ।

इदमुपलक्षणम्, साध्यवत्त्वज्ञेदकोटिकसंशयाननुगमोऽपि बोध्यः । विशिष्य सम्बन्धनिवेशनप्रयोजनं दर्शयति । न वेति । सम्बन्धान्तरेण । तत्सम्बन्धातिरिक्तसम्बन्धेन । सन्देहे । सन्देहदशायाम् । निर्णीतसम्बन्धेन । पक्षांशे साध्यीयसम्बन्धविधया तत्कालीननिर्णयविषयीभूततत्सम्बन्धेन । एतदनन्तरमनुमिताविति पूरणीयम् । तत्सम्बन्धेन संशयासत्त्वेऽपि तत्सम्बन्धेन सिद्धिशून्यकाले इष्टापत्तिसम्भवान्निर्णीतेत्युक्तं, सम्बन्धमनिवेश्य साध्यनिर्णयसामान्यनिवर्त्यत्वनिवेशेऽप्रसिद्धिप्रसङ्गात् यत्किञ्चिन्निश्चयानिवर्त्यत्वं यत्किञ्चि-

त्संसर्गकनिर्णयसामान्यनिवर्त्यत्वं वा यदि निवेश्यते तदाऽयमति-प्रसङ्गो बोध्यः। धर्मत्वांशपरित्यागप्रयोजनमह । न वा तमःप्रभृति-ष्विति। स्वधर्मत्वसंशयविषयसाध्यकत्वं पक्षत्वमित्युक्तौ धर्मत्वनि-वेशेऽव्यवृत्तिसाध्यकघटादिपक्षकस्थले न पक्षतावैकल्यम्, घटादि-समवेतत्वस्य प्रसिद्ध्या गगनादौ तत्संशयसम्भवादिति तमःप्रभृति-पर्यन्तस्य पक्षत्वानुसरणम्, तथा च साध्ये सम्बन्धान्तरेण पक्ष-वृत्तित्वसन्देहदशायां निर्णीतसम्बन्धेनानुमितिवारणाय प्रकृतसा-ध्यतावच्छेदकसम्बन्धेन स्ववृत्तित्वसंशयस्यावश्यं निवेशनीयतया तमःप्रभृतिसमवेतत्वस्याप्रसिद्ध्या साध्ये पक्षवृत्तित्वसंशयमादाया-पि न तत्र पक्षतोपपत्तिरिति भावः। स्वरूपसम्बन्धेन तमोवृत्ति-त्वस्य प्रसिद्ध्या तेन सम्बन्धेनानुमितौ नानुपपत्तिरतः समवायेने-ति। पक्षे साध्यीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नधर्मितासंश-यस्य पक्षतात्वे तमःप्रभृतिषु वृत्तिमत्साध्यसाधने नानुपपत्तिरत आकाशादीति। तद्वैकल्यम्। पक्षतावैकल्यम्।

सन्देहोऽनुमितौ हेतुः। विशेषणतया। पक्षधर्मताज्ञाननिष्ठानुमि-तिजनकतायामवच्छेदको वा। अथ वा उपलक्षणतया तादृशजनक-तायामवच्छेदकस्तत्राद्यं पक्षद्वयं दूषयति मूले सन्देह इति। विशेष-णम्। अपेक्षणीयानुमित्यव्यवहितप्राक्सत्ताकं सत् अनुमितिकारणं विशेषणविधया कारणतावच्छेदकं वेति यावत्। परामर्शपूर्वं तस्य संशयस्य नाशादित्यन्वयः। यत्रादौ लिङ्गदर्शनं ततो व्या-प्तिस्मरणं तदभिप्रायेण लिङ्गदर्शनस्य, यत्र तयोर्विपरीतक्रम-स्तदभिप्रायेण व्याप्तिस्मरणस्य नाशकत्वमभिहितं, अत एकत्र उभयोर्नाशकत्वासम्भवेऽपि न क्षतिः। आदिपदेन यत्र संशया-नन्तरक्षणे व्याप्तिस्मरणाद्यनुगुणज्ञानोत्पादस्तदनन्तरमेव व्याप्ति-स्मरणादिः तत्रत्यतादृशज्ञानसंग्रहः। द्वितीयं दूषयति। नोपल-क्षणमिति। अव्यावर्त्तकतापत्तेः। सिद्धिस्थलेऽनुमित्यवारकतापत्तेः। तत्कालीनपरामर्शस्यापि कालान्तरीयसंशयविषयधर्मिवृत्तित्वाव-गाहितया सामग्र्या अक्षतत्वादिति भावः।

अथ साध्यसन्देहोऽनुमितौ हेतुरेव लिङ्गदर्शनादेः पूर्वोत्पन्नस्य संशयस्य तेन विनाशेऽपि तदनन्तरं परामर्शाव्यवहितप्राक्क्षण-जातसंशयान्तरादेवानुमितिरिति कल्प्यते।

न चानुत्पन्न एव संशये यत्र स्वसामग्रीबलात् परामर्शोत्पत्ति-स्तत्रानुमित्यनुदयप्रसङ्गः परामर्शकाले तदुत्तरञ्च विशेषदर्शनरूप-प्रतिबन्धकवशेन संशयोत्पादासम्भवादिति वाच्यम् । फलानुरोधेन सर्वत्रैवानुमित्युपधायकपरामर्शाव्यवहितप्राक्क्षणे संशयोत्पादक-ल्पनात् । यत्र संशयोत्पादद्वितीयक्षण एव परामर्शसामग्री प्रमाणसि-द्धा यत्र वा परामर्शसामग्रीपूर्वक्षणे संशयजनकधर्मिज्ञानाद्यभावः प्रामाणिकस्तत्र परामर्शानन्तरं साध्यस्य प्रत्यक्षनिश्चय एव उपग-म्यते तत एव प्रवृत्त्याद्युपपत्तेः तत्रानुमिनोमीत्यनुव्यवसायस्याप्य-गत्या भ्रमत्वमेव कल्प्यते अनुगताननुगतसिषाधयिषाभावकूटवि-शिष्टसिद्ध्यभावस्यानुमितिहेतुत्वापेक्षया संशयहेतुतायां लाघवात् । संशयहेतुत्वोपगमे बाधनिश्चयदशायां संशयाभावादेवानुमितिर्वा-रणसम्भवात् नानाविधबाधाभावस्यानुमितिहेतुत्वाकल्पनेनानुमिति-सामग्रीप्रतिबन्धकतायां तदनिवेशेन च लाघवात् । जनकज्ञानविरो-धितयैव च बाधादीनां हेत्वाभासतोपपत्तेः । संशयस्य च कार्यता-वच्छेदककोटौ कारणवैशिष्ट्यं निवेश्य तादृशसंशयत्वेनैव हेतुता वाच्या, अतो दीधितिकारोक्तप्रकारस्य स्वत्वघटिततया स्वत्वा-ननुगमेन प्रतिबध्यतादीनां स्वस्वावच्छेदकभेदेन भिन्नानामननुगमे-न च शब्दानुगममात्रपर्यवसानेऽपि न क्षतिः । संशयस्य बाधसा-धारणतदभाववत्ताज्ञानत्वेन कारणत्वं न तु पक्षधर्मिकसाध्यतद-भावोभयज्ञानत्वरूपसंशयत्वेन गौरवात् । बाधनिश्चयदशायाञ्च नानुमित्यापत्तिसम्भवः । प्रत्यक्षादिसाधारणालौकिकविशिष्टबुद्धि-त्वावच्छिन्नं प्रति बाधनिश्चयस्य प्रतिबन्धकताया आवश्यकत्वादि-ति तु न श्रद्धेयम् । बाधनिश्चयेऽप्रामाण्यग्रहसत्त्वेऽनुमित्यापत्तेः, अ-प्रामाण्यग्रहाभावस्य संशयजनकतायां प्रयोजनविरहेणानिवेशात्, साध्यसन्देहेऽप्रामाण्यग्रहसत्त्वेऽप्यनुमित्युपगमे क्षतिविरहात्, सं-शयेऽप्रामाण्यनिश्चयेऽनुमित्युत्पादेऽपि संशये विषयसंशयस्याकिञ्चि-त्करत्वात्, तत्राप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्यैव निवेशनीय-तयाऽप्रामाण्यशङ्कास्कन्दितबाधनिश्चयादनुमित्यापत्तेर्दुर्वारतापत्ते-रिति चेन्न । प्रत्यक्षादिना निर्णीतस्यापि साध्यस्यानुमित्सया अनुमितेरानुभविकत्वात् संशयस्य पक्षतात्वे तदनुपपत्तेरनु-भवापलापे विशेषदर्शनमूलकप्रत्यक्षादेव सर्वत्र प्रवृत्त्यादिसम्भवे

अनुमानप्रामाण्यस्यैव विलयापत्तेः संशयानन्तरजातसिद्ध्यात्मकप-रामर्शादनुमित्यापत्तेश्च इति संक्षेपः।

(चि०) नापि साधकबाधकप्रमाणाभावः, उभ-याभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात्। नापि अभाव-द्वयं तथा, बाधकप्रमाणाभावस्य व्यर्थत्वात्, ह्रदादेः पक्षत्वेऽपि बाधहेत्वसिद्ध्यादेरावश्यकत्वेन अनुमित्य-नुत्पादात्। नापि साधकप्रमाणाभावः श्रोतव्यो म-न्तव्य इति श्रुत्या समानविषयकश्रवणानन्तरं मनन-बोधनात्। प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात्। एकलिङ्गा-वगतेऽपि लिङ्गान्तरेण तदनुमानाच्च मन्तव्यश्चोपप-त्तिभिरिति स्मरणात्।

(दी०) संशययोग्यतां निरस्यति। नापीति। साधक-बाधकमाने सिद्धिबाधौ। केवलान्वयिनि च पक्षनिष्ठाभावप्रति-योगित्वधीरेव सुलभो बाधः।

(गा०) संशयनाशेऽपि यावन्न निर्णयस्तावत्पर्यन्तं संशययोग्यता-या अनपायात् तस्या एव पक्षतात्वं सम्भवतीति तदनिराकरणे मूल-स्य न्यूनता, अतो नापीति मूलमेव संशययोग्यतानिराकरणपरतया व्याचष्टे। संशययोग्यतामिति। साधकबाधकमानपदस्य सिद्धि-बाधहेतुरूपयथाश्रुतार्थपरत्वे सर्वदैवानुमित्यनुपपत्तिः अनुमितिपूर्वं सिद्धिबाधहेतुचक्षुरादेः सिद्धिहेतुपरामर्शस्य च सर्वत्रैव सत्त्वादतः तत्पदं सिद्धिबाधपरतया व्याचष्टे। साधकेति। यद्यपि बाधकमा-नपदस्य बाधजनकतत्सामग्रीपरत्वेऽपि न क्षतिः बाधसामग्र्यनन्त-रक्षणे कदाप्यनुमितेरनुत्पादात्। तथाऽपि बाधजनकत्वमात्रेण त-त्सामग्रीपरत्वे तदवच्छिन्नाभावस्य हेतुता लभ्येत तत्र चोक्तैवानुप-पत्तिः बाधसामग्रीत्वेन तत्परत्वञ्च विना लक्षणां न निर्वहति ल-क्षणाया आवश्यकत्वे बाध एव लक्षणोचिता इत्यभिप्रायेण इदम्।

ननु पक्षे साध्याभावनिश्चयस्य बाधतया केवलान्वयिनि सा-

ध्याभावाप्रसिद्ध्या बाधाप्रसिद्धिरतस्तदभावघटितपक्षतावैकल्यम् अत आह । केवलान्वयिनि चेति । पक्षानिष्ठेति । साध्य इत्यादिः । श्रीः । निर्णयः । सुलभो बाध इति । तथा च तादृशबाधाभावस्यैव पक्षताघटकत्वान्नानुपपत्तिरिति भावः । सुलभ इत्यनेन तत्राभावांशे साध्यीयत्वभ्रमात्मकबाधस्यापि कदाचित् कस्यचित् पुरुषस्य प्रसिद्ध्या तदभावघटितत्वमपि पक्षतायाः सम्भवतीति सूचितम् ।

(चि०) अथ सिषाधयिषितसाध्यधर्मा धर्मी पक्षः । तथा हि मुमुक्षोः शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविशेषानुमितीच्छया आत्मानुमानम् । अत एव 'प्रत्यक्षपरिकलितमपि अर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः । न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः' इति वाचस्पतिवचनयोरविरोधः अनुमित्सातद्विरहाभ्यां तदुपपत्तेरिति चेन्न । सन्देहवत्परामर्शपूर्वं सिषाधयिषाया अपि अभावात् योग्यतायाश्च अनिरूपणात्, सिषाधयिषाविरहेऽपि घनगर्जितेन मेघानुमानात् स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेन अनपेक्षितानुमानदर्शनाच्चेति ।

(दी०) ननु तत्रापि पुनरनुमित्सा, ततः परामर्शान्तरं, स्मरणात्मकाद्वा परामर्शादनुमितीष्टसाधनताविषयकादनुमित्सा, ततोऽनुमितिरिति फलबलात् कल्पनीयमित्यत आह । सिषाधयिषेति । न च अनुमितिजनिकेच्छैव पक्षता । सा च क्वचित् स्वनिष्ठेव सर्वत्र ईश्वरनिष्ठैव सुलभेति वाच्यम् । तस्या नित्यत्वेन सिद्धौ सत्यामपि पक्षताप्रसङ्गात् । न च तस्यास्तदानीं न तज्जनकत्वम् । तद्धि न तद्योग्यता, अनपायात् । न च तदुपधानम् । अनुमितेः पूर्वं तदभावात् । न च तत्सामग्रीसमवधानम् ।

कारणमात्रस्य पक्षताकुक्षिनिक्षेपप्रसङ्गाच्छेषवैयर्थ्यात् । तदानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्य वक्तव्यत्वापाताच्च ।

(गा०) व्याप्तिस्मरणादिना पूर्वानुमित्सानाशस्थलेऽनुमितिमुपपाद्य सिषाधयिषाविरहेत्यादिग्रन्थमवतारयति । नन्विति । तत्रापि । परामर्शपूर्वमनुमित्सानाशस्थलेऽपि । पुनरनुमित्सा । परामर्शानन्तरमनुमित्सान्तरम् ।

ननु परामर्शानन्तरोत्पन्नेन इच्छाजनकज्ञानेन इच्छाजननसमकालं परामर्शस्य विनाशात्तादृशेच्छातः कथमनुमितिरित्यत आह । ततः परामर्शान्तरमिति । विनश्यदवस्थानुमित्सयाऽनुमितिमुपपाद्याविनश्यदवस्थयाप्युपपादयति । स्मरणात्मकाद्वेति । चाक्षुषादिपरामर्शस्यानुमित्यंशे इष्टसाधनताप्रकारकसमूहालम्बनत्वं नोपपद्यते स्वायोग्यमुख्यविशेष्यकज्ञाने बहिरिन्द्रियस्यासामर्थ्यादतस्तस्य तथात्वमुपेक्ष्य तन्मूलकव्याप्यवत्पक्षगोचरसंस्कारात् पूर्वानुमित्साजनकेष्टसाधनताज्ञानाहितसंस्कारसहकृतात्समूहालम्बनस्मरणात्मकपरामर्शान्तरस्यानुसरणम् । स्मरणेत्युपलक्षणम्, तथाविधमानसपरामर्शोऽपि बोध्यः ।

ननु कल्पकाभावान्नतादृशकल्पनासम्भव इत्याशङ्कां परिहरति । फलबलादिति । सिषाधयिषारूपकारणं विना अनुमित्यात्मककार्यानुपपत्तिबलादित्यर्थः । सिषाधयिषाविरहेऽपीति मूलस्यानुमातुरित्यादिः, तेन ईश्वरस्य सिषाधयिषायास्तत्राक्षतत्वेऽपि न क्षतिः । इच्छारूपपक्षतया आत्मनिष्ठप्रत्यासत्त्यैव हेतुता इत्यभिप्रायेणेदम् ।

न च तत्रापि पूर्ववत् फलबलादनुमित्सां कल्पयित्वा अनुमितिः शक्योपपात्तिका । तत्र तदभावस्यानुभवसिद्धतया कल्पनासम्भवात्, पूर्वं कदापि यस्य मेघानुमितिर्नासीत् तेन तत्रेष्टसाधनताया अगृहीतत्वेन तद्गोचरस्मरणस्य तदनुभावकस्य तदानीमभावेन तद्गोचरानुभवस्य चासम्भवेन तदनुमित्सासामग्र्या एव दुर्घटत्वाच्च विषयनिष्ठप्रत्यासत्त्यैवानुमित्साया हेतुता वाच्या इत्यभिप्रायेण उक्तस्थले पक्षतोपपत्तिं दीधितिकृदाशङ्कते । न चानुमितीति । इच्छैव । समानाधिकरणव्यधिकरणसाधारणमिच्छामात्रमेव । स्व-

निष्ठेव । अनुमातृसमवेतेव । तस्याः । ईश्वरेच्छायाः । पक्षताप्रसङ्गादिति । तथा च सिद्ध्यनन्तरमनुमित्यापत्तिरित्यर्थः । तदानीम् । सिद्धिदशायाम् । न तज्जनकत्वमिति । तथा चानुमितिजनकत्वविशिष्टेच्छात्वेनैव हेतुता, कारणतावच्छेदकविशिष्टस्य प्राक्सत्त्वमेव फलोपधाने तन्त्रमिति नातिप्रसङ्ग इति भावः । जनकत्वेन जनकत्वे आत्माश्रयसत्त्वेऽपि स्फुटत्वात्तमुपेक्ष्य दूषणान्तरमाह । तद्धीति । योग्यता । स्वरूपयोग्यता । अनपायादिति । कारणतावच्छेदकधर्मरूपयोग्यतायाः सर्वदैव सत्त्वादित्यर्थः । तदुपधानम् । तद्वैशिष्ट्यम् । तदभावात् । अनुमितिवैशिष्ट्याभावात् । तथा चानुमित्युत्पादनियामिकाया अनुमितिविशिष्टेच्छायाः प्रागसत्त्वादनुमितेरवानुपपत्तिः । इदमुपलक्षणम्, अनुमित्यनन्तरमनुमित्यापत्तिरपि द्रष्टव्या ।

नन्वनुमितिजनकतावच्छेदका यावन्तो धर्माः प्रत्येकं तदवच्छिन्नकूटविशिष्टत्वरूपतत्सामग्रीसमवधानमेव इच्छाविशेषणं देयं तच्च कार्याव्यवहितप्राक्क्षण एव इति नातिप्रसङ्ग इति शङ्कां परिहरति । न तत्सामग्रीति । कारणमात्रस्येति । तथा च परामर्शादिसत्त्वदशायामीदृशपक्षताविरहादेवानुमितिवारणसम्भवात परामर्शादीनां हेतुताविलयप्रसङ्ग इति भावः ।

ननु सामग्रीसमवहितेच्छात्वेन न पक्षताया हेतुत्वमुपेयते सामग्रीघटकहेतूनां विशेष्यविशेषणभावे विनिगमनाविरहात् तेषां स्वतन्त्रकारणतयैवातिप्रसङ्गस्य वारितत्वात् किन्तु ईश्वरेच्छामादाय सिद्धिकाले पक्षताव्यवहारवारणाय पक्षपदप्रवृत्तिनिमित्तत्वमेव ताद्रूप्येण उपेयते अतो नायं दोष इति दूषणान्तरमाह । शेषेति । अनुमितिसामग्र्या एव पक्षतात्वसम्भवेन इच्छारूपविशेष्यभागनिवेशस्य निष्प्रयोजनकत्वादित्यर्थः । अत्रेष्टापत्तौ दूषणान्तरमाह । तदानीमिति । तदानीम् । परामर्शादिसमवहितसिद्धिदशायाम्, अन्वयश्चास्य सामग्रीविरहेत्यनेन । वक्तव्यतापातात् । सामग्रीमध्यनिवेशापातात् । तथा च तादृशकारणं सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव । एवञ्च तस्यैव पक्षतात्वमस्तु अलङ्कारणान्तरस्य पक्षताकुक्षिनिवेशनेनेति सिद्धान्तलक्षण एव पर्यवसानामिति भावः ।

(चिं०) उच्यते–सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः। तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः। यत्र साधकप्रमाणे सति असति वा सिषाधयिषा, यत्र वा उभयाभावतस्तत्र विशिष्टाभावात् पक्षत्वम्। यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वं तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम्।

इति चिन्तामणौ पक्षताप्रकरणम्।

(दी०) सिषाधयिषेति। यत्र अनुमित्सानन्तरं साध्यतद्व्याप्यवत्त्वविशिष्टपक्षस्मरणम्, अनुमितीष्टसाधनताविषयकतादृशस्मरणाद्वा अनुमित्सा, अनुमित्सापूर्वकालोत्पन्नविशेषणस्मरणाद्वा अनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितात् साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरं च अनुमितिस्तत्र पक्षतासम्पत्तये सहकृतान्तं साधकमानविशेषणम्।

(गा०) सिद्धान्तलक्षणे सिद्ध्युत्तरक्षणे सिषाधयिषाधीनानुमितेरुपपादनाय सहकृतान्तविशेषणमुपात्तम्, तच्च तदैवोपपद्यते यदि सिद्धिसिषाधयिषापरामर्शानां त्रयाणां अनुमित्यव्यवहितप्राक्क्षणेऽवस्थितिः सम्भवति, न चैवमुपपद्यते, आत्मसमवेतयोग्यविशेषगुणानां द्विक्षणस्थायितया त्रयाणां युगपदनवस्थानात्।

न च यत्रापेक्षाबुद्ध्यात्मकपरामर्शस्य साध्यनिश्चयस्य वा प्रथममुत्पादस्तत्रैव तृतीयक्षणे त्रयाणामेवावस्थानं सम्भवति इति वाच्यम्। अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमङ्गीकुर्वाणैस्तदव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादानभ्युपगमात्। अन्यथा स्वसमानाधिकरणस्वानन्तरोत्पन्नविशेषगुणात्मकनाशकबलात् तस्या अपि तृतीयक्षणे विनाशापत्तेरित्याशङ्कापरिजिहीर्षया सिद्ध्यात्मकसमूहालम्बनपरामर्शस्थले तादृशविशेषणप्रयोजनं दर्शयति। यत्रेत्यादिना। अनुमित्साव्यवहितोत्तरक्षणे विशिष्टपक्षप्रत्यक्षं न सम्भवति,

इच्छोत्पत्तिकाले ज्ञानानुत्पत्त्या विशेषणज्ञानघटितसामग्रीविरहात्, इच्छापूर्वक्षणे तादृशसामग्रीसमवधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्या बलवत्त्वेन तस्या एवोत्पादासम्भव इत्यतो विशिष्टस्मरणानुधावनम् । न्यूनताभङ्गाय परामर्शपूर्वोत्पन्नेच्छास्थले प्रयोजनमुक्त्वा तदनन्तरोत्पन्नेच्छास्थले तद्दर्शयति । अनुमितीति । यत्रेत्यनुषज्यते । इच्छासामग्रीसम्पत्तयेऽनुमितीष्टसाधनताविषयकेति । तादृशस्मरणात् । साध्यतद्व्याप्यविशिष्टपक्षस्मरणात् । पूर्वोक्तयुक्त्या चाक्षुषादिपरामर्शस्यानुमिताविष्टसाधनतावगाहित्वासम्भवात्, यत्र परामर्शाव्यवहितपूर्वक्षणे इष्टसाधनताज्ञान तत्र तत्पूर्वक्षण एव फलेच्छासम्भवेन तस्याः परामर्शोत्पत्तिसमये नाशात् तदुत्तरमनुमित्साया असम्भवेनेष्टसाधनताविषयकपरामर्शस्याऽऽवश्यकत्वात् स्मरणानुधावनम् । न्यूनतापरीहाराय प्रत्यक्षात्मकपरामर्शस्थले प्रयोजनमाह । अनुमित्सापूर्वेति । अत्रापि यत्रेत्यनुषज्यते । प्रत्यक्षात्मकधूमत्वादिविशेषणज्ञानस्थले तज्जनकसन्निकर्षादितस्तदुत्तरक्षणे विशिष्टप्रत्यक्षमेव भविष्यति न त्विच्छा । विनश्यदवस्थसन्निकर्षाद्विशेषणप्रत्यक्षानुधावने च प्रयासगौरवमतो विशेषणस्मरणपर्यन्तानुधावनम् । अनुमित्सापूर्वकाले परामर्शजनकसन्निकर्षसत्त्वे तस्या एव अनुपपत्तिरतोऽनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितादिति । सहकृतान्तम् । सहकृतान्तभागोपस्थाप्यसिषाधयिषाविरहवैशिष्ट्यम् । तस्य अभावविशेषणत्वे सिषाधयिषादशायां तदभावविशिष्टस्य सिद्ध्यभावस्यासम्भवात् सिद्धौ सत्यामसत्याञ्चानुमित्यनुपपत्तिरतः साधकमानविशेषणमिति ।

(दी०) सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारिका अनुमितिविषयिणीच्छा । यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वे अनुमित्यनुत्पादात् अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वते वह्निज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरमनुमित्युत्पादाच्च

(गा०) सिषाधयिषापदस्य सिद्धीच्छासामान्यपरत्वे प्रत्यक्षत्वादिप्रकारकेच्छाबलादसत्यां प्रत्यक्षादिसामग्र्यां सिद्धिदशाया-

मनुमित्यापत्तिः, अनुमितिगोचरेच्छापरत्वे यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छाबलात् सिद्धिकालेऽनुमित्यापत्तिः । न चानुमित्युत्पत्त्यापि तादृशेच्छाविषयसिद्धेस्तत्रानुमितिरिष्टैवेति वाच्यम् । प्रकृतानुमित्युत्पत्त्यैव यादृशेच्छाया विषयसिद्धिस्तादृशेच्छासत्त्व एव सिद्धिकालेऽनुमितेरानुभविकत्वात् उक्तेच्छायाश्चान्तत उपस्थितपदार्थगोचरमानसज्ञानेनापि विषयसिद्ध्या अकिञ्चित्करत्वादित्यतः सिषाधयिषापदार्थं व्याचष्टे । सिषाधयिषा चेति ।

घटविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वे सिद्धिसत्त्वे वह्न्यनुमित्यनुत्पादात्तत्साध्यविशिष्टेति । तत्सम्बन्धेन तत्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः । तेन कालिकसम्बन्धेन वह्निविशिष्टपर्वतविषयकानुमितिर्जायतां द्रव्यत्वावच्छिन्नविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वेऽपि सिद्धिकाले संयोगादिना न वह्नित्वावच्छिन्नस्यानुमितिः । वह्निविशिष्टमहानसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयकानुमितिर्जायतामितीच्छाबलात् सिद्धिसत्त्वे पर्वतो वह्निमानित्यनुमित्यनुत्पादात् तत्पक्षेति । तत्पक्षतावच्छेदकावच्छिन्नेत्यर्थः ।

न च यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छाबलादिव आलोकवान् पर्वत इत्याद्यनुमितिसामग्रीदशायां वह्निमत्पर्वतविषयकानुमितिर्जायतामितीच्छाबलादपि सिद्धिसत्त्वे वह्निविधेयकानुमितिर्न जायते तत्कालीनसिद्ध्यप्रतिबध्यालोकाद्यनुमित्युत्पत्त्यैव तादृशेच्छाविषयवास्तववह्निमत्पर्वतविषयकानुमितिसिद्धेरित्युक्तरूपेणापि इच्छाया उत्तेजकत्वं न सम्भवतीति वाच्यम् । साध्यविशिष्टपक्षनिरूपितविलक्षणविषयिताप्रकारकत्वेनैवेच्छाया उत्तेजकत्वोपगमात् । आलोकवान् पर्वत इत्याद्यनुमितेर्वह्निविशिष्टपक्षनिरूपितविलक्षणविषयिताशून्यत्वेन तदुत्पत्त्या तादृशविषयिताप्रकारकेच्छाविषयसिद्ध्यसम्भवात् । साध्यविशिष्टपक्षनिरूपितत्वञ्च साध्यावच्छिन्नपक्षनिष्ठनिरूपकताकत्वमतो ह्रदो वह्निमानित्यादौ साध्यविशिष्टपक्षाप्रसिद्धावपि न तादृशविषयितायास्तत्प्रकारकानुमित्साया‍श्चाप्रसिद्धिः । ह्रदादिनिष्ठस्य तादृशभ्रमवृत्तिविषयितानिरूपकत्वस्यापि ह्रदाद्यंशे प्रकारीभूतवह्न्याद्यवच्छिन्नत्वात् ।

वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वेत्यनेन तत्साध्यता-

वच्छेदकावच्छिन्नतत्संसर्गावच्छिन्नविधेयतानिरूपिततत्पक्षतावच्छेदकावच्छिन्नोद्देश्यताकत्वं विवक्षितं अतो वह्निमान् पर्वतो घटवानित्याद्यनुमितिसामग्रीदशायां पूर्वोक्तयुक्त्या वह्निमत्पर्वतविषयकानुमितिर्जायतामित्याकारकेच्छाबलात् पर्वतादिपक्षकवन्ह्यादिविधेयकानुमित्यनुत्पादेऽपि न क्षतिः । तादृशोद्देश्यतात्वेन च तादृशोद्देश्यताकत्वप्रकारकत्वं विवक्षणीयं तेन केवलपर्वतत्वाद्यवच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताकत्वप्रकारकानुमितसादशायां पर्वते अन्यानुमितिसामग्रीसत्त्वे वह्नेः सिद्धिसत्त्वे न वन्ह्यनुमित्यापत्तिः(१) । साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशप्रयोजनं दर्शयति । यत्किञ्चिदिति । यत्किञ्चिद्विषयकत्वप्रकारकत्वं निवेश्यापि यत्किञ्चिज्ज्ञानं जायतामित्यादीच्छावारणं सम्भवतीति यत्किञ्चिद्गोचरत्वप्रकारकेच्छानुधावनम् ।

न चेच्छापूर्वं यत्किञ्चिद्गोचरज्ञानस्यावश्यं सिद्धत्वात् तादृशेच्छैव न सम्भवति ज्ञानगोचरेच्छायां स्वरूपसत्याः स्वविषयसिद्धेरेव विरोधित्वात् । तदुक्तं न हि ज्ञाने जाते ज्ञानेच्छा भवतीति वाच्यम् । एतदुत्तरवर्त्ति यत्किञ्चिद्गोचरं ज्ञानं जायतामित्याद्याकारकेच्छाया विवक्षितत्वात् ।

नन्वनुमितित्वप्रकारकत्वं निवेश्यैव तथाविधेच्छावारणसम्भवे किं गुरुतरसाध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनेनेत्यत आह । अनुमितित्वाप्रकारिकायामपीति । प्रत्यक्षाद्यात्मकसिद्धिदशायां पर्वते वह्निज्ञानं जायतामित्याकारकेच्छा न सम्भवतीति तद्विषयीभूतप्रत्यक्षादिरूपसिद्धेरेव सत्त्वात्, अतः प्रत्यक्षाद्यतिरिक्तामिति । शाब्दादिरूपसिद्धौ सत्यां प्रत्यक्षाद्यतिरिक्तं ज्ञानं जायतां इत्या-

---

(१) एवं पक्षतावच्छेदकादिनिष्ठानवच्छिन्नत्वावगाहित्वमपि निवेशनीयं अन्यथा जातिमान् वह्निव्याप्यवानिति परामर्शकाले पर्वतो वह्निमानिति सिद्धिसत्त्वेऽनवच्छिन्नत्वानवगाहीच्छाकाले पर्वतः वह्निमानित्यनुमित्यापत्तिः, पर्वतो वह्निव्याप्यवानिति परामर्शकालीनजातिमान् वह्निव्याप्यवानिति परामर्शशून्यकालीनानवच्छिन्नत्वानवगाहीच्छानाञ्च तत्तद्व्यक्तित्वेनोत्तेजकत्वं इति बोध्यमिति पाठः क्वचित् पुस्तके दृश्यते ।

धीच्छाया उत्पादासम्भवात्। प्रत्यक्षाद्यनन्तरमिति। प्रत्यक्षादिरूपसिद्ध्यनन्तरमित्यर्थः। अनुमित्युत्पादाच्चेति। तथा चानुमितित्वप्रकारकत्वं निवेशयितुमशक्यमेव तादृशेच्छानामसंग्रहप्रसङ्गादिति भावः।

इदमुपलक्षणम्। अनुमितित्वप्रकारकत्वनिवेशेऽपि घटाद्यनुमितिर्जायतामित्यादीच्छाकाले सिद्धिसत्त्वे वह्न्याद्यनुमितिवारणाय प्रकृतसाध्यादिविषयकत्वप्रकारकत्वनिवेशनमावश्यकम्।

न च प्रकृतसाध्यादिविषयिणी या अनुमितिस्तद्विषयकत्वनिवेशेनापि दर्शितेच्छावारणसम्भव इति वाच्यम्। दर्शितेच्छाया अपि घटाद्यनुमितित्वेन वह्न्यादिगोचरसमूहालम्बनानुमितिविषयकत्वात्।

न चानुमितित्वप्रकारकत्वानिवेशेऽपि अनुमितिरेव यत्र प्रत्यक्षत्वादिना इच्छाविषयस्तत्रानुमित्यापत्तिरिष्टत्वात्। अनुमितौ प्रत्यक्षत्वभ्रमदशायामेव तादृशेच्छाया उत्पादात् तस्या अनुमितित्वप्रकारकेच्छासमशीलत्वादिति हृदयम्।

न चानुमितित्वप्रकारकत्वस्यानिवेशे पर्वते वह्नेः प्रत्यक्षतः सिद्धौ शाब्दसामग्र्याञ्च सत्यां पर्वते प्रत्यक्षाद्यतिरिक्तं वह्निज्ञानं जायतामितीच्छासत्त्वेऽनुमित्यापत्तिरिति वाच्यम्। तत्र पक्षतासत्त्वेऽप्यनुमितित्वप्रकारकेच्छाविरहविशिष्टसमानविषयकशाब्दसामग्र्याः प्रतिबन्धकत्वादेवानुमितिवारणसम्भवात्।

अथ सिद्धिदशायां पर्वते वह्नेरन्यज् ज्ञानं जायतामितीच्छासत्त्वेऽनुमित्यापत्तिस्तस्या अप्यनुमितिविषयकत्वात्। न चेष्टापत्तिः, तदुत्तरं पर्वतो वह्निमान् इत्यादिमानसानुत्पत्त्याऽपीच्छाविषयासिद्धेस्तादृशेच्छाया यत्किञ्चिद्गोचरं ज्ञानं जायतामित्येतादृशेच्छातुल्यत्वात्।

न च प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपप्रतिबन्धकसत्त्वान्नापत्तिरिति वाच्यम्। प्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टाया एव मानसादिसामग्र्या अनुमितिप्रतिबन्धकत्वात्। अन्यथा सिद्धिशून्यकालेऽपि तादृशेच्छासत्त्वेऽनुमित्यनुत्पादप्रसङ्गात्।

न चोक्तयुक्त्या वह्निविधेयकत्वावगाहित्वनिवेशस्यावश्यकत्वात् वह्निप्रकारकत्वावगाहिदर्शितेच्छाबलात् नानुमितिप्रसङ्गः, तद्विधेयकत्वावगाहीच्छादशायाञ्च जायत एवानुमितिः विधेयताया: प्रत्य-

क्षेऽप्रामाणिकतया तत्प्रकारकेच्छाया अनुमित्युत्पत्त्यैव विषयसिद्धेरिति वाच्यम् । विधेयतायाः प्रत्यक्षव्यावृत्तत्वे तत्प्रकारिकायाः प्रत्यक्षान्यत्वाप्रकारिकाया अपीच्छायाः प्रत्यक्षसिद्धिकाले सम्भवात् प्रत्यक्षान्यत्वप्रकारकेच्छापर्यन्तानुसरणस्य निर्बीजत्वात् ।

न च विधेयता प्रत्यक्षव्यावृत्तैव तदवगाहित्वसूचनायैवोपदर्शितेच्छाकारे प्रत्यक्षान्यत्वोल्लेख इति वाच्यम् । एवमपि वक्ष्यमाणस्य शाब्दसिद्धिकालेऽशाब्दं ज्ञानं जायतामितीच्छाबलेनानुमितिर्जायते न तु प्रत्यक्षसामग्रीकाले इत्यस्य सङ्गमयितुमशक्यत्वात् । तादृशेच्छायाः प्रत्यक्षव्यावृत्तविधेयताद्यवगाहित्वे प्रत्यक्षसामग्रीकालेऽपि तद्बलादनुमित्युत्पत्त्यौचित्यात् । तदनवगाहित्वे सिद्धावप्यनुत्तेजकत्वात् ।

अत्रोच्यते । अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकेच्छात्वेनैवानुगमः । पर्वते वह्नेरन्यज् ज्ञानं जायतामित्याद्याकारकेच्छाकाले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्याश्चानुमितेर्वारणाय तथाविधेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकता कल्प्यते इति न दोषः ।

न च तासां तत्तद्व्यक्तित्वेनानन्तप्रतिबन्धकताकल्पनामपेक्ष्यानुमितित्वादिरूपप्रकाराविशेषमन्तर्भाव्यैवानुमित्सानामुत्तेजकत्वमुचितमिति वाच्यम् । तथा सति पर्वते वह्नेरन्यज् ज्ञानं जायतामितीच्छाकाले तथाविधोपनीतभानविरोधिघटाद्यनुमितीच्छाविशिष्टतत्सामग्रीसत्त्वे सिद्धौ सत्यां वह्न्याद्यनुमित्युपपत्तये तादृशतादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्धावुत्तेजकत्वापत्त्या तदभावसहस्रस्य मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण सिद्धिप्रतिबन्धकतानन्त्यप्रसङ्गात् ।

(दी०) यादृशयादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्य विशेषणत्वादिच्छाया अननुगमेऽपि न क्षतिः ।

(गा०) ननु साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छाया उपादाने पक्षोद्देश्यकत्वावच्छिन्नसाध्यविधेयकत्वप्रकारकेच्छाया असङ्ग्रहः । एवं विषयानुपरक्तानुमितिविषयिण्या अनु-

मितिर्जायतामितीच्छाया अपि निरुक्तरूपेणासङ्ग्रहः। न च सा असङ्ग्राह्यैव, असिद्धसाध्यान्तरानुमितिसामग्र्यामसत्यां तद्बलादपि सिद्धस्य प्रकृतसाध्यस्यानुमितेः तदिच्छाविषयसिद्ध्यनुरोधेनाव-श्यकत्वादित्यत आह। यादृशयादृशेति। असत्यां सिद्धौ यत्किञ्चि-द्गोचरं ज्ञानं जायतामित्याद्यीच्छासत्त्वेऽनुमित्युत्पादात् तासाञ्चा-नुत्तेजकत्वात् सिद्धौ सत्यामिति। तत्तदिच्छाभावसमुदायस्येति। साध्यविशेषविशिष्टपक्षविशेषाद्यवगाहित्वप्रकारकेच्छानां तत्तदव-गाहित्वप्रकारकानुमितिगोचरेच्छात्वेनानुगमय्य एकैकाभावा निवे-श्यन्ते, अतथाविधानाम् अनुमितिर्जायतां प्रत्यक्षान्यज्ञानं जायता-मित्याकारकेच्छानान्तु यद्यद्व्यक्तिसत्त्वे सिद्धिदशायां अनुमितिस्तत्त-द्व्यक्तित्वावच्छिन्नाभावा एव निवेशनीया अन्यथा अतिप्रसङ्गात् सिं-द्धौ तत्कालीनासिद्धिभेदा एव वा।

एतेन तत्कालीनसंयोगविभागादिव्यक्तिविशेषाभावनिवेशमा-दाय विनिगमनाविरहोऽपि निरस्तः। सामानाधिकरण्यसम्बन्धेन तदत्यन्ताभाववैशिष्ट्यनिवेशापेक्षया तत्तत्सिद्धिभेदानां विशेषणता-विशेषसम्बन्धेन वैशिष्ट्यनिवेशे प्रतियोगितावच्छेदकसम्बन्धानि-वेशे च लाघवम्। सिद्ध्युत्तरं तथाविधेच्छोत्पत्तिकालेऽनुमित्याप-त्तिस्तु इच्छासामग्र्या अनुमितिविरोधित्वादेव न सम्भव-तीति ध्येयम्।

इदन्त्ववधेयम्। तादृशेच्छाभावसमुदायस्य न तत्समुदायत्वेन सिद्धौ विशेषणत्वं(१) किन्तु तत्तदभावत्वेनैव युगपत्तावदभावा-नां तथात्वं तावदभावमात्रविषयकधीविषयत्वरूपस्य तावदभाव-समुदायत्वस्य ताद्रूप्येण निवेशे तावदभावानां तत्तदभावत्वेन नि-

---

(१) तादृशेच्छाभावसमुदायत्वस्य दुर्वचत्वात्, न च तावद-भावमात्रविषयकधीविषयत्वं तत, तावत्त्वस्य दुर्वचत्वात्, तावद-भावविषयकबुद्धेस्तत्तदभावविषयकत्वेन निवेशे तु तत्तदभाववि-शिष्टसिद्धेरेव निवेशयितुमुचितत्वात् तत्तदभावानां मिथो विशेष्य-विशेषणभावानापन्नानां निवेशे च प्रत्येकाभाववैशिष्ट्यस्याति-प्रसक्तत्वेनावच्छेदकत्वायोगादिति चेदेकविशिष्टापराभावत्वेनाभा-वानां निवेशनीयत्वात्। इति क्वाचित्कः पाठः।

वेशनीयतया तत्तदभावत्वेन तत्तदभाववैशिष्ट्यनिवेशापेक्षया महागौरवात् । तादृश्या यत्किञ्चिद्विषयत्तत्तद्व्यक्तित्वेन निवेशे तथाविधधीसहस्रस्य विनिगमनाविरहेण निवेशप्रसङ्गात् ।

यदि च मिथो विशेष्यविशेषणभावानापन्नेषु नानाविशेषणेषु व्यासज्यवृत्तिकमवच्छेदकत्वं सिद्धान्तविरुद्धमिति मन्यते तदा एकाभावविशेषितापराभावस्यावच्छेदकत्वमुपेयम् । तत्र च विशेष्यविशेषणभावे विनिगमनाविरहेऽपि न क्षतिः गत्यन्तराभावात् । तत्तदभावमात्रविषयकधीविषयत्वेन निवेशेऽपि ज्ञाने तत्तदभावविषयितानां एकविशिष्टापरत्वेनैव निवेशनीयतया विशेष्यविशेषणभावे विनिगमनाविरहस्याऽऽवश्यकत्वादिति । इच्छाया अननुगमेऽपि । एकरूपेण सर्वासामिच्छानामुपादानासम्भवेऽपि । न क्षतिः । न सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यानुमितिहेतुत्वानुपपत्तिः । तावदभावविशिष्टसिद्ध्यभावस्यानुगतत्वादिति भावः ।

इदं पुनरत्रावलोकनीयम् । वह्निविशिष्टपर्वतमहानसोभयानुमितिर्जायतामित्याकारकेच्छानामपि तत्साध्यविशिष्टतत्पक्षावगाहित्वप्रकारकतया पर्वते वह्नेः सिद्धिकाले महानसपक्षकानुमित्यादिसामग्र्यामसत्यां तादृशेच्छाबलात् पर्वते वन्ह्यनुमित्यापत्तिः, अनुमित्यंशे तत्साध्यविशिष्टतत्पक्षविषयकत्वान्यांकिञ्चिद्विषयकत्वाप्रकारकत्वविशेषणस्य इच्छायां निवेशे वह्निविशिष्टं पर्वतं महानसञ्चानुमिनुयामित्यादिसमूहालम्बनेच्छाया असंग्रहप्रसङ्गः । वह्निविशिष्टपर्वतविषयिणी महानसाविषयकानुमितिभिन्नानुमितिर्जायतामित्याकारकेच्छाबलात् उपदर्शितस्थलेऽतिप्रसङ्गस्याशक्यवारणता चेतीच्छाविषयतावच्छेदकतायाः पर्याप्तिनिवेशनमावश्यकम् । तथा च वह्निविशिष्टपर्वतानुमितिर्भवत्वित्यादीच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैव उत्तेजकत्वं पर्यवसितम्, अनुमितित्वानन्तर्भावे तादृशेच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकत्वपरिसमाप्तविषयतावच्छेदकत्वाभावेनाशक्यसङ्ग्रहत्वात् । एवञ्चानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकत्वरूपेण सङ्ग्रहाभिधानमसङ्गतम् ।

न च तत्कल्पं परित्यज्यैव यादृशयादृश इत्याद्यभिधानम्, इदानीमनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथक् पृथगभा-

षनिवेशनमेवाभिप्रेतमिति वाच्यम् । पक्षान्तरसूचकवाक्याद्यभावात् ।

अथ अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुगम एव सम्भवति, तथा हि तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वपर्य्याप्तावच्छेदकताकत्वं तादृशधर्मघटकपरिसमाप्तावच्छेदकताकत्वं तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताकत्वमेव पर्यवसितम्, एवञ्च तत्साध्यविशिष्टतत्पक्षविषयकप्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताकेच्छात्वादिना प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथगुत्तेजकत्वापेक्षया निरुक्तधर्मघटकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकतायामेव प्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नत्वनिवेशनमुचितं लाघवात्, इत्थञ्च तादृशरूपेणैव प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामपि सङ्ग्रहः सम्भवति ।

न च वह्निविशिष्टपर्वतविषयकं जायतामित्याकारकेच्छायाः सिद्ध्यधीनसंस्कारोत्पत्त्यैव चरितार्थतया वारणाय विषयतायामनुमितित्वावच्छिन्नत्वनिवेशनस्याऽऽवश्यकतया न तत्सङ्ग्रह इति वाच्यम् । समवायेन किञ्चिदवच्छिन्नत्वं निवेश्यैव तादृशेच्छावारणसम्भवादिति चेत् ? तर्हि पक्षांशे साध्यावगाहित्वेनानुमितिविषयकेच्छानामुक्तरूपसमशीलरूपान्तरेण उत्तेजकत्वापेक्षया तादृशावच्छेदकतायामेव पक्षांशे साध्यावगाहित्वीयावच्छेदकताभिन्नत्वमपि निवेश्यतां तावतैव तत्सङ्ग्रहस्यापि सम्भवात् इच्छाया अननुगमाभिधानासङ्गतिः ।

न च विषयतायां साध्यविशिष्टपक्षावगाहित्वाद्यवच्छिन्नत्वनिवेशनमावश्यकम्, अन्यथा अन्यानुमितिसामग्रीसमवहितानामनुमितिर्जायतामित्याकारकविषयविशेषानुपरक्तानुमितीच्छानां वारणासम्भवादिति, अन्यानुमितिसामग्र्यसमवहिततादृशेच्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकत्वस्योपगन्तव्यतया उत्तेजकानामननुगमाभिधानसङ्गतिरिति वाच्यम् । तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकतयैवातिप्रसङ्गवारणसम्भवेन तासां वारणानौचित्यात् । साध्यविशिष्टपक्षावगाहित्वावच्छिन्नत्वमधिकमनुमितिनिष्ठविषयतायां निवेश्य

चौखम्बासंस्कृतसीरीज़ ।

१ अस्यां चौखम्बा–संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादि-कार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः १० आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकं ... ... " " १ " ८

६ प्रापणव्ययः पृथग् नास्ति । ... ...

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता ३)

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः प्रथमाध्यायमारभ्य तृतीयाध्यायद्वितीयपादचतुर्थाध्यायपर्यन्तम् ३३)

(३) श्लोकवार्तिकं भट्टकुमारिलविरचितं पार्थसारथि-मिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् १५)

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचित-भट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) ३)

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः ... १॥)

(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविर-चित तर्कपादः (मीमांसा) ... ... ३)

(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णा ३)

(८) ब्रह्मसूत्रभाष्यम्–बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्र-श्रीमद्विज्ञानभिक्षुकृतव्याख्यानं । सम्पूर्णम् । (वेदान्तः)९)

(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा । ... ३)

(१०) सिद्धित्रयम्–विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । १॥)

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः(वेदान्तः) ६)

(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिवि-स्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ... ... ७॥)

(१३) विधिरसायनम् । श्रीमदप्पय्यदीक्षितकृतं सम्पूर्णम् ३)

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ... ... २४)

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता श्रीक्षेमराजविर-चितवृत्तिसमेता (वेदान्तः) ... ... ३)

(१६) मीमांसाबालप्रकाशः । जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) ३)

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि–मीमांसादर्शनम् । महामहोपाध्यायशालिकनाथमिश्रविरचितम् श्रीशङ्कर-भट्टकृता मीमांसासारसंग्रहश्च (मीमांसा) ४)

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्या-सप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ४॥)

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्य-विरचितभाष्यसहितम् (यन्त्रस्थः) ... ३०)

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं ४॥)

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविर-चितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम् । (वेदान्तः) २१)

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता ... १॥)

(२३) श्रीलक्ष्मीसहस्रम्–बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ... ... १२)

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता । ३)

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीश-विरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाध-र्योः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... ... ६)

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धा-न्तजाह्नवीयुतम् ... ... ३)

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिक-जैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः ... ... १॥)

(२८) शुद्धाद्वैतमार्तण्डप्रकाशव्याख्यासहितःप्रमेयरत्नार्णवः१॥)

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका ... ... ३०)

(३०) वीरमित्रोदयः महामहोपाध्यायश्रीमित्रमिश्रविरचितः प-रिभाषा–संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च६॥)

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचित आह्निकप्रकाशः ... ... ९)

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ६)

(३३) वेदान्ततत्त्वमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता। ३)

चौखम्बासंस्कृतसीरीज़ ।

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... ... ३)

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् ... ... १॥)

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् ... ... ३)

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्मामृतवर्षिणीसमाख्यव्याख्यासंवलितम् ... ... ६)

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः ३)

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकरण श्रीसुबोधिनीटिप्पण्योः—प्रकाशः गोस्वामि श्री पुरुषोत्तमजीमहाराज विरचितः ... ४॥)

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः ... ... ६)

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्मकृता अध्यात्मसुधातरङ्गिण्याख्य टीकया सहिता ... ... ४॥)

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः स्वकृतटीकाविभूषितश्च ... ... ३)

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ... १६॥)

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ... १६॥)

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्रप्रणीता । रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपादः ... ... ९)

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य- बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाख्यटीकाद्वयसंवलिता ... ११)

(४७) व्याकरणसिद्धान्तसुधानिधिः । पवतीय विश्वेश्वरसूरिविरचितः खण्ड १० का ... ... १९)

(४८) वीरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः खण्ड ७ का ... १०॥)

(४९) बृहदारण्यकवार्त्तिकसारः श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्ययाटीकयासमलंकृतः१९)

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः... ... ... ७॥)

(५१) पूर्वमीमांसाअधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता नेने इत्युपाख्य गोपालशास्त्रिणा परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत । ... ... १॥)

(५२) प्रशस्तपादभाष्यटीकासंग्रहः । तत्र कणादरहस्यम् । श्रीशंकरमिश्रविरचितम् ... ... ३)

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेता ... ... ४॥

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः खण्ड ६ का ९

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द 'क्षेमेन्द्र' विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावगणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च ... ... १॥

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रणीता । श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकया युता ... ...

(५७) निर्णयसिन्धु—कमलाकरभट्टविरचितः, कृष्णभट्टकृत व्याख्यासहितः खण्ड ६ का ... ...

(५८) न्यायप्रकाश, श्रीमदापदेवविरचितः । श्रीमदनन्तदेवविरचितया "भाट्टालङ्काराख्य" व्याख्ययासहिता

(५९) सांख्यतत्त्वकौमुदी—षड्दर्शनकृद्वाचस्पतिमिश्रविरचिता । पण्डितराड्—वंशीधरमिश्रविरचित "तत्त्वविभाकर" टीकासहिता खण्ड १ ... ...

(६०) न्यायदर्शनं सभाष्यसटीकं खद्योत सहितम्-खण्ड २

—:०:—

जयकृष्णदास गुप्तः सेक्रेटरी
चौखम्बासंस्कृतसीरीज आफिस
बनारस सिटी ।